श्रीः

श्रीमते रामानुजाय नमः

श्री विष्णुचित्त गुरवे नमः

# प्रार्थना

वन्दे लक्ष्मीपतिं देवं शङ्खचक्रगदाधरम्।
विद्यामूर्तिं हयग्रीवं शब्दार्थ ज्ञानलब्धये॥
अमृताध्मात मेघाभं अमृताहरणं विभुम्।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठभूपतिम्॥
नमस्सकलकल्याणदायिने शेषशायिने।
निर्मलानन्दकल्याण निधये विष्णवे नमः॥
नमस्सकलकल्याणदायिने चक्रपाणये।
विषयार्णवमग्नानां समुद्धरणहेतवे॥
सुदर्शनाद्याः हेतीशाः पञ्चब्रह्मर्षिरूपतः।
समुत्पन्नाः क्षितितले पौण्ड्रवर्धनस्थलादिषु॥
भगवच्छास्त्रतत्त्वज्ञं भगवत्पादसंश्रितम्।
वन्दे शाण्डिल्यमाचार्यं पौण्ड्रवर्धनस्थलोद्भवम्॥
भगवच्छास्त्रतत्त्वज्ञं औपगायन देशिकम्।
तोताद्रिसंभवं वन्दे वासुदेवपदाश्रितम्॥
अनन्तपुरसंभूतमनेकगुणभूषितम्।
प्रपद्ये भगवच्छिष्यं मौञ्ज्यायन गुरूत्तमम्॥
वासुदेव कृपापात्रं पाञ्चरात्रविशारदम्।
मृगस्थलसमुत्पन्नं प्रपद्ये कौशिकं गुरुम्॥

भारद्वाजाख्यमाचार्यं विष्णोः पादाब्जसंश्रितम्।
प्रपद्ये सुगुणाम्बोधिं शालग्रामाचलोद्भवम्॥
पाञ्चरात्रार्थतत्त्वज्ञान् पञ्चसंस्कारशालिनः।
पञ्चाचार्यान् प्रपद्येऽहं पञ्चकालिकतत्परान्॥
अनन्तः प्रथमो रात्रौ गरुडस्तु द्वितीयके।
तृतीयरात्रौ सेनेशः चतुर्थं वेधसाश्रुतम्।
रुद्रः पञ्चमरात्रन्तु पाञ्चरात्रं प्रशस्यते॥
इदं महोपनिषदं चतुर्वेदसमन्वितम्।
साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम्।
वेदान्तेषु यथासारं सङ्गृह्य भगवान् हरिः।
भक्तानुकम्पयाविद्वन् सञ्चिक्षेपसमन्वितः॥
आगमं भरतं शिल्पं वैद्यं ज्योतिषमेव च।
पञ्चशास्त्राणि संयोगात् पाञ्चरात्रं प्रशस्यते॥
लक्षन्तु चतुरो वेदाः लक्षं भारतमुच्यते।
शिल्पं लक्षद्वयं चैव चतुर्लक्षन्तु ज्योतिषम्।
पञ्चलक्षप्रमाणेन पाञ्चरात्रं प्रशस्यते॥
श्रीशेषपक्षीश्वरपद्मगर्भ सेनेशमुख्यान् प्रतिबोधयन्तम्।
श्रीपाञ्चरात्रागमाचार्यमाद्यं विष्णुं सदाहं शरणं प्रपद्ये॥

## विष्वक्सेनाराधनम्

ध्रु॒व॑न्ते॒राजा॒ वरु॑णोध्रु॒वन्दे॒वो बृह॒स्पति॑ः। ध्रु॒वन्त॒ इन्द्र॑श्चा॒ग्निश्च॑
रा॒ष्ट्रं धा॑रयतान्ध्रु॒वम्।
पर्व॑त इ॒वावि॑चाचलिः। इन्द्र॑ इ॒वेह ध्रु॒वस्ति॑ष्ठ। इ॒हरा॒ष्ट्रमु॑धारय। अ॒भिति॑ष्ठ
पृथन्य॒तः। अध॑रेसन्तु॒ शत्र॑वः। इन्द्र॑ इववृत्र॒हा ति॑ष्ठ।

देवीं वाचमजनयन्त देवाः। तां विश्वरूपाः पशवोमदन्ति। सानोमन्द्रेश मूर्जन्दुहाना। धेनुर्वागस्मानुपसुष्टु तैतु।
सुमुहूर्त्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु। सुमुहूर्तोऽस्तु।
ऋध्यास्महव्यैर्नमसोपसद्यं मित्रन्देवं मित्रधेयन्नो अस्तु। अनूराधान् हविषा वर्धयन्तः। शतञ्जीवेम शरदस्सवीराः। दीर्घायुष्यमस्तु। पवित्रपाणिः।
प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अस्यदेवदेवस्य भगवतो वासुदेवस्य श्रीभूमिनीला-------नायिका समेत श्री----------स्वामि सन्निधौ राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं---------------कर्मणि समस्त कार्याणां निर्विघ्नेन परिसमाप्त्यर्थं आदौ विष्वक्सेनाराधनं करिष्ये। तदङ्गं पात्रासाधनं करिष्ये इति सङ्कल्प्य। दर्भान् उत्तरतो निरस्य। अप उपस्पृश्य। पात्राणि साधयित्वा। घण्टाधिदैवताय ओं कं ब्रह्मणे नमः धूप पात्राधिदैवताय ओं पावकाय नमः। दीप पात्राधिदैवताय  ओं भास्कराय नमः। वर्धिन्यादि अर्चनपात्राधिदैवताय ओं वं वरुणाय नमः इत्यभ्यर्च्य। अर्घ्यं परिकल्पयामि। पाद्यं परिकल्पयामि। आचमनीयं परिकल्पयामि। इति परिकल्प्य।
सर्वौषधीः निक्षिप्य। शोषणादीनि कृत्वा। ओं सुं सुरभ्यै नमः इति सुरभिमुद्रया अमृतीकृत्य। अर्घ्य पात्रात् किञ्चिज्जलम् अन्यस्मिन्पात्रे गृहीत्वा। आधार स्थालिकोपरि विन्यस्य। पात्रे ओं श्रियै नमः। ओं गङ्गायै नमः। ओं सरस्वत्यै नमः इत्यावाह्य। पात्रान्तरस्थम् अर्घ्यजलं वामहस्ते निधाय। दक्षिणहस्तेन पिधाय। ओं नमो नारायणायेति सप्तवारमभिमन्त्र्य। तज्जलेन
ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि आत्मानञ्च प्रोक्ष्य। शुचौदेशे चतुरश्रं धान्यपीठं परिकल्प्य। तदुपरि षोडशदर्भ कृत कूर्चं निक्षिप्य। तस्मिन् आधारादि पद्मान्तम् अभ्यर्च्य।
ओं ह्रीम् आधारशक्त्यै नमः
ओं ज्रौं ष्ट्रूं कालपावक कूर्माय नमः

ओम् अं सहस्रफणाधृत चतुरश्र भूमण्डलाय अनन्ताय नमः

ओं भूं भूम्यै नमः
ओं ज्ञानाय नमः
ओम् ऐश्वर्याय नमः
ओं धर्माय नमः
ओं वैराग्याय नमः
ओम् अव्यक्त पद्माय नमः

इत्यभ्यर्च्य।

तत्तन्मन्त्रेण धूपं समर्प्य। आवाहन पात्रम् अद्भिः पूरयित्वा। गन्धाक्षतपुष्पैः निक्षिप्य। वामहस्ते निधाय। दक्षिण हस्तेन पिधाय। नासिकाग्रान्तम् उद्धृत्य।

दिव्याकारं सरोजाक्षं शङ्खचक्र गदाधरम्।
मुकुन्दद्वार निलयं विष्वक्सेनमुपास्महे॥

ओं वं विष्वक्सेनाय नमः अगच्छागच्छ इति चतुर्वारं जप्त्वा। तत्तोयं कूर्चे विन्यस्य। आवाहनादि षण्मुद्राः प्रदर्श्य।

ओं वां हृदयाय नमः
ओं वीं शिरसे स्वाहा
ओं वूं शिखायै वषट्
ओं वैं कवचाय हुं
ओं वौं नेत्राभ्यां वौषट्
ओं वः अस्त्राय फट्

इति षडङ्गन्यासं कृत्वा। किरीट चक्र शङ्ख वनमाला विष्वक्सेन मुद्राः प्रदर्श्य।

स्वामिन्सर्व जगन्नाथ यावत्पूजावसानकम्।
तावत्वं प्रीति भावेन कूर्चेस्मिन् सन्निधिं कुरु॥

इति यागावसानिकं प्रार्थ्य। ओं वं विष्वक्सेनाय नमः आसनं समर्पयामि। अर्घ्यं समर्पयामि। पाद्यं समर्पयामि। आचमनीयं समर्पयामि। स्नानं समर्पयामि। स्नानानन्तरम् आचमनीयं समर्पयामि। वस्त्र उत्तरीय आभरणार्थे अक्षतान् समर्पयामि। गन्धान् धारयामि। गन्धस्योपरि अक्षतान् समर्पयामि। पुष्पमालां समर्पयामि। पुष्पैः पूजयामि॥

ओं श्रीमते नमः
ओं विश्वक्सेनाय नमः
ओं सूत्रवतीसमेताय नमः
ओं सेनेशाय नमः
ओं सर्वपालकाय नमः
ओं शोभनाङ्गाय नमः

ओं मणिकुण्डल धराय नमः
ओं तप्तकाञ्चन भूषणाय नमः
ओं करिवक्त्राय नमः
ओं हरिप्रियाय नमः
ओं सर्वशास्त्रार्थ तत्वज्ञाय नमः
ओं ह्रीमती सूत्रवती समेत
विश्वक्सेनाय नमः

नानाविध परिमळ पत्र पुष्पाणि समर्पयामि॥

धूर॑सि धूर्व धूर्व॑न्तन्धूर्व तंय्यो॒ँऽस्मान्धूर्व॑ति॒तन्धू॒र्व॑यं
व्वयन्धूर्वा॑मस्त्वन्देवाना॑मसि सस्नि॑तमं पप्रि॑तमञ्जुष्ट॑तमं
व्वह्नि॑तमन्देवहूत॑म मह्नु॑तमसि हविर्धानन्द ँ हं॑स्व माह्वा॒ँर्मित्रस्य॑
त्वा चक्षु॑षा प्रेक्षे मा भेर्मा संव्वि॑क्था मा त्वा॑ हि ँ सिषम्॥

धूपमाघ्रापयामि।

उद्दी॒ँप्यस्व जातवेदोऽपघ्नन्निर् ऋ॑तिं मम॑। पशू ँ श्च मह्यमाव॑ह
जीव॑नञ्च दिशो॑दिश॥ मानो॑ हि ँ सीज्जातवेदो गामश्वं
पुरु॑षञ्जग॑त्।अबि॑भ्रदग्न आग॑हि श्रिया मा परि॑ पातय॥

दीपं समर्पयामि। अनन्तरम् आचमनीयं समर्पयामि।

ओं भूर्भुवस्सुवः।

ओं देवस्य॑त्वा सवितुः प्र॑सवे अश्विनो॒ँर्बा॑हुभ्या॒ँ पूष्णो हस्ता॒ँभ्याम् प्रति॑गृह्णातु॥

विष्वक्सेनाय नमः। कदळीफल कर्पूरताम्बूलं समर्पयामि। पानक पानीयं समर्पयामि। आचमनीयं समर्पयामि। मन्त्रपुष्पं समर्पयामि। स्वर्णपुष्पं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि।

भवसञ्चित पापौघ विध्वम्सन विचक्षणम्।
विघ्नान्धकार भास्वन्तं विष्वक्सेनं तमाश्रये॥ इति प्रार्थ्य

ओं वं विष्वक्सेनाय नमः यथास्थानं प्रतिष्ठापयामि। इति अक्षतान् समर्प्य। क्षोभनार्थे क्षेमाय पुनरागमनाय च। इत्युच्चार्य। कूर्चग्रन्थिं विसृजेत्॥

-------*******-------

श्रीः

# श्री वासुदेवपुण्याहवाचन विधिः

आचार्यः आसने उपविश्य। पवित्रपाणिः प्राणानायम्य।

## सङ्कल्पः

अस्य देव देवस्य भगवतो वासुदेवस्य श्री भूमि नीळा-------नायिका समेत श्री--------स्वामि सन्निधौ नित्याराधनकर्माङ्गम् गर्भगृह अर्धमण्डप - महामण्डपादीनां शुद्ध्यर्थं यागशाला- पाकशाला शुद्ध्यर्थं पात्राद्युपकरण शुद्ध्यर्थं स्नानोपकरण - द्रव्य शुद्ध्यर्थं वासुदेव पुण्याहवाचनं करिष्ये। इति सङ्कल्प्य। दर्भान् उत्तरतो निरस्य। अप उपस्पृष्य।

## कलशस्थापन विधिः

०१. चरणं पवित्रमुच्चार्य महीं प्रक्षाल्य।

चरणं पवित्रं विततं पुराणम्। येन पूतस्तरति दुष्कृतानि।
तेन पवित्रेन शुद्धेन पूताः। अति पाप्मानमरातिं तरेम।
लोकस्यद्वारा मर्चिमत्पवित्रम्। ज्योतिष्मद्भ्राजमानं
महस्वत्। अमृतस्य धारा बहुधा दोहमानम्। चरणं नो
लोके सुधितां दधातु॥

**०२. विष्णोरराटेति मन्त्रेण दर्भैः सम्मार्ज्य।**

विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो

विष्णोस्स्यूरसिविष्णोर्ध्रुवमसि वैष्णवमसि विष्णवेत्वा॥

**०३. गन्धद्वारेति मन्त्रेण गोमयेन अनुलिप्य।**

गन्धद्वारां दुराधर्षान्नित्य पुष्टां करीषिणीम्।

ईश्वरी ँ सर्वभूतानां तामिहोपह्वये श्रियम्॥

**०४. आप उन्दन्त्विति मन्त्रेण सुधाचूर्णेन अलङ्कृत्य।**

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे।

यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि॥

**०५. देवस्यत्वेति मन्त्रेण अक्षतान् विकीर्य।**

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो

हस्ताभ्याम् प्रतिगृह्णातु॥

**०६. ग्रीष्मो हेमन्तेति मन्त्रेण धान्यपीठं प्रकल्प्य।**

ग्रीष्मो हेमन्त उतनो वसन्तः शरद्वर्षास्सुवितन्नो अस्तु।

तेषामृतूना ँ शत शारदानां निवात एषामभये स्याम॥

**०७. शन्नो देवी इति मन्त्रेण शतपत्रं विलिख्य।**

शन्नो देवीरभिष्टय आपो भवन्तु पीतये।

शंय्योरभिस्रवन्तु नः॥

**०८. धन्वनागेति मन्त्रेण दर्भान् निक्षिप्य।**

धन्वनागा धन्वना जिञ्जयेमधन्वनातीव्रास्समदो जयेम।

धनुश्शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिषो जयेम॥

**०९. मूर्धानमिति मन्त्रेण शिरसा प्रणम्य।**

मूर्धानन्दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम्।

कवि ꣳ सम्राजमतिथिञ्जनानामासन्ना पात्रं जनयन्त देवाः ॥

**१०. भद्रं कर्णेति मन्त्रेण कलशं संस्थाप्य।**

भद्रं कर्णेभिश्शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।

स्थिरैरङ्गैः-स्तुष्टुवा ꣳ सस्तनूभिः। व्यशेम देवहितं यदायुः॥

**११. हिरण्यशृङ्गमिति मन्त्रेण गन्धजलेन संपूर्य।**

हिरण्यशृङ्गं व्वरुणं प्रपद्ये तीर्थं मे देहि याचितः।

यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः॥

शोषणादीनि कृत्वा। सुरभिमुद्रायाऽमृतीकृत्य।

**१२. विष्णुगायत्र्या आम्रपल्लवं निक्षिप्य।**

ओं नारायणाय विद्महे वासुदेवाय धीमहि।

तन्नो विष्णुः प्रचोदयात्॥

**१३. याः फलिनीरिति मन्त्रेण नालिकेरफलं निक्षिप्य।**

याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः।

बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ꣳ हसः॥

**१४. हिरण्यपात्रमिति मन्त्रेण रत्नानि निक्षिप्य।**

हिरण्यपात्रं मधोः पूर्णं ददाति। मधव्योसानीति।

एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुस्तेजो दधाति॥

तत्कलशे आधारादि पद्मान्तम् अभ्यर्च्य।

ओं ह्रीम् आधारशक्त्यै नमः-------ओं ऐश्वर्याय नमः

ओम् अव्यक्तपद्माय नमः

तत्तन्मन्त्रेण धूपं समर्प्य। भगवद्दक्षिणहस्तात् ओं सहस्रार हुं फट्।

ओं नमो भगवते महा सुदर्शनाय आगच्छागच्छ इति सुदर्शनम् आवाह्य।

आवाहनादि षण्मुद्राः प्रदर्श्य।( आवाहितो भव। स्थापितो भव। सन्निधो भव। सन्निरुद्धो भव। साम्मुख्यो भव। प्रार्थितो भव )। प्रतिमामुद्रां प्रदर्श्य।

आचक्राय स्वाहा हृदयाय नमः
विचक्राय स्वाहा शिरसे स्वाहा
सुचक्राय स्वाहा शिखायै वषट्
सच्चक्राय स्वाहा कवचाय हुम्
धीचक्राय स्वाहा नेत्रत्रयाय वौषट्
ज्वालाचक्राय स्वाहा अस्त्राय फट्

कीरीट चक्र शङ्ख वनमाला मुद्राः प्रदर्श्य।

## ध्यानम्

शङ्खं चक्रं च चापं परशुमसिमिषुं शूलपाशाङ्कुशाब्जं
बिभ्राणं वज्रखेटौ हलमुसलगदा कुन्तमत्युग्रदंष्ट्रम्।
ज्वालाकेशं त्रिणेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्यायेत् षट्कोणसंस्थं सकलरिपुजनप्राणसंहार चक्रम्॥

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्।
तावत् त्वं प्रीतिभावेन करकेस्मिन् सन्निधिं कुरु॥

इति यागावसानिकं प्रार्थ्य। आसनं समर्पयामि। अर्घ्यं समर्पयामि। पाद्यं समर्पयामि। आचमनीयं समर्पयामि। स्नानं समर्पयामि। स्नानानन्तरम् आचमनीयं समर्पयामि। वस्त्र उत्तरीय आभरणार्थे अक्षतान् समर्पयामि। गन्धान् धारयामि। गन्धस्योपरि अक्षतान् समर्पयामि। पुष्पमालां समर्पयामि। पुष्पैः पूजयामि

ओं आचक्राय नमः
ओं विचक्राय नमः
ओं सुचक्राय नमः
ओं सच्चक्राय नमः
ओं धीचक्राय नमः
ओं ज्वालाचक्राय नमः
ओं महा सुदर्शनचक्राय नमः

नानाविध परिमळ पत्र पुष्पाणि समर्पयामि॥

धूरसि धूर्व धूर्वन्तन्धूर्व तंय्योऽस्मान्धूर्वतितन्धूर्वयं
व्वयन्धूर्वामस्त्वन्देवानामसि सस्नितमं पप्रितमञ्जुष्टतमं
व्वह्नितमन्देवहूतम महुतमसि हविर्धानन्दृ ँ हस्व
माह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संव्विक्था मा त्वा
हि ँ सिषम्॥ धूपमाघ्रापयामि।

उद्दीप्यस्व जातवेदोऽपघ्नन्निर् ऋतिं मम। पशू ँ श्च
मह्यमावह जीवनञ्च दिशोदिश। मानो हि ँ सीज्जातवेदो गामश्वं
पुरुषञ्जगत्। अबिभ्रदग्न आगहि श्रिया मा परि पातय॥
दीपं समर्पयामि। अनन्तरम् आचमनीयं समर्पयामि।

ओं भूर्भुवस्सुवः। ओं देवस्यत्वा सवितुः प्रसवे
अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् प्रतिगृह्णातु॥

सुदर्शनाय नमः। कदळीफल कर्पूरताम्बूलं समर्पयामि। पानक पानीयं समर्पयामि। आचमनीयं समर्पयामि। मन्त्रपुष्पं समर्पयामि। स्वर्णपुष्पं समर्पयामि। नीराजनं समर्पयामि। समस्तोपचारान् समर्पयामि। अस्मिन् वासुदेव पुण्याहवाचन जपकर्मणि सर्वेभ्यः श्रीवैष्णवेभ्यो नमः। वासुदेव पुण्याहवाचन जप कर्म कुरुध्वं – वयं कुर्मः। स्वामिनः मनस्समाधीयतां – समाहितमनसस्मः। प्रसीदन्तुभवन्तः – प्रसन्नास्मः। ओं भवद्भिः अनुज्ञातः वासुदेव पुण्याहं वाचयिष्ये। ओं वाच्यताम्।

ओम् आपः – शिवा आपस्सन्तु।
ओं गन्धाः – सुगन्धाः पान्तु
ओं सुमनसः – सौमनस्यमस्तु
ओम् अक्षतम् – अक्षतञ्चारिष्टञ्चास्तु
ओम् अन्वाहार्यः – सुमन्वाहार्योस्तु

ओं दक्षिणाः – स्वस्तिदक्षिणाः पान्तु

ओं बहुदेयम् – अस्तु

ओम् ओम् ओम् । ओं नमो भगवते वासुदेवाय। भगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा भगवतः कर्मणा भगवतः कर्म करिष्यामि।

( वासुदेवस्य ) भगवान् पवित्रम्। वासुदेवः पवित्रम्। शतधारम्। सहस्रधारम्। अपरिमितधारम्। अच्छिद्रम्। अक्लिष्टम्। अक्षय्यम्। अनन्तम्। अरिष्टम्। अच्युतम्। परमं पवित्रम्। भगवान् वासुदेवः पुनातु।

ओं भूर्भुवस्सुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥
ओं नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्॥
ओं सुदर्शनाय विद्महे महाज्वालाय धीमहि।
तन्नश्चक्रः प्रचोदयात्॥

ओं तत् सत्। पुण्याहं भवन्तो ब्रुवन्तु। पुण्याहमिति या मन्त्रनार्थे। परिकल्प्यदेवमादितः।प्रयोगस्य धीमहीति। मङ्गळानि नामानि। प्रयुञ्जते मनुष्याः। युष्मतादितिमेयोदिताः। एतत् भक्तानाम्। तन्मेयथास्यादिति एष भगवान् श्रेष्ठं मङ्गळम्। सर्वशक्तिर्युक्तो योगः। सर्वशक्तिर्भवतु। स एव हि तत्त्वम्। सहिते सृष्टुः। कर्म कर्म ग्रहपतिरेते। नैव हि मन्त्रेण। तथैव ऋत्विजस्सर्वे। तथा यज्ञो महीयते। यद्दचावा। यजुषावा। साम्नावा अभिमन्त्र्यते। सर्वं तद्ब्रह्मणे तेन यच्चद्दत्वाय कल्प्यते। य इमे सर्व देवानां भगवान्। दैवब्राह्मणो भगवान्। पुत्रपौत्रैश्च। दीर्घमायुरवाप्नुयादिति। यासि यासि। शुचिर्भूतिर्भूतये। ओं भगवान्। वासुदेवो भगवान्। सङ्कर्षणो भगवान्। प्रद्युम्नो भगवान्। अनिरुद्धो भगवान्। एष भगवान्। एष वासुदेवः।

एषासापराकृतिः। एष तत्परब्रह्म। एष प्रभवः। एष योगः। एषोव्ययः। एष आत्मा। चतुर्विधः। सर्वत्र सर्वदर्शी सर्वेश्वरेश्वरः। सर्वशक्तिः समृद्धिमान्। एषा वा ऋद्धिमन्वाप्तो। वशीस्वाधीरनन्तो। व्यपगतनिद्राभयक्रोधो। व्यपगतेच्चः। अखिलमक्लिष्ठम्। अव्याधि निर्दोषो निरनिष्टो निरवद्यः। एन भगवन्तं वासुदेव एनम्। विदुर्य एनम्। विदुस्त एनम्। विदुर्नुते विदुरिति मह्यम्। दीर्घमायुष्यमस्तु। शिवा भगवान् पानीयापस्सन्तु। सुमनसो भगवान् - सौमनस्यमस्तु। समनसो भगवन्तो वासुदेव सङ्कर्षण प्रद्युम्न अनिरुद्धास्सन्तु। अक्षतैः अक्षतश्चारिष्टश्चास्तु। अक्षतमरोगं कुशलं भगवतोरिष्टम्। ओं भगवान् प्रद्युम्नो मनस्समाधीयतां - समाहितमनसस्मः। अस्मिन् ग्रामे {नगरे} सर्वेषां श्रीवैष्णवानां ब्राह्मणानां गवां गणानाञ्च। राष्ट्रञ्च। धनञ्च। कुलञ्च। धर्मश्च। अहरहरभिवर्धताम्। एतत् शुद्ध्यर्थे भगवत् वैशेषिकेण। भगवत् प्रीतिकर्मणानेन। ओं पुरुषः प्रीयताम्। ओं सत्यः प्रीयताम्। ओम् अच्युतः प्रीयताम्। ओम् अनन्तः प्रीयताम्। ओं भगवान् वासुदेवः प्रीयताम्। प्रियन्ताम् महापुरुषाः शान्तिरस्तु। भगवन्तस्सर्वे वासुदेवाद्याः। भगवत् प्रीति माङ्गल्य आयुरारोग्य सिद्धये सम्पद्यताम्। धनधान्यसमृद्धये सम्पद्यताम्। एषाकृतिरेष भगवान् वासुदेवः। एषाकृतिरेष भगवान् सङ्कर्षणः। एषाकृतिरेष भगवान् प्रद्युम्नः। एषाकृतिरेष भगवान् अनिरुद्धः। ओं महापुरुषो वर्धताम्। ओं सत्यो वर्धताम्। ओम् अच्युतो वर्धताम्। ओम् अनन्तो वर्धताम्। ओं भगवान् वासुदेवो वर्धताम्। वर्धन्तां महापुरुषाः शान्तिरस्तु। न्यूनातिरिक्तं यावद्वर्षशतं संपूर्णमस्तु॥

शुद्धये वासुदेवोऽस्तु लाङ्गली शुद्धये सदा।
प्रद्युम्नः शुद्धये चास्तु अनिरुद्धोस्तु शुद्धये॥
कर्मणां शुद्धये चास्तु विष्णुस्सर्वत्र संस्थितः।
दोषाणां हरणायास्तु गदाचक्रासिभृत्सदा॥

यागेषु च सुरेशस्य नगरग्रामवासिनाम्।
तुष्टये पुष्टये चास्तु आयुरारोग्यसिद्धये॥
गुरूणां साधकेन्द्राणां पञ्चकाल रतात्मनाम्।
सर्वदा पुत्रमित्राणां दासी दास गवामपि॥
वेदशास्त्रागमादीनाम् अस्तु त्राणाय सर्वशः।
अविघ्नमनिशं चास्तु सम्पदश्चोत्तरोत्तरम्॥
पुण्याहं शुद्धये चास्तु वासुदेवादि मूर्तिमान्।
शङ्खचक्रगदापद्मैः युक्तस्सर्वेश्वरेश्वरः॥
प्रीयतां भगवान् देवो लाङ्गलि प्रीयतां सदा।
प्रद्युम्नः प्रीयतां नित्यं अनिरुद्धस्सुरेश्वरः॥
नारायणः सुरेशोस्तु कर्मणां पूरणाय च।
न्यूनाधिकानां शान्त्यर्थं प्रीयतां भगवान् प्रभुः॥

ओं यत्पुण्यं नक्षत्रम्। तद्बट् कुर्वीतोपव्युषम्। यदा वै सूर्य उदेति। अथनक्षत्रन्नैति। यावति तत्र सूर्यो गच्छेत्। यत्र जघन्यं पश्येत्। तावति कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते॥

कर्मणः पुण्याहं भवन्तो ब्रुवन्तु। पुण्याहं कर्मणोस्तु।

स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥

कर्मणः स्वस्ति भवन्तो ब्रुवन्तु। स्वस्ति कर्मणोस्तु।

ऋध्यामस्तोमं तनूयामवाचं मानोमन्त्रं सारथेहोपयातं
याशोमपक्कम्मधुघोष्यन्तराः भूतांशोऽश्विनोकाममप्राः।

कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु। कर्म ऋध्यताम्। ऋद्धिः समृद्धिः – अस्तु। पुण्याहः समृद्धिः – अस्तु। शिवं कर्म – अस्तु। ओं भगवान् वासुदेवः

प्रीयतां - प्रीयतां भगवान् वासुदेवः। भगवान् पवित्रं वासुदेवः पवित्रम्।
शतधारम्। सहस्त्रधारम्। अपरिमितधारम्। अच्छिद्रम्। अक्लिष्टम्।
अक्षय्यम्। अनन्तम्। अरिष्टम्। अच्युतम्। परमं पवित्रम्। भगवान् वासुदेवः
पुनातु। ओं भूर्भुवस्सुवः।

पवित्रं भगवानस्तु वासुदेवः परोगुरुः।
अस्तु सङ्कर्षणादेवः पवित्रं परमो विभुः॥
प्रद्युम्नोस्तु पवित्रं वै साक्षीविश्वस्य सांप्रतम्।
पवित्रमनिरुद्धो वा विश्वत्राता जगत्पतिः॥
शुद्धयेस्तु हृशीकेशो वासुदेवोस्तु शुद्धये।
सदा सङ्कर्षणो देवः शुद्धयेस्तु सदा मम॥
प्रद्युम्नश्शुद्धये चास्तु सर्वत्र मम सर्वदा।
शुद्धयेस्त्वनिरुद्धोस्तु शुद्धयेस्तु जगत्पतिः॥
शुद्धये विष्णुरस्त्वाद्या शुद्धये मधुसूदनः॥
ओं शान्तिः शान्तिः शान्तिः

सुदर्शनाय नमः समस्तोपचारान् समर्पयामि। नीराजनं समर्पयामि।
अस्मात् कुम्भात् आवाहितं सुदर्शनं यथास्थानं प्रतिष्ठापयामि।
क्षोभनार्थे क्षेमाय पुनरागमनाय च।

## प्रोक्षण मन्त्राः

ओं स्थानानि देशानि सहस्त्रबाहुः वरेण्य नामा विरजांसि नामा।
तेभ्यो नमस्ते मधुसूदनाय तत्राभिमानां परिरक्षयन्ताम्॥

( ओं वास्तोष्पते प्रतिजानीह्यस्मान् थ्स्वावेशो अनमीवो भवानः।
यत्वेमहे प्रतितन्नो जुषस्व शन्न एधि द्विपदे शञ्चतुष्पदे॥

अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः॥

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः॥ ) ओं सहस्रार हुं फट्  इति मन्त्रेण प्रोक्षयेत्॥

वासुदेवाख्य पुण्याहं वाचयेत् देवसन्निधौ।
मानुषं यदि पुण्याहं मन्दिरं शूण्यतां व्रजेत्॥
वासुदेव पुण्याह वाचनं सम्पूर्णम्

-----------*******-----------

श्रीः

## वासुदेवपुण्याहवाचन विधिः

( ईश्वर संहितानुसारिणी )

विष्वक्सेनमभ्यर्च्य। ओं श्री गोविन्द----सर्व द्रव्योपकरण शुध्यर्थं शुद्धि पुण्याहवाचनं करिष्ये। इति सङ्कल्प्य। ओं आपः – शिवापस्सन्तु।
ओं गन्धाः – सुगन्धाःपान्तु। ओं सुमनसः – सौमनस्यमस्तु।
ओं अक्षताः – अक्षतञ्चारिष्टं चास्तु। ओं दक्षिणाः – स्वस्तिदक्षिणाः पान्तु।
ओं दर्भाः – स्वस्तिदर्भाः पान्तु। इति वाचयित्वा। ओं ओं ओं परमधामावस्थित मदनुग्रहकाम्य योद्यतावतारोहाभिमत सिद्धित मन्त्र शरीर ओं नमो नमः सहस्रार हुं फट् भगवन्तं सुदर्शनमागच्छागच्छेति आवाह्याभ्ययर्च्य। ओं भवद्भिः अनुज्ञातः पुण्याहं वाचयिष्ये – वाच्यताम्। ओं भगवान् पवित्रं। वासुदेवः पवित्रं। तत् पादौ पवित्रं। तत् पादोदकं पवित्रं। ओं तत्सत् पुण्याहं भवन्तो ब्रुवन्तु। पुण्याहमस्तु।

ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥
ओं नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्॥

ओं एकपदी द्विपदी त्रिपदी चतुष्पद्यपि अविपदसि नहिपद्यसे नमस्ते तुरीयाय दर्शिताय पदाय परो रजसे असावदोमाप्रपतत्।

एषसापरा प्रकृतिरेषतत्परंब्रह्मैषप्रभव एषोव्यय एष आत्मा चतुर्विधस्सर्वश स्सर्वदर्शी सर्वेश्वर स्सर्वशक्तिस्समृद्धिमानग्रन्थीरन्नून। आद्योवशी स्वाधीनोनादिरनन्तः। व्यपगतनिद्राभय क्रोधतन्द्री व्यपगतेच्छा तमः। क्लमव्याधि निर्दोषो निररिष्टो निरवद्यः। एवं भगवन्तं वासुदेवमेवम् विदुः। एनैवं विदुः। नते विदुः। एषाकृतिरेष भगवान् वासुदेवः। एषाकृतिरेष भगवान् सङ्कर्षणः। एषाकृतिरेष भगवान् प्रद्युम्नः। एषाकृतिरेष भगवान् अनिरुद्धः

ओं शुद्धयेऽस्तु परोदेवो वासुदेवोऽस्तुशुद्धये।
सङ्कर्षणश्शुद्धयेऽस्तु प्रद्युम्नश्चास्तु शुद्धये।
शुद्धयेस्त्वनिरुद्धोऽपि केशवश्चास्तु शुद्धये।
नारायणोऽस्तु विश्वेशः शुद्धये सर्वकर्मसु।
शुद्धये माधवश्चास्तु सर्वलोकहितेरतः।
गोविन्दश्शुद्धये चास्तु परमात्मा सनातनः।
शुद्धये विष्णुरस्त्वद्य शुद्धये मधुसूदनः।
सर्वलोक हितो देवः शुद्धयेऽस्तु त्रिविक्रमः।
वामनश्शुद्धये चास्तु श्रीधरोद्यास्तु शुद्धये।
शुद्धयेऽस्तु ऋषीकेशः पद्मनाभोऽस्तु शुद्धये।
सदा दामोदरोदेवः शुद्धयेऽस्तु जगत्पतिः।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः।
अनन्तश्शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये।
सर्व कर्मसु चैवास्तु शुद्धये मधुसूदनः।
सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः।

क्रोडात्मा शुद्धये चास्तु शुद्धये बडबाननः।
शुद्धयेऽस्तु सदा धर्मः चास्तु वागीश्वरस्तथा।
देव ऐकार्णवशयः शुद्धयेऽस्तु निरन्तरम्।
शुद्धयेऽस्तु सदा धर्मः कूर्मः पाताल धारकः।
वराहश्शुद्धयेचास्तु नारसिंहोऽस्तुशुद्धये।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम्।
श्रीपतिश्शुद्धये चास्तु कान्तात्मा चास्तु शुद्धये।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च।
पारिजातहरश्चास्तु लोकनाथोऽस्तु शुद्धये।
सर्वत्र शुद्धये चास्तु दत्तात्रेयो महा प्रभुः।
न्यक्रोधशायी भगवान् शुद्धये चास्तु सर्वदा।
एकशृङ्गतनुश्चास्तु वामनश्चापि शुद्धये।
त्रिविक्रमश्शुद्धयेऽस्तु शुद्धयेऽस्तु नरस्सदा।
नारायणश्शुद्धयेऽस्तु हरिः कृष्णश्च शुद्धये।
ज्वलत्परशुधृग्रामश्शुद्धयेऽस्तु धनुर्धरः।
रामश्च शुद्धये चास्तु वेदविद्भगवांस्ततः।
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयंकरः।
शुद्धयेऽस्तु सदा देवः पातालशयनः प्रभुः।
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः।
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेपि च।
शिवाय मुक्तये सन्तु वृद्धये सर्व कर्मणाम्।
मन्त्राणां देशिकानाञ्च स्थानानामपि सर्वदा।
पुत्र मित्र कलत्राणां दासी दास गवामपि।

वेद शास्त्रागमादीनां व्रतानामिष्ट संपदाम्।
मनोरथानां सर्वेषां हितानां सन्तु सर्वदा।
आयुष्यारोग्य मेधानां धनधान्यादि सम्पदाम्।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि।
राज्ञो जनपदस्यापि यजमान्स्य मन्त्रिणाम्।
वैष्णवानां विशेषेण परत्रहितमिच्छताम्।
पञ्चकाल विशुद्धानां सत्वस्थानां शुभात्मनाम्।
स्वस्त्यस्तु च शिवञ्चास्तु शुभञ्चापि पुनः पुनः।
अविघ्नमनिशं चास्तु दीर्घमायुष्यमस्तु नः।
समाहित मनश्चास्तु संपदश्चोत्तरोत्तरम्।
पुण्याहं शुद्धये चास्तु वासुदेवादि मूर्तयः।
शङ्ख चक्र गदा पद्म युक्तस्सर्वेश्वरेश्वरः।
प्रीयतां भगवान् देवो लांगलीप्रियतां सदा।
प्रद्युम्नः प्रीयतां नित्यम् अनिरुद्ध स्सुरेश्वरः।
नारायणस्सुरेशोऽस्तु कर्मणां पूरणाय च।
न्यूनाधिकानां शान्त्यर्थं प्रियतां प्रियतां विभुः॥

ओं कर्मणः पुण्याहं भवन्तो ब्रुवन्तु – पुण्याहं कर्मणोस्तु। कर्मणे स्वस्ति भवन्तो ब्रुवन्तु – स्वस्ति कर्मणोऽस्तु। कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु – कर्म ऋध्यताम्। करकवामपार्श्वे साक्षतमर्घ्यपात्रं विन्यस्य।ओं शान्तिः – अस्तु। पुष्टिः – अस्तु। तुष्टिः – अस्तु। वृद्धिः – अस्तु। अविघ्नम् – अस्तु। आयुष्यम् – अस्तु। आरोग्यम् – अस्तु। ऐश्वर्यम् – अस्तु। शिवंकर्म – अस्तु इति करकजलं कूर्चेन अर्घ्य पात्रे किञ्चित् किञ्चित् निनीय। साधक हस्तात् दर्भान् गृहीत्वा। तान् करकोपरि विन्यस्य। अर्घ्यपात्र जलं करकोदकेन संयोज्य। तेन कलशस्थ पवित्रोदकेन

ओं शतधारं सहस्त्रधारम् अपरिमितधारम् अच्छिद्रम् अनन्तम् अपरिमितम् अरिष्टम् अच्युतम् अक्ष्य्यं परमंपवित्रं भगवान् वासुदेवः पुनातु।

स्थानानि देशानि सहस्त्रबाहुर्वरेण्य नामा विरजांसि नामा।
तेभ्यो नमस्ते मधुसूदनाय तत्राभिमानं सरिरक्षतन्तम्॥

ओं तच्छंयोरावृणीमहे – ओं शान्तिः शान्तिः शान्तिः॥
इति मन्त्रत्रयेण द्रव्याणि आत्मानञ्च प्रोक्षयेत्॥

श्रीः

## <u>भगवत् समाराधन विधिः</u>

अथ समाराधनविधिरुच्यते। आचार्य: ब्राह्मे मुहूर्ते उत्थाय। नित्यकर्मादिकं कृत्वा। आलयं प्रविश्य। पादौ प्रक्षाल्य। आचम्य। पूर्वाचार्य-ध्यान पूर्वकं ध्वजस्तम्भ समीपे साष्टाङ्गं प्रणम्य। जितन्ता स्तोत्र पठनेन आलयं द्विः प्रदक्षिणीकृत्य। द्वाराद्बहिः ताक्ष्र्य चण्डादिभ्यो नमः इति अञ्जलिं कृत्वा। हस्त तालत्रय पूर्वकम् ओं यं वायवे नमः इति मन्त्रेण कवाटमुद्घाट्य।

अ१धिप२। ता१इ। मित्रप२। ताइ। क्षत्रप२। ताइ। स्वःप२ता१इ। धनप२ ताऽइ। इति देवव्रत साम पठन् दक्षिणाङ्घ्रिणा अन्तः प्रविश्य। ओं रं अग्नये नमः इति दीपान्प्रज्वाल्य। ओं नमो भगवते वासुदेवाय उत्तिष्ठ उत्तिष्ठ इति शयनबेरस्य पादयोः पुष्पाणि समर्प्य। शयनात् उत्थाप्य। प्रबुद्धत्वं पठित्वा।

प्रबुद्धत्वं जगन्नाथ प्रबुद्ध परमेश्वर।
प्रबुद्ध पुण्डरीकाक्ष भक्तानामनुकम्पया॥

त्वयि प्रबुद्धे देवेश तवाग्रे परमेश्वर।
लौकिकानि हि यज्ञानि तानि निर्वर्तयाम्यहम्॥
अग्रतः सर्व यज्ञानां त्वं प्रभुर्नामतः सदा।
नापरेषु जगन्नाथ पूजितेषु सुरेषुच॥
मयि यज्ञ समाप्तिस्यात् त्वयि सन्तर्पितेऽनले।
सर्वे देवानलमुखाः सचाग्निस्त्वन्मुखे कृतम्॥
ब्रह्मास्वयं ब्रह्मलोके स्वर्गे स्वर्ग निवासिनः।
सात्विका मानुषे लोके नागाद्याश्च रसातले॥
त्वयिप्रबोधयन्त्ये ते स्वार्थ संसिद्धयेसदा।
त्यज योगमयीं निद्रां कृपां कुरु सनातन॥

<u>विश्वरूप क्रिया</u>

शयन बेर शक्ति मूलबेरे नियोज्य। पूर्वदिनार्पित गन्धमाल्यादीनि परिहृत्य। तानि पुष्पाणि विष्वक्सेनस्य शिरसि समर्प्य। तदनु भगवत् सन्निधौ सशर्कर नवनीत गोक्षीरं निवेद्य। यवनिकापटं व्यापोह्य। गोपृष्ठादीन्प्रदर्श्य। नीराज्य। अर्घ्यादि पूजोपयुक्त पात्राणि परिचारक वरेण शोधयित्वा।
पुण्याहं वाचयित्वा। तज्जलेन ओं सहस्रार हुं फट् इति मन्त्रेण गर्भगेहादि पाकशालान्तं संप्रोक्ष्य। दध्यन्नं निवेदयेत्॥

स्थानशुद्धिं पात्रशुद्धिं बिम्ब शोधनमेवच।
आत्मनः भूतशुद्धिश्च मन्त्रवर्णास्तथा रमे॥

तेषु स्थान शुध्यादीनि परिचारक वरेण वा स्वहस्तेन वा कुर्यात्। तदनु द्वार परिवारार्चनं शिष्येन वा परिचारकेन वा कुर्यात्।

## <u>द्वार परिवारार्चनम्</u>

**गर्भगृह द्वारस्य दक्षिणोत्तर पार्श्वयोः**

ओं च्रों चण्डाय नमः　　ओं प्रीं प्रचण्डाय नमः

**कवाटस्योपरि** - ओं श्रियै नमः　　**अधोभागे** - ओं शान्त्यै नमः

**दक्षिण शाखायां** - ओं सरस्वत्यै नमः　　**दक्षिण कवाटे** - ओं विश्वधृते नमः

**उत्तर शाखायाम्** - ओं रत्यै नमः　　**उत्तर कवाटे** - ओं विश्ववक्त्राय नमः

**कवाटस्य** दशावतारान् स्वस्व विद्यया अभ्यर्च्य

ओं मत्स्याय नमः　　ओं परशुरामाय नमः

ओं कूर्माय नमः　　ओं दशरथरामाय नमः

ओं वराहाय नमः　　ओं बलरामाय नमः

ओं नारसिंह्माय नमः　　ओं कृष्णाय नमः

ओं वामनाय नमः　　ओं कल्किने नमः

**कवाटयोः वेत्रेषु**

ओं वेदेभ्यो नमः　　ओं शास्त्रेभ्यो नमः　　ओं पुराणेभ्यो नमः

**नाराचेषु** - ओम् अमरेभ्यो नमः　　**पट्टिकायाम्** - ओं भूतनाथाय नमः

**कीलेषु** - ओम् ऋषिभ्यो नमः　　**कन्दपट्टिकायाम्** –

ओं विश्वभावनाय नमः

<u>अर्धमण्डप द्वारे</u>

ओं शङ्खोत्तमाङ्गिने नमः　　ओं चक्रोत्तमाङ्गिने नमः

**अर्धमण्डपाग्रदेशे** - ओं गं गरुडाय नमः

**विमाने** – ओं विष्णवे प्रासाद रूपिणे हुं फट् नमः

**विमानस्य प्राच्याम्** – ओं वराहाय नमः

**दक्षिणस्याम्** – ओं नृसिह्माय नमः

**प्रतीच्याम्** – ओं श्रीधराय नमः

**उदीच्याम्** – ओं हयग्रीवाय नमः

**विमान अधिष्ठानस्य अधोभागे आग्नेये** – ओं हस्तिवदनाय नमः

**याम्ये** – ओं पशुपतये नमः

**वारुणे** – ओं विश्वरूपाय नमः

**उत्तरे** – ओं ब्रह्मणे नमः

**ऐशान्याम्** – ओं वसुधायै नमः

**<u>अन्तर्मण्डलाख्य प्रथमावरणे</u>**

**<u>गोपुर पार्श्वयोः</u>**

ओं जयाय नमः ओं विजयाय नमः

**दक्षिण साले** - ओं सूर्याय नमः **उत्तर साले** - ओं चन्द्रमसे नमः

**<u>आवरणे</u>**

**आग्नेये** – ओं कामाय नमः

**दक्षिणे** – ओं ब्रह्मणे सदेवी वाहन परिवाराय नमः

**नैर्ऋते** – ओं गजाननाय नमः

**वारुणे** – ओं षण्मुखाय नमः

**वायव्ये** – ओं दुर्गायै नमः

**उत्तरे** – ओं धनाधिपतये नमः

**ऐशान्ये** – ओम् ईशानाय नमः

तत्रैव – ओं क्षेत्रपालाय नमः

अङ्कणस्य दक्षिणे – ओं सप्तमातृभ्यो नमः

<u>अष्टसु दिक्षु</u>

ओम् इन्द्राय नमः
ओं वरुणाय नमः
ओम् अग्नये नमः
ओं वायवे नमः
ओं यमाय नमः
ओं सोमाय नमः
ओं निर्ऋतये नमः
ओम् ईशानाय नमः

<u>अन्तर्हाराख्य द्वितीयावरणे</u>

पूर्वद्वारे

ओं पद्मधराय नमः
ओं गदाधराय नमः

दक्षिणद्वारे

ओं खड्गधराय नमः
ओं शार्ङ्गधराय नमः

पश्चिमद्वारे

ओं वज्रधराय नमः
ओं मुसलधराय नमः

उत्तरद्वारे

ओं पाशधराय नमः
ओम् अङ्कुशधराय नमः

दक्षिणोत्तर सालयोः

ओं पुरुषाय नमः
ओम् अच्युताय नमः

<u>आवरणे</u>

आग्नेये – ओं हयग्रीवाय नमः
वायव्ये – ओम् अनन्ताय नमः
दक्षिणे – ओं सङ्कर्षणाय नमः
उत्तरे – ओम् अनिरुद्धाय नमः
नैर्ऋते – ओं वराहाय नमः
ऐशान्ये – ओं नृसिह्माय नमः
वारुणे – ओं प्रद्युम्नाय नमः

अङ्कणे पूर्वादि दिक्षु

ओं चक्रधराय नमः
ओं गदाधराय नमः
ओं मुसलधराय नमः
ओं शार्ङ्गधराय नमः
ओं शङ्खधराय नमः
ओं पद्मधराय नमः
ओं खड्गधराय नमः
ओं वज्रधराय नमः

## मध्यान्तर्हाराख्य तृतीयावरणे

**पूर्वद्वारे**

ओं धात्रे नमः
ओं विधात्रे नमः

**दक्षिणद्वारे**

ओं भद्राय नमः
ओं सुभद्राय नमः

**पश्चिमद्वारे**

ओं कृतान्ताय नमः
ओम् असुरविध्वंसिने नमः

**उत्तरद्वारे**

ओं कुबेराक्षाय नमः
ओं कुबेराय नमः

**दक्षिणोत्तर सालयोः**

ओं द्वादशादित्येभ्यो नमः
ओं द्वादशादित्येभ्यो नमः

**अग्नि यम मध्ये** – ओं वसुभ्यो नमः

**यम निर्ऋति मध्ये** – ओं पितृगणेभ्यो नमः

**निर्ऋति वरुण मध्ये** – ओं विश्वेदेवेभ्यो नमः

**वरुण वायु मध्ये** – ओं सप्तमरुद्भ्यो नमः

**वायु सोम मध्ये** – ओं सप्तर्षिभ्यो नमः

**सोम ईशान मध्ये** – ओम् एकादशरुद्रेभ्यो नमः। **तत्रैव** – ओं क्षेत्रपालाय नमः

प्राङ्कणे पूर्वादि दिक्षु

ओं कुमुदाय नमः
ओं कुमुदाक्षाय नमः
ओं पुण्डरीकाय नमः
ओं वामनाय नमः
ओं शङ्कुकर्णाय नमः
ओं सर्वनेत्राय नमः
ओं सुमुखाय नमः
ओं सुप्रतिष्ठाय नमः

मर्यादाख्य तुरीयावरणे

पूर्वद्वारे

ओं दुर्जयाय नमः
ओं प्रबलाय नमः

दक्षिणद्वारे

ओं विश्वभावनाय नमः
ओं पुष्कराक्षाय नमः

पश्चिमद्वारे

ओं सम्भवाय नमः
ओं प्रभवाय नमः

उत्तरद्वारे

ओं सुशोभनाय नमः
ओं सुभद्रकाय नमः

आवरणे

ओं साध्येभ्यो नमः
ओं नवग्रहेभ्यो नमः
ओं अङ्गीरसेभ्यो नमः
ओं अश्विनीभ्यां नमः
ओं लक्ष्मी सरस्वती विघ्नेशेभ्यो नमः
ओं इन्द्रादिभ्यो नमः
ओं ब्रह्मादि वास्तुदेव गणेभ्यो नमः
ओं सप्तविंशति नक्षत्रेभ्यो नमः

अङ्गणे पूर्वादि दिक्षु

ओं उपेन्द्राय नमः

ओं प्राकृताय नमः

ओं पुण्याय नमः
ओं पुष्कराय नमः

ओं विश्वभावनाय नमः

ओं असुरघ्नाय नमः

ओं कृतान्ताय नमः

ओं भूतनाथाय नमः

## महामर्यादाख्य पञ्चमावरणे

**पूर्वद्वारे**

ओं कुमुदाय नमः ओं कुमुदाक्षाय नमः

**दक्षिणद्वारे**

ओं पुण्डरीकाय नमः ओं वामनाय नमः

**पश्चिमद्वारे**

ओं शङ्कुकर्णाय नमः ओं सर्वनेत्राय नमः

**उत्तरद्वारे**

ओं सुमुखाय नमः ओं सुप्रतिष्ठाय नमः

आवरणे पूर्वादि दिक्षु

ओं सिद्ध ऋषि नागेभ्यो नमः ओं सौरभेयी गुह्य गन्धर्वेभ्यो नमः

ओम् असुरेभ्यो नमः ओम् अप्सरेभ्यो नमः

ओं राक्षसेभ्यो नमः ओं प्रजापति मर्त्येभ्यो नमः

ओं यक्ष विद्याधरेभ्यो नमः ओं रोहिण्यै नमः

अङ्कणे पूर्वादि दिक्षु

ओं विश्वेशाय नमः ओं विश्वलोचनाय नमः

ओं विश्वकृते नमः ओं विश्वपादाय नमः

ओं विश्वाय नमः ओं विश्वभुजे नमः

ओं विश्वात्मने नमः ओं विश्वकर्मकृते नमः

इति धूप दीप प्रदान सहितं परिवारान् अभ्यर्चयेत्। ( अधमपक्षम् अर्धमण्डप महामण्डप द्वारपालान् वैनतेयञ्च अभ्यर्चयेत् । नावकाशे समस्त परिवारान् देवस्य पादपीठे ध्यात्वा अभ्यर्च्य ) गर्भगृहद्वारं तिरस्करिण्या समाच्छाद्य।

सर्वालङ्कार संयुक्तः आचार्यः आसनमभ्यर्च्य।

आसनस्य मेरुपृष्ठ ऋषिः। अतलः छन्दः। कूर्मो देवता। आसने विनियोगः।

पृथ्वी त्वया धृतालोकाः देवित्वं विष्णुनाधृता।

त्वञ्च धारय मां देवि पवित्रं कुरुचासनम्॥

ओं श्रीमत् अनन्तासनाय नमः
ओं योगासनाय नमः
ओं कमलासनाय नमः
ओं वीरासनाय नमः
ओं विमलासनाय नमः
ओं कूर्मासनाय नमः

इत्यासनमभ्यर्च्य। त्रिदर्भकृत कूर्चम् आसने निक्षिप्य। तदुपरि उपविश्य। ओम् अस्त्राय फट् इति तर्जन्या अग्निप्राकार मुद्रया दशदिग्बन्धनं कृत्वा। ओं रं नमः पराय इति अग्निप्राकारं ध्यात्वा। ओं सहस्रार हुं फट् इति चक्र मुद्रया आकाशम् आच्छाद्य।

## सङ्कल्पः

ओम् ओम् ओम् इति श्रोत्राचमन पूर्वकं विष्णु गायत्र्या प्राणानायम्य।

ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

श्री भगवदाज्ञया भगवत् कैङ्कर्यम् श्री गोविन्द गोविन्द गोविन्द अस्यश्री भगवतः महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीय परार्धे श्रीश्वेतवराहकल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमेपादे जम्बूद्वीपे भारतवर्षे भरतःखण्डे मेरोःदक्षिणेपार्श्वे दण्डकारण्ये शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्ठि संवत्सराणां मध्ये श्री__________नाम

संवत्सरे ______अयने______ऋतौ______ मासे______पक्षे_____ शुभतिथौ वासरः_____वासर युक्तायां_____नक्षत्र युक्तायां श्रीविष्णु योग श्रीविष्णु करण शुभ योग शुभ करण एवङ्गुण सकल विषेशण विशिष्टायां अस्यां वर्तमानायां____ शुभतिथौ श्री भगवदाज्ञया भगवत् कैङ्कर्यम् अस्य देव देवस्य, भगवतो नारायणस्य, श्रीमतःपुरुषोत्तमस्य, समस्त जगदुदय समृद्धि विधि विलय विधारकारण कर्तृभूत पुण्डरीकाक्षस्य, श्रीमत् त्रैलोख्यनायकस्य, कर्मोत्सव बलिस्नान तीर्थ शयनेति षड्वेर स्वरूपस्य, आदिमध्यान्त रहितस्य, सकल मनुज नयन विशेताङ्गत अभिमत अर्चारूपेण अवतीर्णस्य, परब्रह्मणो वासुदेवस्य, अनन्त गरुड विष्वक्सेन सुदर्शनाद्यपरिमित नित्यसूरि परिवार सेव्यमानस्य, पराङ्कुश परकाल यतिवरादि समस्त भक्तकोटिनमित पाद पद्मस्य, अस्मिन् क्षेत्रे विराजमानस्य, श्री भूमि नीला______नायिका समेत श्री___________ स्वामि सन्निधौ, राज राष्ट्र अभिवृद्ध्यर्थं, लोकक्षेमार्थं, नित्याराधनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। अप उपस्पृष्य।

## अथ भूतशुद्धिः

ऋजुकायत्वा योगमुद्रां योगसम्पुटमुद्रां तत्वमुद्रां सृष्टिमुद्राञ्च च प्रदर्श्य।

ओं यं नमः पराय देहपाप्मानं शोषयामि।

ओं रं नमः पराय दाहयामि।

ओं वं नमः पराय प्लावयामि।

ओं लं नमः पराय स्तम्भयामि। एवं शोषणादिभिः शरीरं शुद्धं भावयेत्।

## संहार न्यासः

पृथिव्यादि पञ्च भूतानां

विधातृ – सिन्धुद्वीप – काश्यप – किष्किन्ध – परब्रह्म ऋषयः।

गायत्री – अतुलः – त्रिष्टुप् – जगती – गायत्री छन्दांसि।

ओं हुं वं रं यं शं बीजानि।

वराह – वरुण – अनल – वायु – अनिरुद्धाः देवताः। तत्व संहारे विनियोगः।

घ्राणोपस्थेन्द्रियान्वितां पृथिवीं गन्धे विलापयामि। इति पादादि जान्वन्तम्।

पायुरसनेन्द्रिययुताः अपः गन्धञ्च रसे विलापयामि। इति जान्वादि गुह्यान्तम्।

दृष्टि चरणेन्द्रियधृतं वह्निं रसञ्च रूपे विलापयामि। इति गुह्यादि नाभ्यन्तम्।

त्वक्करेन्द्रियाश्रितम् वायुं रूपञ्च स्पर्शे विलापयामि। इति नाभ्यादि नासान्तम्।

वाक् श्रुतिधरम् आकाशं स्पर्शञ्च शब्दे विलापयामि। इति नासादि मूर्द्धान्तम् संहरामि।

शब्दं मनसि विलापयामि।

मनः अहङ्कृतौ विलापयामि।

अहङ्कृतिं बुद्धौ विलापयामि।

बुद्धिं प्रकृतौ विलापयामि।

प्रकृतिं जीवे विलापयामि। इति हृत् स्थानं संहार मुद्रया स्पृष्ट्वा। जीवं सुषुम्नया ब्रह्मरन्ध्रच्छेदन पूर्वकं रवि मण्डल द्वारा भगवत् दक्षिण चरणे नियोजयामि। इति कुम्भकेन नाभिकन्दात् नियोज्य। स्व दक्षिण पादाङ्गुष्ठात् उत्थित वह्निना योनिजं देहं दग्ध्वाऽऽप्लावयेत्। पुनः दिव्यदेहं ध्यात्वा। भगवद्धाम पादाङ्गुष्ठात् चन्द्रमण्डल द्वारा ब्रह्मरन्ध्र प्रविष्टं जीवं नाभिकन्दे ध्यायामि।

जीवात् प्रकृतिं सृजामि।

प्रकृतेः बुद्धिं सृजामि।

बुद्धेः अहङ्कृतिं सृजामि।

अहङ्कृतेः मनः सृजामि।

मनसः शब्दं सृजामि।

## सृष्टि न्यासः

आकाशादि पञ्च भूतानां परब्रह्म – किष्किन्ध – काश्यप – सिन्धुद्वीप – विधातृ ऋषयः।

गायत्री – जगती – त्रिष्टुप् – अतुलः – गायत्री छन्दांसि।

ओं षं यं रं वं हुं बीजानि।

अनिरुद्ध – वायु – अनल – वरुण – वराह देवताः। तत्व सृष्ट्यर्थे विनियोगः।

शब्दात् वाक् श्रुतिधरम् आकाशं स्पर्शञ्च सृजामि। इति मूर्द्धादि नासान्तम्।

स्पर्शात् त्वक्करेन्द्रियाश्रितं वायुं रूपञ्च सृजामि। इति नासादि नाभ्यन्तम्।

रूपात् दृष्टि चरणेन्द्रिय धृतं वह्निं रसञ्च सृजामि। इति नाभ्यादि गुह्यान्तम्।

रसात् पायु रसणेन्द्रिययुताः अपः गन्धञ्च सृजामि। इति गुह्यादि जान्वान्तम्।

गन्धात् घ्राणोपस्थेन्द्रियान्वितां पृथिवीं सृजामि। इति जान्वादि पादान्तम्।

सृष्टिमुद्रया स्पृष्ट्वा। त्रिविक्रम पदाम्भोजात् विनिस्सृतामृतेन आत्मानम् अभिषिञ्चामि। स्वदेहं अप्राकृत दिव्य भूतमयं ध्यात्वा। इति भूतशुद्धिं कृत्वा।

## प्रणव न्यासः

ओम् अङ्गुष्ठाभ्यां नमः
ओं तर्जनीभ्यां स्वाहा
ओं मध्यमाभ्यां वषट्
ओम् अनामिकाभ्यां हुं
ओं कनिष्ठिकाभ्यां फट्
ओं नखमुखैः वौषट्

## ध्यानम्

कूर्मादीन् दिव्यलोकान् तदनु मणिमयं मण्डपं तत्र शेषम्
तस्मिन् धर्मादि पीठं तदुपरि कमलं चामरग्राहिणीश्च।
विष्णुं देवीं विभूषायुधगणमुरगं पादुके वैनतेयम्
सेनेशं द्वारपालान् कुमुद मुख गणान् विष्णुभक्तान् प्रपद्ये॥

इति ध्यात्वा

## आत्मशुद्धिः

## श्रीमद्द्वादशाक्षर न्यासः

( स्थिति न्यासः )

अस्य श्रीमद्द्वादशाक्षर महामन्त्रस्य। श्री वासुदेवो भगवान् ऋषिः।
देवी गायत्री छन्दः।
परमात्मा वासुदेवो देवता। अं बीजं। क्रों शक्तिः।
मं कीलकम्। श्वेतादि वर्णः। बुद्धिस्तत्वम्। परमव्योमक्षेत्रम्।
भगवत् समाराधनार्थे जपे विनियोगः।

## अथ कर न्यासः

| दक्षिण करतलमारभ्य कनिष्ठान्तं पर्वसु | वाम करतलमारभ्य कनिष्ठान्तं पर्वसु |
| --- | --- |
| ओं ओं ओं | ओं तें ओं |
| ओं नं ओं | ओं वां ओं |
| ओं मों ओं | ओं सुं ओं |
| ओं भं ओं | ओं दें ओं |
| ओं गं ओं | ओं वां ओं |
| ओं वं ओं | ओं यं ओं |

## अथ देह न्यासः

ओं सुं ओं – अङ्गुष्ठ कनिष्ठिकाभ्यां नाभौ

ओं दें ओं – अङ्गुष्ठं विना सर्वाङ्गुलीभिः मेहने

ओं वां ओं – अङ्गुष्ठं विना सर्वाङ्गुलीभिः जान्वोः

ओं यं ओं – सर्वाङ्गुलीभिः चरणयोः

ओं ओं ओं – मध्यमया मूर्ध्नि मध्ये

ओं नं ओं – अङ्गुष्ठेण शिरसि पूर्व भागे

ओं मों ओं – तर्जन्या शिरसि दक्षिणे

ओं भं ओं – अनामिकया शिरसि पश्चिमे

ओं गं ओं – कनिष्ठिकया शिरसि उत्तरे

ओं वं ओं – तर्जनीमध्यमाभ्यां नेत्रयोः

ओं तें ओं – अङ्गुष्ठ अनामिकाभ्यां मुखे

ओं वां ओं – अङ्गुष्ठ तर्जनीभ्यां हृदये

## अङ्ग न्यासः

ओं ओं ओं ज्ञानाय हृदयाय नमः
ओं नं ओं ऐश्वर्याय शिरसे स्वाहा
ओं मों ओं शक्त्यै शिखायै वषट्
ओं भं ओं बलाय कव्चाय हुं
ओं गं ओं तेजसे नेत्राभ्यां वौषट्
ओं वं ओं वीर्याय अस्त्राय फट्

ओं तें ओं उदराय नमः
ओं वां ओं पृष्ठाभ्यां नमः
ओं सुं ओं बाहुभ्यां नमः
ओं दें ओं ऊरुभ्यां नमः
ओं वां ओं जानुभ्यां नमः
ओं यं ओं पादाभ्यां नमः

## ध्यानम्

चतुर्बाहु मुदाराङ्गं सर्वलक्षण लक्षितम्।
शुद्धस्फटिक वर्णाभम् अयुतेन्दु समप्रभम्॥
चारुहासं सुताम्रोष्ठं कर्णान्तायत लोचनम्।
निर्धूत पद्मरागाभं दन्तच्छवि सुशोभितम्॥
महोरस्कं महाबाहुं प्रसन्नेन्दु निभाननम्।
सुभ्रूललाट सुमुखं घनकुञ्चित मूर्धजम्॥
तटिच्छत सहस्राभं पीत निर्मल वाससम्।
पाणिपाद तलाम्भोजं पुण्डरीकायतेक्षणम्॥
श्रीवत्साङ्गं किरीटादि सर्वाभरण भूषितम्।
पद्म चक्र गदा शङ्ख धारिणं कौस्तुभोरसम्॥
दिव्य गन्धविलिप्ताङ्गं दिव्यमाला विभूषितम्।
शेषाहि भोगे विपुले सुखासीनं चतुर्मुख॥
श्रीभूमि सहितं देवं ललाटे श्वेतमृत्स्नया।
कृतोर्ध्व पुण्ड्रतिलकं मण्डितं चण्ड भानुभिः॥

नियुतैरयुतैश्चन्द्रैः विद्युत्कालाग्नि कोटिभिः।
समवेतैरिवैकत्र तेजः पुञ्जैर्विसर्पिभिः॥
भ्राजमानं दुरालोकं देहमण्डल निर्गतैः।
भासयन्तं जगत्सर्वं ध्यायेत्प्रक्षीण कल्मषः॥
सितं कृष्णञ्च धूम्राभं श्यामं तारानिभं तथा।
स्फटिकाभञ्च शङ्खाभं रक्तं शुक्लञ्च लोहितम्॥
तमोरूपं पीतवर्णं ध्यात्वा मन्त्र द्व्याक्षरम्।

इति ध्यात्वा।

<u>श्रीमदष्टाक्षर न्यासः</u>

( स्थिति न्यासः )

अस्य श्रीमदष्टाक्षर महामन्त्रस्य अन्तर्यामि नारायण ऋषिः।
देवीगायत्री छन्दः। परमात्मा श्रीमन्नारायणो देवता। अं बीजम्।
आयश्शक्तिः। मं कीलकम्। शुक्लादि वर्णः। उदात्तादि स्वरः।
परमव्योमक्षेत्रम्। भगवत्समाराधनार्थे जपे विनियोगः।

| दक्षिण तर्जनीमारभ्य कनिष्ठान्तं पर्वसु | वाम तर्जनीमारभ्य कनिष्ठान्तं पर्वसु |
|---|---|
| ओं ओं ओं | ओं यं ओं |
| ओं नं ओं | ओं णां ओं |
| ओं मों ओं | ओं यं ओं |
| ओं नां ओं | ओं रां ओं |

## अथ देह न्यासः

ओं  रां  ओं - अङ्गुष्ठ कनिष्ठिकाभ्यां नाभौ

ओं  यं  ओं – अङ्गुष्ठं विना सर्वाङ्गुलीभिः मेहने

ओं  णां  ओं - अङ्गुष्ठं विना सर्वाङ्गुलीभिः जान्वोः

ओं  यं  ओं - सर्वाङ्गुलीभिः चरणयोः

ओं  ओं  ओं – मध्यमया मूर्ध्नि मध्ये

ओं  नं  ओं - तर्जनीमध्यमाभ्यां नेत्रयोः

ओं  मों  ओं – अङ्गुष्ठ अनामिकाभ्यां मुखे

ओं  नां  ओं – अङ्गुष्ठ तर्जनीभ्यां हृदये

## अङ्गन्यासः

ओं क्रुद्धोल्काय स्वाहा ज्ञानाय हृदयाय नमः

ओं महोल्काय स्वाहा ऐश्वर्याय शिरसे स्वाहा

ओं वीरोल्काय स्वाहा  शक्त्यै शिखायै वषट्

ओं विद्युल्काय स्वाहा बलाय कवचाय हुम्

ओं तेजोल्काय स्वाहा तेजसे नेत्राभ्यां वौषट्

ओं सहस्रोल्काय स्वाहा वीर्याय अस्त्राय फट्

## ध्यानम्

चतुर्भुजमुदाराङ्गं चक्राद्यायुधसेवितम्।

काळमेघ प्रतीकाशं पद्मपत्रायतेक्षणम्।

पीतांबरधरंसौम्यं प्रसन्नेन्दुनिभाननम्।

चारुहासं सुताम्रोष्ठं रत्नोज्ज्वलित कुण्डलम्।

सुभ्रूललाटमकुटं घनकुञ्चित मूर्धजम्।
ललाटतिलकं सौम्यं दीपवच्छ्वेतमृत्स्नया।
स्फुरत्कटककेयूर हार कौस्तुभ भूषितम्।
स्फुरद्भास्करवर्णाभं शोभितं वनमालया।
प्रद्योदनसहस्राभं भूषणैरपि मण्डितम्।
दिव्यचन्दनलिप्ताङ्गं दिव्यमाला विभूषितम्।
श्रीभूमिभ्यांसुखासीनं स्वर्णसिह्मासनेशुभे।
ध्यात्वैवं देवदेवेशं मन्त्रजापपरोभवेत्।
शुक्लं हिरण्मयं कृष्णं रक्तं कुङ्कुम सन्निभम्।
पद्मकिञ्जल्कसदृशं सर्व वर्णकमष्टकम्॥

इति ध्यात्वा।

## श्रीविष्णु षडक्षर न्यासः

अस्य श्रीविष्णु षडक्षर महा मन्त्रस्य। ब्रह्माऋषिः। देवीगायत्री छन्दः। परमात्मा श्रीमहाविष्णुर्देवता। प्रणवं बीजम्। इं शक्तिः। मं कीलकम्। कुमुदादि वर्णः। उदात्तादि स्वरः। परमव्योम क्षेत्रम्। भगवत्समाराधनार्थे जपे विनियोगः।

## अथ कर न्यासः

ओं ओं ओं अङ्गुष्ठाभ्यां नमः।
ओं नं ओं तर्जनीभ्यां नमः।
ओं मों ओं मध्यामाभ्यां नमः।
ओं विं ओं अनामिकाभ्यां नमः।
ओं ष्णं ओं कनिष्ठिकाभ्यां नमः।
ओं वें ओं करतलकरपृष्ठाभ्यां नमः।

## अथ देह न्यासः

ओं ओं ओं ज्ञानाय हृदयाय नमः। ओं विं ओं बलाय कवचाय हुम्।
ओं नं ओं ऐश्वर्याय शिरसे स्वाहा। ओं ष्णं ओं तेजसे नेत्राभ्यां वौषट्।
ओं मों ओं शक्त्यै शिखायै वषट्। ओं वें ओं वीर्याय अस्त्राय फट्।

## ध्यानम्

विष्णुंशारद चन्द्रकोटि सदृशं शङ्खं रथाङ्गंगदा
अम्भोजं सततं सिताब्जनिलयं कान्तं जगन्मोहनम्।
आबद्धाङ्गत हार कुण्डल महाशोभा स्फुरद्वक्षसम्
श्रीवत्साङ्गमुदार कौस्तुभधरं वन्दे मुनीन्द्रावृतम्॥

इति ध्यात्वा।

ओं किरीट मुद्रायै नमः – शिरसि।

ओं कुण्डल मुद्रायै नमः – कर्णयोः।

ओं वनमाल मुद्रायै नमः – कण्ठे।

ओं श्रीवत्स मुद्रायै नमः – दक्षिणोरसि।

ओं कौस्तुभ मुद्रायै नमः – वामोरसि।

ओं चक्र मुद्रायै नमः – दक्षिणभुजे।

ओं शङ्ख मुद्रायै नमः – वामभुजे।

ओं पद्म मुद्रायै नमः – दक्षिण करे।

ओं गदा मुद्रायै नमः – वाम करे।

ओम् अनन्त मुद्रायै नमः। ओं गरुड मुद्रायै नमः। ओं विष्वक्सेन मुद्रायै नमः
– पादाग्रे।

श्रीवत्सं वनमालाञ्च कौस्तुभं दिव्य लक्षणम्।

बिभ्राणं भावयेत्साक्षात् आत्मानं परमेश्वरम्॥ एवं ध्यात्वा

**अथ मन्त्रशुद्धिः**

ओं यं वायवे नमः मन्त्रबीजानि शोषयामि।

ओं रं अग्नये नमः दाहयामि।

ओं लं पृथिव्यै नमः स्तंभयामि।

ओं वं वरुणाय नमः प्लावयामि।

द्वादशाक्षर, अष्टाक्षर, विष्णुषडक्षरान् अक्षमालया अष्टोत्तरशतंवा अष्टाविंशतिर्वा अष्टौवा पूजाद्यन्ते संपुटितं जपेत्॥

**अथ मानसाराधनं होमञ्च**

सौवर्णस्थालिवर्ये मणिमयखचिते गोघृताक्तान् सुपक्वान्

भक्ष्यान् भोज्यांश्चलेह्यान् अपरिमितमहो चोष्यमन्नं निधाय।

नानाशाकैरुपेतं दधिमधुगुळ क्षीरपानीययुक्तम्

तांबूलंचापि विष्णोः प्रतिदिवसमहो मानसंकल्पयामि॥

हृदब्जे मूलबेरात् भगवन्तं वासुदेवं ध्यात्वा। ओं नमो भगवते वासुदेवाय मन्त्रासनं समर्पयामि। ओम् अर्घ्यं समर्पयामि। पाद्यं समर्पयामि। आचमनीयं समर्पयामि। दिव्य स्नानं समर्पयामि। प्लोतवस्त्रं समर्पयामि। कस्तूरितिलकं समर्पयामि। ब्रह्मसूत्रं समर्पयामि। गन्धं समर्पयामि। सर्वाभरणान् समर्पयामि। पुष्पाक्षतान् समर्पयामि। धूपदीपञ्च समर्पयामि। ओं नमो भगवते वासुदेवाय क्षीरगुळ पायसान्नं निवेदयामि। पानकपानीयं समर्पयामि।

आचमनीयं समर्पयामि। समस्त राजोपचारान् समर्पयामि। नाभिचक्रमध्ये त्रिकोणकुण्डे चिदग्निं ध्यात्वा। तन्मध्ये ओं नमो भगवते वासुदेवाय आगच्छागच्छ इति हृदयकमलात् भगवन्तं वासुदेवम् आवाह्य। परिषिच्य। ओं नमो नारायणाय स्वाहा इति होमं हुत्वा। परिषिच्य। पुनः नियोज्य। आचार्यः हस्ते तुलसी जलम् आदाय।

भगवन् पुण्डरीक्ष शरणागत वत्सल।
गृहाण मानसीं पूजां यथार्थ परिभाविताम्॥

इति तुलसीजलं भूमौ निक्षिप्य।

## अथ बाह्याराधन विधिः

देवस्य दक्षिणे पार्श्वे शुद्धांबुपूरितां गलन्तिकां निवेश्य। वामपार्श्वे पूजोपकरणानि निक्षिप्य। घण्टाधिदैवताय ओं कं ब्रह्मणे नमः।
मुकुले – ओं चक्राय नमः। सूत्रेषु – ओं महानागेभ्यो नमः।
जिह्वायाम् – ओं सरस्वत्यै नमः। नादे – ओं प्रजापतये नमः
इत्यावाह्याभ्यर्च्य। घण्टां चालयेत्। धूप पात्राधिदैवताय ओं पावकाय नमः। दीप पात्राधिदैवताय ओं भास्कराय नमः। वर्धिन्यादि अर्चनपात्राधिदैवताय ओं वं वरुणाय नमः इत्यभ्यर्च्य। विष्णु गायत्र्या सर्वाणि द्रव्याणि प्रक्षाल्य।
( शुचीवो हव्या इति मन्त्रं पठित्वा ।
शुचीवो हव्या मरुतश्शुचीनाम्। शुचिꣳहिनोम्यध्वरꣳशुचिभ्यः।
ऋतेनसत्यमृतसापआयन्। शुचिजन्मानश्शुचयःपावकाः। )
देवस्य आत्मनो वा अग्रे त्रिपादुकां विन्यस्य। तस्यां त्रिपादुकाधिदैवताय

ओं त्रेताग्नये नमः। ओं रं बालाग्नये नमः। ओं रं यौवनाग्नये नमः।
ओं रं वृद्धाग्नये नमः इत्यभ्यर्च्य। तदुपरि पात्राधार स्थालिकां विन्यस्य।
तस्यां पात्राधाराधिदैवताय ओं लं पृथिव्यै नमः इत्यभ्यर्च्य। तदुपरि
आग्नेयादिकोणेषु अर्घ्य – पाद्य – आचमनीय – स्नानीय पात्राणि – मध्ये
शुद्धोदक पात्रञ्च संस्थाप्य। गालितोदकैरापूर्य। प्रणवेन संस्पृष्ट्वा।
अर्घ्यं परिकल्पयामि। पाद्यं परिकल्पयामि। आचमणीयं परिकल्पयामि।
स्नानीयं परिकल्पयामि। शुद्धोदकं परिकल्पयामि। इति तुलसीं निक्षिप्य।
कुशाग्राक्षत पुष्प फल चन्दन तिल सिद्धार्थ यवान् अर्घ्य पात्रे निक्षिप्य।
तिल दूर्वा विष्णुपर्णि श्यामाक पद्माक्षतान् पाद्य पात्रे निक्षिप्य।
एलालवङ्ग कर्पूर जाति तक्कोल चन्दन पुष्पाणि आचमनीय पात्रे निक्षिप्य।
गन्ध सर्वौषधीः रत्न फल बीज कुश तिलाक्षत दधि क्षीर घृत रजनी द्वादश
द्रव्याणि स्नानीय पात्रे निक्षिप्य।
तिलानि तुलसीच शुद्धो दकपात्रे निक्षिप्य।
दक्षिणहस्ते ओं रं द्वादशाराय चक्राय नमः तन्मध्ये ओं हं सूर्याय नमः।
इति ध्यात्वा। दीप्तैः तद्रश्मिभिः द्रव्याणि दग्धानि ध्यात्वा।
वामहस्ते ओं षोडशदलयुताय विकस्वराय श्वेतपद्माय नमः तन्मध्ये
ओं वं षोडशकलायुताय अमृतमयाय चन्द्रमसे नमः। इति ध्यात्वा। तदुत्थैः
अमृताम्बुभिः द्रव्याणि सिक्तानि ध्यात्वा। तानि याग योग्यानि विचिन्त्य।
हस्तयोरुभयोः ओं नमो नारायणायेति देवं नारायणं ध्यात्वा। ताभ्यां द्रव्याणि
सकृत् सकृत् संस्पृश्य।
ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

इति विष्णुगायत्र्या अभिमन्त्र्य। ओं सुं सुरभ्यै नमः इति सुरभिमुद्रया अमृतीकृत्य। अर्घ्य पात्रात् किञ्चिज्जलम् अन्यस्मिन्पात्रे गृहीत्वा। आधार स्थालिकोपरि विन्यस्य।

**अर्घ्य पात्रे** – ओं श्रियै अर्घ्यरूपिण्यै नमः

**पाद्य पात्रे** – ओं गङ्गायै पितृप्रीत्यै पाद्यरूपिण्यै नमः

**आचमनीय पात्रे** – ओं सरस्वत्यै अमृतरूपिण्यै आचमनरूपायै नमः

**स्नानीय पात्रे** – ओं वरुणाय नमः

**शुद्धोदक पात्रे** – ओं शान्त्यै नमः

इत्यावाह्याभ्यर्च्य। पात्रान्तरस्थम् अर्घ्यजलं वामहस्ते निधाय। दक्षिणहस्तेन पिधाय। ओं नमो नारायणायेति सप्तवारं अभिमन्त्र्य। तज्जलेन ओं सहस्रार हुं फट् इति सर्वाणि द्रव्याणि आत्मानञ्च प्रोक्ष्य। धूप दीपं समर्प्य। योगपीठं परिकल्प्य। मूलबेरस्य पादयोः पुष्पाणि समर्प्य।

## योगपीठार्चनम्

अर्चनं योगपीठस्य मन्त्रन्यसनमेव च।
बिम्बेस्थिरे सदाकार्यं पूजारम्भे चतुर्मुख॥

इति वचनात् मूलबेरस्य पादयोः योगपीठार्चनं कुर्यात्।

ओं ह्रीं आधारशक्त्यै नमः

ओं ज्रौं ष्ट्रूं कालपावक कूर्माय नमः

ओम् अं सहस्रफणाधृत चतुरश्र भूमण्डलाय अनन्ताय नमः

ओं भूं भूम्यै नमः

**तदुपरि आग्नेयादि पीठ कोणेषु**

१ ओं धर्माय नमः ३ ओं वैराग्याय नमः

२ ओं ज्ञानाय नमः ४ ओम् ऐश्वर्याय नमः

एतान् योगासनाङ्घ्रिरूपान् पुरुषाकृतीन् चतुर्भुजान् सिह्मवक्रान् अञ्जलिहस्तान् स्थितान् ध्यायामि। पूर्वादि दिक्षु

१ ओम् अधर्माय नमः ३ ओम् अवैराग्याय नमः

२ ओम् अज्ञानायनमः ४ ओम् अनैश्वर्याय नमः

**मध्ये** – ओं सदाशिवाय नमः

एतान् अरुणवर्णान् अञ्जलिहस्तान् पूर्वोक्तरूपान् ध्यायामि

**योगासनाङ्घ्रि अन्तराल प्रागादिषु**

१ ओं ऋग्वेदाय नमः ५ ओं कृतयुगाय नमः

२ ओं यजुर्वेदाय नमः ६ ओं त्रेतायुगाय नमः

३ ओं सामवेदाय नमः ७ ओं द्वापरयुगाय नमः

४ ओम् अथर्ववेदाय नमः ८ ओं कलियुगाय नमः

एतानीषारूपेन ध्यायामि

ओं वैकारिकाहङ्काराय नमः

ओं तैजसिकाहङ्काराय नमः

ओं भौतिकाहङ्काराय नमः

एतान् पाशरूपयुतान् ध्यायामि

ओं सत्वगुणाय नमः ओं रजोगुणाय नमः ओं तमोगुणाय नमः

एतान् गुणरूपेण ध्यायामि

ओं ङं घं गं खं कं तूलिकारूपेभ्यो पृथिव्यप्तेजोवाय्वाकाशेभ्यो नमः

ओं मं आस्तरणरूपाय जीवात्मने नमः

**तदुपरि**

ओं रं अग्निमण्डलाय नमः

ओं वं सोममण्डलाय नमः

ओं हं सूर्यमण्डलाय नमः

**उपरि** – ओं श्वेताय द्वादशदलयुताय विपुलकर्णिकाकेसरयुताय गुणत्रयात्मकाय अव्यक्तपद्माय नमः

ओं भद्रासनाय नमः

इत्यासनान्तस्थ देवताश्च आवाह्य अभ्यर्च्य। पीठस्य दक्षिणे पार्श्वे

ओं ब्रह्मणे नमः ओं विष्णवे नमः ओम् ईश्वराय नमः

**उत्तरे**

ओं सनत्कुमाराय नमः ओं सनकाय नमः ओं सनन्ताय नमः

**पश्चिमे**

ओं दुर्गायै नमः ओं विघ्नेशाय नमः ओं नारदाय नमः

**अग्रे**

ओम् अस्मद्गुरुभ्यो नमः

ओम् अस्मत्परमगुरुभ्यो नमः

ओम् अस्मत्सर्वगुरुभ्यो नमः

इत्यभ्यर्च्य। आत्मनोगुरुञ्च ध्यात्वा। धूप दीपं समर्प्य।

ओं नमो भगवते वासुदेवाय सपर्यासनं समर्पयामि इति देवस्य पादयोः पुष्पाणि समर्प्य।

## मूलबेरार्चनम्

सुरसिद्धादिपूजितं हृदयस्थं हरिम् ओं नमो भगवते वासुदेवाय इति तुलसीं मूलबेरस्य मूर्ध्नि समर्प्य। सुस्थितो भव। अभिमुखो भव। इति प्रार्थ्य। प्रतिमामुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण स्थितिन्यासं कृत्वा। किरीट – कुण्डल – वनमाल – चक्र – शङ्ख – श्रीवत्स – कौस्तुभ – पद्म – गदा – मुसल – खड्ग – शार्ङ्ग – अनन्त – गरुड – विष्वक्सेनमुद्राः प्रदर्श्य। मूलबेरस्य वक्षस्थले योगलक्ष्मीं सम्पूज्य। ओं योगलक्ष्म्यै नमः इत्यभ्यर्च्य। ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट-कमल-वनमाल मुद्राः प्रदर्श्य।

## मूलबेर श्रीदेव्याः पूजनम्

ओं श्रीं श्रियै नमः इति पूर्ववत् हृदयस्थां बिम्बे विचिन्त्य। सुस्थिता भव। अभिमुखी भव। इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य।

| | |
|---|---|
| ओं श्रां हृदयाय नमः | ओं श्रैं कवचाय हुं |
| ओं श्रीं शिरसे स्वाहा | ओं श्रौं नेत्राभ्यां वौषट् |
| ओं श्रूं शिखायै वषट् | ओं श्रः अस्त्राय फट् |

इति षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य।

## मूलबेर भूमिदेव्याः पूजनम्

ओं ह्रीं भूम्यै नमः इति पूर्ववत् हृदयस्थां बिम्बे विचिन्त्य। सुस्थिता भव। अभिमुखी भव। इति प्रार्थ्य। प्रतिमामुद्रां प्रदर्श्य।

| | |
|---|---|
| ओं ह्रां हृदयाय नमः | ओं ह्रैं कवचाय हुं |
| ओं ह्रीं शिरसे स्वाहा | ओं ह्रौं नेत्राभ्यां वौषट् |
| ओं ह्रूं शिखायै वषट् | ओं ह्रः अस्त्राय फट् |

इति षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य।

<u>मन्त्रासनम्</u>

ओं अ२र्चतप्रा१र्चत ना३ऽ२३५रा:५। प्रि२यमे१धाऽ३सो४ ऽ३अ२र्चे३त५। अ२र्चे१न्तु पूऽ२३त्रा४ऽ३का२१उ३त५। पु१रमिद्धाऽ२३। ष्णुवा२ऽ३र्चा्ऽ५ ताऽ६५६।

इति सामपठन् ओं नमो भगवते वासुदेवाय फलम् भवतुमे पुष्पैर्नमः स्वाहा। इति पुष्पाञ्जलिं समर्प्य।

विभो सकललोकेश विष्णो जिष्णो प्रभो हरे।
त्वां भक्त्यापूजयाम्यद्य भोगैरर्घ्यादिभिः क्रमात्॥
दिव्येनार्घ्योपचारेण यथाशक्ति यथाविधि।
अर्चयिष्यामिसमये भगवन्तं जनार्दनम्॥

ओं नमो भगवते वासुदेवाय मन्त्रासनं समर्पयामि। इति प्रार्थ्य।

ओं तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियोयो नः प्रचोदयात्। अर्घ्यं समर्पयामि। इति देवस्य मूर्ध्नि अर्घ्यं अङ्गुष्ठतर्जनीभ्यां समर्प्य।

ओं त्रीणिपदाविचक्रमे विष्णुर्गोपा अदाभ्यः। ततो धर्माणिधारयन्। पाद्यं समर्पयामि। इति देवस्य पादयोः पाद्यं तर्जनीमध्यमाभ्यां द्विवारं समर्प्य।

ओं आपः पुनन्तु पृथिवीं पृथिवी पूतापुनातुमाम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्। आचमनीयं समर्पयामि। इति देवस्य मुखे आचमनीयं त्रिवारं समर्प्य।

ओं विष्णोर्रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रैस्थो विष्णोस्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवेत्वा। इति मन्त्रेण हस्त मुख पाद शाटीं समर्प्य।

मधुक्षीरञ्च दध्याज्यं मधुपर्कमितिस्मृतम्।

एकाङ्गं वा समस्तं वा मधुपर्कन्नलोपयेत्॥

इत्युक्तवत् ओं नमो भगवते वासुदेवाय मधुपर्कं समर्पयामि।

हस्ताभ्यां शिरसापद्भ्यां मनसा च धिया तथा।

अहङ्कारेणचात्मानं निपात्य धरणीतले॥

दासोऽहन्ते जगन्नाथ सपुत्रादि परिग्रहः।

प्रेष्यं प्रसादिकर्तव्ये मां नियुङ्क्ष्वहिते सदा॥

इति देवं साष्टाङ्गं प्रणम्य – विज्ञाप्य। योगासनाब्जपत्रेषु पूर्वादिषु द्वादश दलेषु

| | |
|---|---|
| ओं श्रीवत्सायै नमः | ओम् उत्कर्षिण्यै नमः |
| ओं वनमालायै नमः | ओं प्रज्ञायै नमः |
| ओं योगमायायै नमः | ओं सत्यायै नमः |
| ओं वैष्णव्यै नमः | ओम् ऐशान्यै नमः |
| ओं विमलायै नमः | ओम् अनुकम्पायै नमः |
| ओं सृष्ट्यै नमः | ओं पितामह्यै नमः |

एताः पुष्पाञ्जलिधराः ध्यात्वा। पीठस्य परितः प्रथमावरणे प्रागादिषु

| | |
|---|---|
| ओं व्याप्त्यै नमः | ओं विद्यायै नमः |
| ओं कान्त्यै नमः | ओं जयायै नमः |
| ओं तृप्त्यै नमः | ओं क्षमायै नमः |
| ओं श्रद्धायै नमः | ओं शान्त्यै नमः |

एताः चामरधारिणीः ध्यात्वा। द्वितीयावरणे

ओं शङ्खिने नमः

ओं चक्रिणे नमः

ओं गदिने नमः

ओं खड्गिने नमः

ओं पद्मिने नमः

ओं मुसलिने नमः

ओं शार्ङ्गिणे नमः

ओं वनमालिने नमः

एतान् तत्तत् आयुध धारिणः ध्यात्वा। तृतीयावरणे

ओम् इन्द्राय नमः

ओम् अग्नये नमः

ओं यमाय नमः

ओं निर्ऋतये नमः

ओं वरुणाय नमः

ओं वायवे नमः

ओं सोमाय नमः

ओम् ईशानाय नमः

तृतीयावरणाद्बहिः भगवतः प्रतिमुखे – ओं वैनतेयाय नमः।

ऐशान्ये – ओं विष्वक्सेनाय नमः।

पादुके – ओम् अनन्ताय नमः इत्यभ्यर्च्य। धूप दीपं समर्प्य।

## कर्मार्चादि बिम्बानां पूजनविधिः

कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथापरे।
स्नान तीर्थोभयार्चा च शयनार्चेति षड्विधा॥

इत्युक्तवत् षड्बेर पूजने समस्त बेराणां पादयोः पूर्ववत् योगपीठार्चनं कुर्यात्।
ओं नमो नारायणाय सपर्यासनं समर्पयामि इति पुष्पाणि समर्प्य।
आवाहनपात्रम् अद्भिः प्रक्षाल्य। ओं नमो नारायणायेति अद्भिरापूर्य। तुलसीं निक्षिप्य। वामहस्ते निधाय। दक्षिण हस्तेनपिधाय। ललाटान्तम् उद्धृत्य। ओं नमो नारायणाय आगच्छागच्छ इति चतुर्वारं जप्त्वा। दीपादुत्पन्न प्रदीपमिव मूलबिम्बात् अविकृतं ध्यात्वा। मूलबेरात् आवाह्य। तत्तोयं

कर्मबिम्बस्य मूर्ध्नि तुलस्या कूर्चेनवा समर्प्य। आवाहनादि षण्मुद्राः प्रदर्श्य। प्रतिमामुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तम् अष्टाक्षरेण स्थितिन्यासं कृत्वा। किरीट – कुण्डल – वनमाल – चक्र – शङ्ख – श्रीवत्स – कौस्तुभ – पद्म – गदा – मुसल – खड्ग – शार्ङ्ग – अनन्त – गरुड – विष्वक्सेन मुद्राः प्रदर्श्य। वक्षस्थल योगलक्ष्मीं सम्पूज्य। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य।

## <u>उत्सवबिम्ब श्रीदेव्याः पूजनम्</u>

पूर्ववत् आवाहनपात्रम् अद्भिः पूरयित्वा। ललाटान्तमुद्धृत्य।

अरविन्दासनेदेवी पद्मगर्भ समुद्भवे।
आगच्छावाहने पात्रे गोविन्दगृहमेधिनि॥

शब्दब्रह्म स्वरूपिणीं सर्वशक्तिमयीम् ओं श्रीं श्रियै नमः इति श्रीदेवीमूलबेरात् आवाह्य। ओं श्राम् इत्यादि षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य।

## <u>ध्यानम्</u>

श्रियञ्च दक्षिणेपार्श्वे चिन्तयेत् पद्म संभवाम्।
तप्तहाटकसङ्काशां पद्मपत्रायतेक्षणाम्।
तिसृभिःपरि चूडाभि र्ललाटोपरि शोभिताम्।
सपद्म वामहस्तान्तां कक्ष्या बन्धगनस्तनीम्।
प्रसारितेतरकरां सर्वाभरण भूषिताम्।
प्रसन्नवदनां देवीं भगवत्पादवीक्षणाम्।
त्रिभङ्गीं कोमलां कान्तां सुमुखीं भावयेत्सदा॥ इति ध्यात्वा।

## उत्सवबिम्ब भूमिदेव्याः पूजनम्

पूर्ववत् आवाहनपात्रम् अर्घ्यः पूरयित्वा। ललाटान्तमुद्धृत्य।

शब्दब्रह्म स्वरूपिणीं सर्वशक्तिमयीम्

ओं ह्रीं भूम्यै नमः इति भूमिदेवीमूलबेरात् आवाह्य।

ओं ह्राम् इत्यादि षडङ्गन्यासं कृत्वा। किरीट कमल वनमाल मुद्राः प्रदर्श्य।

### ध्यानम्

वामपार्श्वे महींदेवीं द्विहस्तां श्यामलप्रभाम्।
स्तन बन्धविहीनाङ्गीं सर्वाभरण भूषिताम्।
त्रिभङ्गीं कोमलां कान्तां लक्ष्मीवन्मकुटोज्वलाम्।
वहन्तीं दक्षिणेहस्ते लसत्कल्हारकुण्डलाम्।
प्रसारितेतरकराम् प्रसन्नेन्दु निभाननाम्।
भक्ताभीष्टप्रदां देवीं सुमुखीं भावयेत्सदा॥

इति ध्यात्वा।

एवम् उत्सवार्चा, बल्यर्चा, स्नानार्चा, तीर्थार्चा पर्यन्तं पीठार्चन – आवाहन – अष्टाक्षरन्यास पूर्वकं सम्पूज्य। शयनबेरमात्रं विष्णुषडक्षरेण आवाह्य। षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। सर्वेभ्यः पूर्ववत् अर्घ्यादिभिः अभ्यर्च्य। मधुपर्कं साष्टाङ्ग प्रणामञ्च दत्वा। कर्मकौतुकस्य पादयोः श्रीवत्सादि परिवारार्चनं कुर्यात्। धूप दीपं समर्प्य ( उत्सवबिम्ब श्री भू देव्यौ आवाहन विषये मूलबेरं नास्तिचेत् भगवत् श्रीवत्सात् आवाह्य )।

ओं क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय नमः इति सन्तान गोपालकृष्ण स्वामिनम् आवाह्य। ओं क्लां क्लीं क्लूं क्लैं क्लौं क्लः इति षडङ्गन्यासं कृत्वा।

ओं नमो भगवते महासुदर्शनाय आगच्छ आगच्छ इति सुदर्शनम् आवाह्य।
ओं आचक्रायस्वाहेति षडङ्गन्यासं कृत्वा। अर्घ्यादिभिःअभ्यर्च्य।

## स्नानासनम्

स्नानकालस्त्वयं प्राप्तः तवेच्छा वर्तते यदि।
अभ्यञ्जयित्वा देवेश सुस्नानं कर्तुमर्हसि॥
सपादपीठमपरं शुभं स्नानासनम्महत्।
आसादयाशु स्नानार्थं मदनुग्रहकाम्यया॥

ओं नमो भगवते वासुदेवाय स्नानासनं समर्पयामि। ओं नमो नारायणाय स्नानासनं समर्पयामि इति देवेशं प्रार्थ्य। पादुकाधिदैवताय ओं अनन्ताय नमः। इत्यभ्यर्च्य।

इदंविष्णु र्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपाꣳसुरे।
त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्यः। ततोधर्माणि धारयन्।
इति देवं पादुकारोहणं स्मृत्वा। पाद्य तीर्थेन पादुकाम् अभिषिच्य।
गन्धपुष्पैः अभ्यर्च्य। धूपं समर्प्य।

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उपप्रयन्तु मरुत स्सुदानवः।
इन्द्रप्राशूर्भवासचा। प्रैतुब्रह्मणस्पतिः। इति देवं उत्थितं स्मृत्वा।

भद्रङ्कर्णेभिश्शृणुयामदेवाः । भद्रंपश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः। व्यशेमदेवहितंयदायुः।
इति स्नपनबेरम् स्नानासन वेदिकायां निवेश्य।

पूर्ववत् अर्घ्य – पाद्य – आचमनीयादीन् समर्प्य।

तद्विष्णोः परमम्पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।
तद्विप्रासो विपन्यवो जागृवा ꣳ सस्समिन्धते । विष्णोर्यत्परमम्पदम्।

इति दन्तधावनं समर्पयामि।

ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्।

इति जिह्वानिर्लेपनं समर्पयामि। हस्त प्रक्षालनं समर्पयामि।

शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः।

इति गण्डूषं समर्पयामि।

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो निबर्हय ।

इति मुखमञ्जनं समर्पयामि।

का३ऽया१। नश्चा५ऽ३ इत्रा२ऽ३आ५१भुवा५त् । ऊ१। ती१स२दा११वृध२स्स१। खा।
औ२ऽ३हो१हा२इ। क१याऽ३शचा२इ । ष्३यौ१हो२ऽ३। हि१माऽ२।
वा१ऽ२तोंऽ३५हा२इ॥

इति वामदैव्य साम्ना अभ्यञ्जनं समर्पयामि।

विष्णोर्नुकं वीर्याणि प्रवोचङ्ं यः पार्थिवानि विममे रजांꣳसि
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोररराटमसि
विष्णोः पृष्ठमसि विष्णोश्श्ञप्त्रेस्थो विष्णोस्यूरसि विष्णोर्ध्रुवमसि
वैष्णवमसि विष्णवेत्वा।

इति आमलक स्नानं समर्पयामि।

नतें विष्णोर्जायमानो न जातो देव महिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तम् दाधर्थ प्राचीम् ककुभम् पृथिव्याः।

आपोहिष्ठा मयोभुवस्तान ऊर्जेदधातन। महेरणाय चक्षसे।
योवश्शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः। तस्मा अरङ्गमामवो
यस्यक्षयाय जिन्वथ। आपोजनयथाचनः।

इति च अभिषेचनं कृत्वा।

अतो देवा अवन्तुनो यतोविष्णुर्विचक्रमे। पृथिव्यास्सप्त धामभिः।

इति कनक कङ्कतेन केशशोधनं समर्पयामि।

सङ्कल्प पूर्वकं नवकलश स्नपनं वा स्नानीयतीर्थ स्नपनं वा कुर्यात्।

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह।

इति हरिद्राभिषेचनं समर्पयामि।

हिरण्यवर्णा श्शुचयः पावका यासुजातः कश्यपोयास्विन्द्रः।
अग्निङ्ग्या गर्भन्दधिरे विरूपास्तान आपश्शं स्योना भवन्तु।
या सां राजा वरुणो यातिमध्ये सत्यानृते अवपश्यञ्जनानाम्।
मधुश्चुत श्शुचयो याः पावकास्तान आपश्शं स्योना भवन्तु। इति संक्षाल्य।

गन्धद्वारां दुराधर्षांनित्यपुष्टाङ्करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। इति गन्धाम्बुना अभिषिच्य।

ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्।
इति कुङ्कुमेन अनुलिप्य।

पवमानस्सुवर्जनः। पवित्रेणविचर्षणिः। यःपोतासपुनातुमा।
पुनन्तुमादेवजनाः। पुनन्तु मनवोधिया। पुनन्तुविश्व आयवः।
जातवेदःपवित्रवत्। पवित्रेण पुनाहिमा। शुक्रेणदेवदीद्यत्।
अग्नेक्रत्वाक्रतूं रनूं। यत्तेपवित्रमर्चिषि।

ब्रह्मजज्ञानम्प्रथमम् पुरस्तात् विसीमत स्सुरुचोवेन आवः।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनि मसतश्च विवः।

कयानश्चित्र आभुव दूती सदावृध स्सखा। कया शचिष्ठयावृता।
इति मन्त्रैः समभिषिच्य।

ओं तथ्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि। धियोयो नः प्रचोदयात्।

इति देवं परिषिच्य।

देवदेव सुरास्सिद्धाः तीर्थानि च महर्षयः।
त्वत्सेवार्थं स्थितास्सर्वे स्नानेनैतान् कृतार्थयः।
सर्वमङ्गलसंयुक्ताः वेदवाद्यादिघोषणैः।
सहस्रधारया स्नानं कर्तुं देवः प्रसीद ओम्।

सहस्रधाराधिदैवताय ओं पूर्णचन्द्राय नमः।

शङ्खधाराधिदैवताय ओं जलेशाय नमः।

पद्मधाराधिदैवताय ओं पुष्ट्यै नमः  इत्यभ्यर्च्य।

पुरुषसूक्तेन सहस्रधारया कुम्भाभिषेचनं शङ्ख पद्म धार अभिषेचनञ्च कुर्यात्।

अथवा शङ्ख पद्म धार अभिषेचनमेव कुर्यात्।

अग्निर्मूर्द्धादिवः ककुत्पतिःपृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति।

इति मन्त्रेण प्लोतवस्त्रेन अङ्गाम्बु मार्जनं समर्प्य।

ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

इति धौत निर्मल वस्त्रं समर्प्य।

ओं इति उत्तरीयं समर्प्य।

ओं इति यज्ञोपवीतं समर्प्य।

अर्घ्य – पाद्य – आचमनीयादीन् समर्प्य।

# अलङ्कारासनम्

सम्पन्नंदेव सद्वस्त्र भूषास्त्रक्कन्दनादिकम्।

अलङ्कारासनंभद्रम् अधितिष्ठतृतीयकम्॥

ओं नमो भगवते वासुदेवाय अलङ्कारासनं समर्पयामि।

ओं नमो नारायणाय अलङ्कारासनं समर्पयामि इति सर्वत्र प्रार्थ्य।

पूर्ववत् पादुकारोहणं स्मृत्वा। अर्घ्य – पाद्य – आचमनीयादीन् समर्प्य।

मूर्धानंन्दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम्।

कविं सम्राजमतिथिञ्जनानामासन्ना पात्रं जनयन्त देवाः।

इति आर्द्रान् केशान् अगरुधूपेन शोषयामि ।

इदंविष्णु र्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपांसुरे।

इति दिव्यगन्धं समर्पयामि ।

तद्विष्णोः परमम्पदं सदापश्यन्ति सूरयः। दिवीवचक्षुराततम्।

तद्विप्रासो विपन्यवो जागृवा ं सस्समिन्धते । विष्णोर्यत्परमम्पदम्।

इति दिव्य परिमलपुष्पाणि समर्पयामि।

जितन्ते दक्षिणतोवृषभ एधिहव्यः।

इन्द्रो जयाति नपराजयाता अधिराजोराज सुराजयाति।

इति सर्वाभरणानि समर्पयामि।

इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः।

इति देवस्य पादयोः अक्षतान् समर्पयामि।

ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्।

इति अञ्जनं समर्पयामि।

दर्पणाधिदैवताय ओं महालक्ष्मै नमः इत्यावाह्याभ्यर्च्य। ओं भूर्भुवस्सुवः

इति दर्पणं दर्शयित्वा।

धूपपात्राधिदैवताय ओं पावकाय नमः इत्यभ्यर्च्य। धूप मुद्रां प्रदर्श्य।
जितन्ते दक्षिणतोवृषभ एधिहव्यः।
इन्द्रो जयाति नपराजयाता अधिराजोराज सुराजयाति। धूपं समर्पयामि।

इति देवस्य नासान्तं धूपं समर्प्य।

दीपपात्राधिदैवताय ओं भास्कराय नमः इत्यभ्यर्च्य। दीप मुद्रां प्रदर्श्य।
उद्दीप्यस्वजातवेदोऽ पघ्नन्निर्ऋतिम्ममं। पशूꣳश्च मह्यमावह जीवनञ्च दिशो
दिश। मानो हिꣳसी ज्जातवेदो गामश्वम् पुरुषञ्जगत्।अबिभ्रदग्न आगहि
श्रियामा परिपातय। दीपं समर्पयामि।

इति देवस्य नेत्रान्तं दीपं समर्प्य।

यथाशक्ति छत्र – ध्वज – व्यजन – चामरादि उपचारान् मूलमन्त्रेण समर्प्य।

नक्षत्रदीपाधिदैवताय ओं तारावृतचन्द्रमसे नमः इत्यभ्यर्च्य।

उद्दीप्यस्व जातावेदो ---- परिपातय। इति

( अग्निर्नःपातु कृत्तिकाः। नक्षत्रन्देव मिन्द्रियम्। इदमासांविचक्षणम्।
हविरासञ्जुहोतन। यस्य भान्ति रश्मयोयस्य केतवः। यस्येमा विश्वा भुवनानि
सर्वा। स कृत्तिकाभिरभिसंवसानः। अग्निर्नोदेवस्सुवितेदधातु। इति वा )

नक्षत्रदीपं समर्प्य। मन्त्रपुष्पं पठित्वा।

## मन्त्रपुष्पम्

हरिः ओ(४)म्। अग्निमीळे पुरोहितंय्यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥ हरिः ओम्।

हरिः ओ(४)म्। इषे त्वोर्जे त्वा वायवस्स्थोपायवस्स्थ देवोवस्सविता
प्रार्पयतु श्रेष्ठतमाय कर्मणे। हरिः ओम्।

हरिः ओ(४)म्। अग्न आयाहि वीतये गृणानो हव्यदातये।
निहोता सत्सि बर्हिषि। हरिः ओम्।

हरिः ओ(४)म्। शन्नो देवीरभिष्टय आपो भवन्तु पीतये।
शंय्योरभिस्रवन्तुनः। हरिः ओम्।

हरिः ओ(४)म्। ओमित्यग्रे व्याहरेत्। नम इति पश्चात्।
नारायणायेत्युपरिष्टात्। ओमित्येकाक्षरम्। नम इति द्वे अक्षरे।
नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरम्पदम्।
योहवै नारायणस्याष्टाक्षरम्पदमध्येति। अनपब्रुवस्सर्वमायुरेति।
विन्दतेप्राजापत्यं रायस्पोषङ्गौपत्यम्। ततोमृतत्वमश्नुते ततोमृतत्वमश्नुत इति।

य एवंवेद। इत्युपनिषत्। हरिः ओम् ।

<u>श्रीपाञ्चरात्रम्</u>

वैष्णवं शासनं शुद्धम् अच्छिद्रं पापनाशनम्।

हितार्थं सर्वदेवानाम् आदिदेवेन चोदितम्॥

चतुष्पाद समायुक्तं चतुर्वर्ग फलप्रदम्।

तेन शास्त्र विधानेन समाराधय केशवम्॥

<u>आपस्तम्ब गृह्यसूत्रम्</u>

अथकर्माण्याचाराद्यानि गृह्यन्त उदगयन पूर्वपक्षाहः पुण्याहेषु कार्याणि

यज्ञोपवीतिनाँ प्रदक्षिणम्।

<u>श्रीरामायणम्</u>

तपस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।

नारदं परिपप्रश्न वाल्मीकीर्मुनिपुङ्गवम्॥

इच्छामोहि महाबाहुं रघुवीरंमहाबलम्।

गजेनमहदायान्तं रामंछत्रावृताननम्॥

तं दृष्ट्वा शत्रुहन्तारंमहर्षीणां सुखावहम्।

बभूव हृष्टावैदेहि भर्तारं परिशस्वजे॥

<u>श्रीमद्भागवतम्</u>

तासामाविरभूच्छौरिः स्मयमान मुखाम्बुजः।

पीताम्बरधरस्स्रग्वी साक्षात् मन्मथ मन्मथः॥

हरिवंशः

एष नारायणश्श्रीमान् क्षीरार्णव निकेतनः।

नाग पर्यङ्क मुत्सृज्य ह्यागतो मथुरां पुरीम्॥

पुराणम्

वैकुण्ठेतु परे लोके श्रियासार्धं जगत्पतिः।

आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह॥

श्रीमत् भगवद्गीता

धर्मक्षेत्रे कुरुक्षेत्रे समवेतायुयुत्सवः।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥

श्रीविष्णुपुराणम्

पराशरंमुनिवरं कृतपूर्वाह्णिक क्रियम्।

मैत्रेय परिपप्रश्च प्रणिपद्याऽभिवाद्यच॥

दिव्यप्रबन्धम्

சென்றால் குடையாம் இருந்தால் சிங்காசனமாம்,

நின்றால் மரவடியாம் நீள்கடலுள், –என்றும்

புணையாம் மணிவிளக்காம் பூம்பட்டாம் புல்கும்

அணையாம், திருமாற் கரவு.

स्तोत्ररत्नम्

कदापुनश्शङ्ख रथाङ्गकल्पक

ध्वजारविन्दाङ्कुश वज्रलाञ्छनम्।

त्रिविक्रम त्वच्चरणाम्बुजद्वयं

मदीयमूर्द्धा नमलङ्करिष्यति॥

श्रीभाष्यम्

अखिल भुवन जन्मस्थेम भङ्गादि लीले

विनत विविधभूत व्रात रक्षैकदीक्षे।

श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे

भवतु मम परस्मिन् शेमुशी भक्तिरूपा॥

श्री यतिराज विंशतिः

श्रीमाधवाङ्घ्रिजलजद्वय नित्यसेवा प्रेमाविलाशय पराङ्कुश पादभक्तम्।

कामादिदोषहरमात्मपदाश्रितानाम् रामानुजं यतिपतिं प्रणमामि मूर्ध्ना॥

ओं श्री केशवाय नमः

ओं नारायणाय नमः

ओं माधवाय नमः

ओं गोविन्दाय नमः

ओं विष्णवे नमः

ओं मधुसूदनाय नमः

ओं त्रिविक्रमाय नमः

ओं वामनाय नमः

ओं श्रीधराय नमः

ओं हृषीकेशाय नमः

ओं पद्मनाभाय नमः

ओं दामोदराय नमः

ओं मत्स्याय नमः

ओं कूर्माय नमः

ओं वराहाय नमः

ओं नारसिंह्माय नमः

ओं वामनाय नमः

ओं परशुरामाय नमः

ओं दशरथरामाय नमः

ओं बलरामाय नमः

ओं श्रीकृष्णाय नमः

ओं कल्किने नमः

ओं भक्ताभीष्ट फलप्रद स्वामिने नमः

श्री भूमि नीला___नायिका समेत श्री_____स्वामिने नमः मन्त्रपुष्पं समर्पयामि। इति देवस्य पादयोः तुलसीं समर्प्य।

घटदीपाधिदैवताय ओं श्रीं महालक्ष्मै नमः इत्यावाह्य।

किरीट – कमल – वनमाल मुद्राः प्रदर्श्य। कुम्भमुद्रयासह

ओं सत्वगुणाय नमः

ओं रजोगुणाय नमः

ओं तमोगुणाय नमः इति गुणमन्त्रेण

( ओं हिरण्यपात्रं मधोः पूर्णं ददाति। मधव्योसानीति। एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुस्तेजो दधाति। इति वा ) घटदीपं समर्प्य।

अर्घ्य – पाद्य – आचमनीयादीन् समर्प्य।

## मात्रादानम्

तिलान् वस्त्रं तथा हैमं तांबूलं तण्डुलानपि।
फलानि गव्यमाघारं गाश्च धान्यं यथावसु।
गोग्रासं देशिकायैव दद्याद्देवस्य सन्निधौ ॥

इतिवत् यजमानेन मात्रादानं कृत्वा। ओं इति गृहीत्वा।

## भोज्यासनम्

प्रभूतमेध्यान्यन्नानि भक्ष्य भोज्याननेकशः।
संपन्नानिजगन्नाथ भोज्यासनमुपाश्रय॥

ओं नमो भगवते वासुदेवाय भोज्यासनं समर्पयामि।

ओं नमो नारायणाय भोज्यासनं समर्पयामि। इति सर्वत्र प्रार्थ्य। पूर्ववत् पादुकारोहणं स्मृत्वा। अर्घ्य – पाद्य – आचमनीय – मधुपर्कादीन् समर्प्य।

शीतलोदकसंपूर्णं एलाकर्पूरसंयुतम्।
मन्दोष्णं वासनायुक्तं अर्हणाम्बु इतिस्मृतम्॥

अर्घ्योदकेन ओं इति अर्हणं समर्प्य। देवस्यपुरतः स्थलानि संशोध्य।
सर्वविध भक्ष्यभोज्यानि देवस्य पुरतो विनिवेश्य। अर्घ्य तीर्थेन
ओं वीर्याय अस्त्राय फट् इति प्रोक्ष्य। ओं यं वायवे नमः शोषयामि।
ओं रं अग्नये नमः दाहयामि। ओं वं वरुणाय नमः प्लावयामि
इति शोषणादीनि कृत्वा। ओं सुं सुरभ्यै नमः इति सुरभि मुद्रया अमृतीकृत्य।
तुलसीं निक्षिप्य। ओं बलाय कवचाय हुं इति परिषिच्य। अन्वारब्ध सव्येन
प्रगृहीत अर्घ्य पुष्पेण दक्षिणहस्तेन दर्शित ग्रासमुद्रया सह

ओं देवस्यत्वा सवितुः प्रसवे अश्विनौर्बाहुभ्यां पूष्णो हस्ताभ्याम् प्रतिगृह्णातु॥
ओं नमो भगवते वासुदेवाय क्षीरगुलपायसान्नं गृहाणस्वाहा। इति नववारं
निवेदयेत्। श्री भू मन्त्रेण देव्यौ च निवेद्य। कर्मार्चादि बिम्बानाञ्च एवं कृत्वा।
पानकं समर्पयामि। पानीयं समर्पयामि। तांबूलं निवेदयामि।
आचमनीयं समर्पयामि।
तदनु वीरलक्ष्म्याः सन्निधौ विधिवत् संपूज्य। सर्वेषां परिवाराणां सन्निधीनाम्
अर्घ्य – गन्ध – पुष्प – धूप – दीप – नैवेद्य उपचारैः एव संपूज्य।

## नित्यहोमविधिः

आचार्यः अर्घ्यपात्र – घण्टाक्षत – गन्धपुष्प – बलिबेरेण सह महानसं
प्रविश्य। महानसे बलिबेरं प्राङ्मुखं भद्रपीठे निवेश्य। अग्न्यागारद्वारे
ओं च्रों चण्डाय नमः ओं प्रीं प्रचण्डाय नमः मध्ये ओं क्षं गरुडाय नमः
इत्यभ्यर्च्य। अन्तः प्रविश्य। अग्निकुण्डस्य पश्चिमेभागे प्राङ्मुखमासने
उपविश्य। अग्निं प्रज्वाल्य। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्य

अस्यदेव देवस्य भगवतो वासुदेवस्य। श्रीभूमि नीला ________नायिका समेत श्री__________स्वामि सन्निधौ नित्याराधनाङ्ग होमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। ओं आचक्रायस्वाहेति स्वस्व मन्त्रन्यासं कृत्वा। पात्राणि साधयित्वा। परिस्तृणमभ्यर्च्य।

ओं वासुदेवाय नमः ओं प्रद्युम्नाय नमः
ओं सङ्कर्षणाय नमः ओं अनिरुद्धाय नमः

प्रोक्षणीपात्रमादाय। द्विदर्भ कृत प्रादेश सम्मितं कूर्चं तस्यां निक्षिप्य। त्रिभिर्दर्भैः पवित्रैः आच्छाद्य। अद्भिः आपूर्य। अक्षतैः अभ्यर्च्य। हस्तयोः अङ्गुष्ठानामिकाभ्यां मूलेन पुनराघारं त्रिः उत्पूय। तत्कूर्चेन प्रोक्षणीं होमद्रव्याणि सर्वाणि च प्रोक्ष्य। तेन नामादेशं यथायथं स्पृष्ट्वा। तानि पात्राणि उत्थानानि कृत्वा। पुनः प्रोक्ष्य। तानि प्रोक्षणीजलेन सत्यन्त्वर्तेनपरिषिञ्चामि इति कुण्डस्य प्रादक्षिण्येन स्रावयित्वा। अग्नेरीशान्यां प्रणीता पात्रे ओं कौमोदकी शङ्ख चक्र पद्म धराय वासुदेवाय नमः इत्यभ्यर्च्य।

अग्नेर्दक्षिणतः ब्रह्मकूर्चे

चतुर्मुखंभुजद्वन्द्वं साक्षमाला कमण्डलम् ।
हेमाभं शक्ति सहितं ब्रह्माणन्तु विचिन्तयेत् ॥

ओं कं ब्रह्मणे नमः इत्यभ्यर्च्य।

[विष्णु गायत्र्या चरुस्थालीं प्रक्षाल्य। तण्डुलान् आढकप्रमाणान् ओं आचक्राय स्वाहा इति तस्यां निक्षिप्य। ओं विचक्राय स्वाहा इति शुद्धजलैः संक्षाल्य। ओं सुचक्राय स्वाहा इति संशोध्य। ओं सूर्यचक्राय स्वाहा इति अग्नौ

आरोप्य। ओं ज्वालाचक्राय स्वाहा इति अग्निम् उद्दीप्य। ओं महासुदर्शनचक्राय स्वाहा इति श्रपयित्वा। अग्नेः उत्तरतः संस्थाप्य। ]

आज्यपात्रं आदाय। ओं अं विष्णवे नमः इत्यभ्यर्च्य।

द्रावितं गालितं आज्यम्

ओं आप्या॑यस्व॒ समे॑तुते वि॒स्वत॑स्सोम॒ वृष्णि॑यम्। भवा॒ वाज॑स्य सङ्ग॒थे।
इति मन्त्रेण संसिच्य। अग्नेः उत्तरे पूर्वाग्रान् दर्भान् आस्तीर्य। तेषु अङ्गारान् निरूह्य। तेषु आज्यपात्रं निधाय। द्विदर्भ कृत प्रादेश सम्मितं कूर्चं तस्यां निधाय। त्रिभिर्दर्भैः पवित्रैः आच्छाद्य। दर्भान् आदीप्य दर्शयित्वा। विसृज्य। दर्भाग्रद्वयं प्रच्छिद्य प्रक्षाल्य प्रत्यस्य। दर्भान् आदीप्य श्रीमन्नारायण चरणौ शरणं प्रपद्ये। श्रीमते नारायणाय नमः इति वा मूलेन वा त्रिः पर्यग्नि कृत्वा। विसृज्य। दर्भकाण्ड द्वयेन नीराजनं कृत्वा। आज्यस्थालीम् उदगुद्वास्य। अङ्गारान् अग्निना संयोज्य। आज्यस्थालीं पुरतः कृत्वा। उदगग्राभ्यां पवित्राभ्यां अङ्गुष्ठानामिकाभ्यां मूलेन त्रिः उत्पूय। पवित्र ग्रन्थि विस्रस्य। अपः स्पृष्ट्वा। प्रागग्रम् अग्नौप्रहृत्य। आज्यं सुरभिमुद्रया अमृतीकृत्य। चक्रमुद्रां प्रदर्श्य। दर्भैः आच्छाद्य। अग्नेः अष्टासुदिक्षु इन्द्रादीन् संपूज्य। ओं इन्द्राय नमः-------ओं ईशानाय नमः इत्यभ्यर्च्य। उष्णोदकेन स्रुक्स्रुवौ प्रक्षाल्य। दर्भ पञ्चकृत कूर्चेन स्रुक्स्रुवयोः मूलं मूलेन मध्यं मध्येन अग्रम् अग्रेन अस्त्रमन्त्रेण सम्मार्ज्य। ओं वीर्याय अस्त्राय फट्। स्रुक्स्रुवौ अग्नौ निष्टप्य। अद्भिः संप्रोक्ष्य। आत्मनः उदीच्यां स्रुक्स्रुवौ निधाय। कूर्च ग्रन्थि विसृज्य। तं अग्नौ प्रहृत्य। स्रुवेण आज्यमादाय। होमद्रव्येषु चरूञ्च

ओं आप्यायस्व समेतुते-----सङ्गथे  इति मन्त्रेण संसिच्य। परिधिं संपूज्य। कुण्डस्य पश्चिमे ओं श्रीधराय नमः। दक्षिणे ओं नारसिह्माय नमः। उत्तरे ओं हयग्रीवाय नमः। द्वे आघार समिधौ ओं अग्नये नमः ओं ईशानाय नमः इत्यभ्यर्च्य। ओं विद्युल्काय स्वाहा बलायकवचाय हुं इति परिषिच्य। अग्न्याराधनं कृत्वा। कुण्डमध्ये ओं रं वृद्धाग्नये नमः इत्यभ्यर्च्य।

चतुर्भुजं त्रिनेत्रञ्च एकवक्रं जटाधरम्।
शूलं परशुहस्तञ्च अभयं वरदान्वितम्।
सप्तजिह्वान्वितं शक्तिम् उपवीतोत्तरीयकम्।
मेषासीनं सितं नित्ये शिवं वृद्धाग्नि मारभेत्॥ इति ध्यात्वा

आज्येन सर्वोपचारान् हुत्वा। परिषिच्य। तदनु अग्नि मध्ये भगवदाराधन हवनं करिष्ये इति सङ्कल्प्य। परिषिच्य। ओं ह्रीम् आधारशक्त्यै सवाहा इत्यारभ्य ओं भद्रासनाय स्वाहा इत्यन्तं आज्येन हुत्वा। अग्निमध्यस्थं भगवन्तं ओं नमो भगवते वासुदेवाय सुस्थितो भव अभिमुखो भव इति प्रार्थ्य। प्रतिमामुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण न्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। अर्घ्यादि उपचारान् भगवदाराधनवत् सकृत् सकृत् सर्पिषा हुत्वा। परिषिच्य। तदग्नौ घृत समित् पुष्प फल धान्यादि होमद्रव्येषु एकेन मूलमन्त्रेण हुत्वा। अनन्तरं घृतेन सर्वेभ्यः विष्णुपरिवारेभ्यः स्वाहा इति हुत्वा। परिषिच्य। अस्मिन्नग्नौ समिदन्नाज्य होमं करिष्ये इति सङ्कल्प्य। परिषिच्य। समिद्भिः मूलमन्त्रेण शतवारं वा तदर्धं तदर्धं वा हुत्वा। चरुणा नृसूक्तेन

षोडशाहुतीर्हुत्वा। सर्पिषा मूलमन्त्रेण पूर्वोक्त सङ्ख्यया हुत्वा। परिषिच्य।
कुक्कुटाण्ड प्रमाणेन स्विष्टकृद्धोमं करिष्ये इति सङ्कल्प्य। परिषिच्य।
कुक्कुटाण्ड प्रमाणं घृताप्लुतं चरोः पिण्डं स्रुगावर्ते निक्षिप्य। स समिद्दर्भकुसुमं स्रुवेणाभिघार्य। नासिकाग्रान्तम् उद्धृत्य। ओं नमो भगवते वासुदेवाय स्विष्टकृते स्वाहा इति वा मूलेन वा स्विष्टकृद्धोमं कृत्वा। परिषिच्य।
एतत् कार्यमध्ये सम्भावित मन्त्रलोप तन्त्रलोप क्रियालोप श्रद्धालोप नियमलोप आज्यलोप द्रव्यलोपादि प्रायश्चित्तार्थं न्यूनातिरेक शान्त्यर्थं पञ्चोपनिषन्मन्त्रेण शान्ति होमं करिष्ये इति सङ्कल्प्य। परिषिच्य।
ओं षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा।
ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा।
ओं रां नमः पराय विश्वात्मने प्रद्युम्नाय स्वाहा।
ओं वां नमः पराय निवृत्यात्मने अनिरुद्धाय स्वाहा।
ओं लां नमः पराय सर्वात्मने श्रिमते नारायणाय स्वाहा। इति आज्येन हुत्वा। परिषिच्य। पूर्णाहुतिं करिष्ये इति सङ्कल्प्य। परिषिच्य।
स्रुचम् आज्येन सम्पूर्य। स समिद्दर्भकुसुमं स्रुवेणपिधाय। आनासिकमुद्धृत्य।

इदंविष्णु र्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपाꣳसुरे स्वाहा।
इति वा मूलमन्त्रेण वा पूर्णाहुतिं हुत्वा। स्रुक्स्रुवयोः जलेन सम्पूर्य।
ओं विद्युल्काय स्वाहा बलायकचाय हुं इति वर्मणा परिषिच्य। शेषेण आत्मानं संप्रोक्ष्य।

उपचारापदेशेन कृतानहरहर् मया।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम॥

इति अग्नि मध्यस्थ भगवति क्षमापणं कृत्वा। तदनु आचार्यः गर्भगृहं गत्वा

भक्त्या यदग्नौ विहितं यथाशक्ति यथाविधि।
आराधनं तवैवेदं गृहाण परमेष्वर॥

इति देवस्य पादयोः पुष्पेण होमफलं समर्प्य। देवम् अर्घ्यादिभिः सम्पूजयेत्॥

## नित्योत्सवाख्य बलिदान विधिः

अग्निपूजानन्तरं नित्योत्सवाख्य बलिदानं कृत्वा। त्रिसन्ध्यां वा द्विकालं एककालं वा बलिदानं कुर्यात्। एककाल हीनः मध्यमः। कालद्वय हीनः अधमः। कालत्रय हीनः क्षुद्रः। एवं ज्ञात्वा। प्रातः काले तण्डुलेन। मध्याह्ने अन्नेन। सायाह्ने पुष्पेण। अथवा त्रिकालं अन्नेन बलिं कृत्वा। सर्वालङ्कार संयुतं गरुडात्मानं परिचारकम् आहूय। बलिपात्रं तन्मूर्ध्नि निक्षिप्य। बलिबेरं शिबिकायाम् आरोप्य। छत्र चामर ध्वज तूर्य वाद्य घोष गीत नृत्त पुरस्सरं स्वस्ति सूक्तादि वेद घोष सहितं गर्भगृह द्वारादि महापीठान्तं बलिं दद्यात्। बलिबेर भ्रमण रहितं चेत्। सुवर्णादि पात्रे बलिद्रव्यम् आदाय। कर्मार्चाग्रे विन्यस्य। तस्मिन् द्वादशदल पद्मं विलिख्य। तस्मिन् मूलबेरात् मूलमन्त्रेणावाह्य। द्वादशदलेषु श्रीवत्सादि परिवारान् विष्ण्वादिमूर्तींश्च प्रागादिक्रमेणावाह्य। वाद्येन सह बलिं कारयेत्।

गर्भगृह द्वारे

ओं च्रों चण्डाय नमः
ओं प्रीं प्रचण्डाय नमः

अर्धमण्डप द्वारे

ओं शङ्खोत्तमाङ्गिने नमः ओं चक्रोत्तमाङ्गिने नमः

अर्धमण्डपाग्रदेशे – ओं गं गरुडाय नमः

<u>अन्तर्मण्डलाख्य प्रथमावरणे</u>

गोपुर पार्श्वयोः

ओं जयाय नमः ओं विजयाय नमः

दक्षिणोत्तर सालयोः

ओं सूर्याय नमः ओं चन्द्रमसे नमः

आवरणे – आग्नेये – ओं कामाय नमः ------- ऐशान्ये – ओं ईशानाय नमः

तत्रैव – ओं क्षेत्रपालाय नमः

तत्रैव – ओं विष्वक्सेनाय नम

अङ्गणस्य दक्षिणे – ओं सप्तमातृभ्यो नमः

अष्टासु दिक्षु – ओं इन्द्राय नमः-------- ओं ईशानाय नमः

<u>अन्तर्हाराख्य द्वितीयावरणे</u>

पूर्वद्वारे

ओं पद्मधराय नमः ओं गदाधराय नमः

दक्षिणद्वारे

ओं खड्गधराय नमः ओं शार्ङ्गधराय नमः

पश्चिमद्वारे

ओं वज्रधराय नमः ओं मुसलधराय नमः

उत्तरद्वारे

ओं पाशधराय नमः ओं अङ्कुशधराय नमः

दक्षिणोत्तर सालयोः

ओं पुरुषाय नमः		ओं अच्युताय नमः

आवरणे

आग्नेये – ओं हयग्रीवाय नमः ----- ऐशान्ये – ओं नृसिह्माय नमः

अङ्गणे पूर्वादि दिक्षु

ओं चक्रधराय नमः -------------- ओं वज्रधराय नमः

## मध्यान्तर्हाराख्य तृतीयावरणे

पूर्वद्वारे

ओं धात्रे नमः		ओं विधात्रे नमः

दक्षिणद्वारे

ओं भद्राय नमः		ओं सुभद्राय नमः

पश्चिमद्वारे

ओं कृतान्ताय नमः		ओं असुरविध्वंसिने नमः

उत्तरद्वारे

ओं कुबेराक्षाय नमः		ओं कुबेराय नमः

दक्षिणोत्तर सालयोः

ओं द्वादशादित्येभ्यो नमः		ओं द्वादशादित्येभ्यो नमः

अग्नि यम मध्ये – ओं वसुभ्यो नमः ---------------

सोम ईशान मध्ये – ओं एकादशरुद्रेभ्यो नमः

तत्रैव – ओं क्षेत्रपालाय नमः

प्राङ्गणे पूर्वादि दिक्षु – ओं कुमुदाय नमः ---------------- ओं सुप्रतिष्ठाय नमः

## मर्यादाख्य तुरीयावरणे

पूर्वद्वारे

ओं दुर्जयाय नमः ओं प्रबलाय नमः

दक्षिणद्वारे

ओं विश्वभावनाय नमः ओं पुष्कराक्षाय नमः

पश्चिमद्वारे

ओं संभवाय नमः ओं प्रभवाय नमः

उत्तरद्वारे

ओं सुशोभनाय नमः ओं सुभद्रकाय नमः

आवरणे – ओं साध्येभ्यो नमः --------------- ओं सप्तविंशति नक्षत्रेभ्यो नमः

अङ्गणे पूर्वादि दिक्षु – ओं उपेन्द्राय नमः --------------- ओं भूतनाथाय नमः

## महामर्यादाख्य पञ्चमावरणे

पूर्वद्वारे

ओं कुमुदाय नमः ओं कुमुदाक्षाय नमः

दक्षिणद्वारे

ओं पुण्डरीकाय नमः ओं वामनाय नमः

पश्चिमद्वारे

ओं शङ्कुकर्णाय नमः ओं सर्वनेत्राय नमः

उत्तरद्वारे

ओं सुमुखाय नमः ओं सुप्रतिष्ठाय नमः

आवरणे पूर्वादि दिक्षु

ओं सिद्ध ऋषि नागेभ्यो नमः -------------- ओं रोहिण्यै नमः

अङ्गणे पूर्वादि दिक्षु – ओं विश्वेशाय नमः ------------- ओं विश्वकर्मकृते नमः

इति प्रथमावरणादि पञ्चमावरणान्तं समस्त परिवाराणां बलिं दद्यात् ।
( एकावरणविषये – चण्ड प्रचण्डौ, शङ्खचक्रोत्तमाङ्गिनौ, सूर्यचन्द्रमसौ, जयविजयौ च , आग्नेयादीशानान्तम् ओं कामाय इत्यादि ओं ईशानाय इत्यन्तं गरुड विष्वक्सेनौ च बलिं दत्वा। महापीठे निरवशिष्टं बलिंसमर्प्य ) सर्वावरणेषु देवस्य अष्टमङ्गलानि दर्शयित्वा। पृथुक तांबूलादीन् निवेद्यमाचरेत्। शङ्खनिनदेन प्राकारद्वाराद्बहिः निर्गत्य। महापीठस्य पुरतः मन्दिराभिमुखं बलिबेरं संस्थाप्य। महापीठस्य सर्वासु दिक्षु प्रक्षाल्य। पिठिका मूर्ध्नि ओं सर्वेभ्योश्रीविष्णुपार्षदेभ्यो नमः इति निरवशेषं बलिं दद्यात्। देवेन सह पीठं प्रदक्षिणीकृत्य। धामान्तः प्रविश्य। मुख मन्डपे विष्टरे बलिबेरं प्राङ्मुखमारोप्य। अर्घ्यादिभिरभ्यर्च्य। उपहारान् समर्प्य। घटदीपं नीराजनञ्च दर्शयित्वा। बलिबेरं गर्भगृहे निवेश्य। प्रणम्य – स्तुत्वा। ( नित्योत्सव विषये बलिबेर भ्रमणरहित बलिप्रदानमात्रंचेत् पञ्चमावरणबल्यनन्तरं बलिद्रव्यपात्रेण सह गर्भगेहं प्रविश्य। बलिद्रव्ये आवाहितं भगवन्तं मूलमन्त्रेण मूले नियोज्य। बलिशेषं किञ्चित् विष्वक्सेनस्य शिरसि निक्षिप्य। परिशिष्टम् अक्षतादिकञ्च महापीठे निक्षिपेत्। ) सर्वेभ्यः नीराज्य। ततः भगवत् समीपे गत्वा पूर्ववत् अक्षमालया द्वादशाक्षरादीन् पूर्वोक्त सङ्ख्या जप्त्वा। वेद इतिहास पुराण दिव्यप्रबन्धादीन् समापनं कुर्यात्॥

पूजान्ते तुलसी तीर्थम् अर्चकः प्रथमं पिबेत्।
अन्यथा विनियुक्तं चेत् सापूजा निष्फला भवेत्॥

इत्युक्तवत् अर्चकः भगवत् प्रतिग्रह तीर्थं स्वयमेव प्रथमं पिबेत्। अनन्तरं सर्वेभ्यो श्रीवैष्णवेभ्यो ब्राह्मणेभ्यो भक्तेभ्यो तीर्थं पादुकाञ्च दद्यात्। गर्भगृहं प्रदक्षिणीकृत्य। स्वगृहं प्रविश्य। विष्णवालय प्रसादेन ( अन्नेन ) स्वार्थदेव आराधनञ्च भगवद्रूप पितृपूजनञ्च कुर्यात्॥

प्रातः – माध्याह्निकः – सायम् इति मुख्य त्रिकालानि भवन्ति। तेषु बलिनित्योत्सवम् अवश्यमाचरेत्। इतर कालेषु होमान्तं संपूज्य। सर्वेषु कालेष्वपि सेनेश गरुड चण्ड प्रचण्डादि समस्त द्वारस्थान् क्रमेण सम्पूजयेत्॥

## <u>सायाह्न पूजा</u>

सायाह्न पूजा समये नित्योत्सवान्तं कृत्वा। तदनन्तरं युग्मानि स्वर्ण नीराजन पात्राण्यादाय। तदग्रे तण्डुल पिष्टं निक्षिप्य। तन्मध्ये महानसात् वर्तिदीपम् उद्दीप्य। देवस्य पुरतः विन्यस्य। ज्ञानादि षडङ्गन्यास पूर्वक भगवन्तम् अभ्यर्च्य। अर्घ्यादिभिः सम्पूज्य। ओं रां नमः पराय विश्वात्मने नमः इति सर्वाणि दीपपात्राणि अर्चयित्वा। प्रति दीपम्

ओं सत्वगुणाय नमः ओं रजोगुणाय नमः ओं तमोगुणाय नमः

इति गुणमन्त्रेण देवस्य आपादतलमस्तकान्तं त्रिवारं नीराज्य। श्री भू देव्योः कर्मार्चादीनाञ्च प्रत्येकं नीराज्य। अनन्तरं सर्वाणि दीपपात्राणि महाबलिपीठे निधाय। अन्यत् सर्वं पूर्ववत् कुर्यात्॥

## अर्धरात्रौ पूजा

अर्धरात्रौ पूजा समये हरेः मन्त्रासन स्नानासनप्रभृति होमान्तं सम्पूज्य। भोज्यासने पायसान्न – मुद्गान्न – माषापूपादीन् निवेद्य। नीराज्य। तदनु कर्मार्चादि तीर्थार्चान्त बिम्बगत शक्ति ओं भगवन् मन्त्रमूर्ते स्वपदम् आसादय आसादय ओं इति मन्त्रेण मूलबेरे नियोज्य। अपराधक्षमापणं कुर्यात्॥

## अपराधक्षमापणम्

पुण्डरीकाक्ष विश्वात्मन् मन्त्रमूर्ते जनार्दन।
गृहाणमत्कृतां पूजां जपान्तां भक्तवत्सल।
नमस्ते निस्तरङ्गाय नमस्ते सर्वसाक्षिणे।
नमस्ते वासुदेवाय नमस्ते परमात्मने।
दुर्मानिनममर्यादं कृतघ्नं पापकारिणम्।
अशुचिं निर्दयं क्रूरं शठं चलितमानसम्।
अविनीतिनिधिं नात्मवेदिनं लोभमन्दिरम्।
परावमानिनं दम्भम् अभक्तं दुर्जनाग्रगम्।
परनिन्दापरं क्षुद्रम् आत्म श्लाघापरं सदा।
पिशुनं कामवशगम् असूया गर्भमन्दिरम्।
नृशंसं वञ्चकं दुष्टम् अपराधसरित्पतिम्।
भवदुग्धाब्धिकल्लोल जालमग्नस्थमप्लवम्।
हतं दीनमनाथं हे शरण्य शरणार्थिनाम्।
त्वत्पादपद्मपोतेन मामुद्धर्तुं त्वमर्हसि।
मय्यनाथे दयासिन्धो बन्धो सर्वजगद्धित।

प्रसीद कमलाकान्त वात्सल्य जलधिःकिल।

मयार्पितप्रणामांस्त्वं गृहाण परमेश्वर॥

उपचारापदेशेन कृतानहरहर् मया।

अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम॥

## शयनासनम्

भगवन् पुण्डीकाक्ष कृपालो पुरुषोत्तम।

आसादय मयादत्तं पर्यङ्कासनमुत्तमम्॥

ओं नमो भगवते वासुदेवाय शयनासनं समर्पयामि।

ओं नमो नारायणाय शयनासनं समर्पयामि।

ओं नमो विष्णवे शयनासनं समर्पयामि।

इति सर्वत्र प्रार्थ्य। सर्वेभ्यः अर्घ्यादिभिरभ्यर्च्य। सशर्कर वासनायुक्तं शुष्कगोक्षीरं – सितखण्डं – तांबूलादींश्च निवेद्य। नीराज्य। क्षौमवस्त्र सहित मृद्वास्तरण सपादगण्डुकानि कार्पास उपधानाणि सहितं पर्यङ्कं कल्पयित्वा। तस्मिन् ओं अं अनन्ताय नमः इति अनन्तमावाह्य। गन्धादिभिरभ्यर्च्य। तस्मिन् शयनबेरं शाययित्वा। वीणा वेणु वाद्याणि वादयित्वा। ओं बलायकवचाय हुं इति शनैः शनैः कवाटबन्धनं कुर्यात्। द्वारे सुदर्शनं ध्यात्वा। प्रादक्षिण्येन स्वगृहं प्रविश्य॥

इति भगवत् समाराधन विधिः सम्पूर्णम्

----------*****----------

श्रीः

## वीरलक्ष्म्याः समाराधन विधिः

अथ परतन्त्रवीरलक्ष्म्याः समाराधन विधिरुच्यते। आचार्यः पूर्ववत् नित्यकर्मादिकं कृत्वा। महालक्ष्म्यालयमासाद्य। द्वाराद्बहिः गरुडं – चण्डीं – प्रचण्डीं ध्यात्वा। हस्ततालत्रय पूर्वकम् ओं यं वायवे नमः इति कवाटमुद्घाट्य। दक्षिणाङ्घ्रिणा अन्तः प्रविश्य। दीपान् प्रज्वाल्य। ओं श्रीं श्रियै नमः इति महालक्ष्मीं साष्टाङ्गं प्रणम्य। पूर्वदिनार्पित गन्धमाल्यादीनि परिहृत्य। ओं श्रीं श्रियै नमः उत्तिष्ठ उत्तिष्ठ इति शयनदेवीं उत्थाप्य। तत् शक्ति मूले नियोज्य। विविधैः स्तोत्रैः स्तुत्वा। स्थलशुद्ध्यादीनि कृत्वा। द्वारपरिवारार्चनं कुर्यात्॥

गर्भगृहद्वारे

ओं चण्ड्यै नमः　　　　ओं प्रचण्ड्यै नमः

अर्धमण्डपद्वारे

ओं बलाकिन्यै नमः　　　　ओं वनमालायै नमः

महामण्डपद्वारे

ओं जयायै नमः　　　　ओं विजयायै नमः

विमाने – ओं महालक्ष्म्यै प्रासादरूपिण्यै हुं फन्नमः

विमानस्य प्रागादिषु

ओं तुष्ट्यै नमः　　　　ओं सावित्र्यै नमः

ओं पुष्ट्यै नमः　　　　ओं वाग्देव्यै नमः

अग्रे – ओं गरुडाय नमः

ऐशान्ये – ओं सुमुख्यै नमः

इति गन्ध – पुष्प – धूपदीपैः अभ्यर्च्य। आसनं कल्पयित्वा। तदुपरि उपविश्य। प्रणायाम पूर्वकं सङ्कल्प्य। श्रीगोविन्द्-----अस्याः देवदेव्याः। जगज्जनन्याः। श्रीवत्स वासिन्याः। पुरुषाकार स्वरूपिण्याः। भगवत्याः। महालक्ष्म्याः।----------नायक्याः सन्निधौ राजराष्ट्राभिवृद्ध्यर्थं लोकक्षेमार्थं नित्याराधनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। पूर्ववत् भूतशुद्धिं कुर्यात॥

## मन्त्रन्यासः

(आत्मशुद्धिः)

अस्य श्री लक्ष्मीषडक्षरमहामन्त्रस्य। भार्गव ऋषि। पङ्क्तिश्छन्दः। श्रीमहालक्ष्मीर्देवता। श्रीमहालक्ष्म्याः समाराधनार्थे जपे विनियोगः।

| कर न्यासः | अङ्गन्यासः |
|---|---|
| ओं श्रां अङ्गुष्ठाभ्यां नमः | ओं श्रां हृदयाय नमः |
| ओं श्रीं तर्जनीभ्यां नमः | ओं श्रीं शिरसे स्वाहा |
| ओं श्रूं मध्यमाभ्यां नमः | ओं श्रूं शिखायै वषट् |
| ओं श्रैं अनामिकाभ्यां नमः | ओं श्रैं कवचाय हुं |
| ओं श्रौं कनिष्ठिकाभ्यां नमः | ओं श्रौं नेत्राभ्यां वौषट् |
| ओं श्रः करतलकर पृष्ठाभ्यां नमः | ओं श्रः अस्त्राय फट |

## ध्यानम्

दुग्धामृतोदधौश्वेतद्वीप रत्ननिकेतने।
कल्पद्रुराजिप्रभद्राकानने विभ्रमाचले।
पद्मासने सुखासीनाम् अष्टलक्ष्म्या समावृताम्।
हिरण्यवर्णां हरिणीं पुण्डरीक-निभेक्षणाम्।

चतुर्भुजां पीवरांसां सर्वाकल्पविभूषिताम्।
उभयोर्हस्तयोःपद्म इतराभ्यां वराभये।
दधतीं पद्मगन्धाङ्गीं महालक्ष्मीं समाश्रये॥

इति ध्यात्वा। लक्ष्मीषडक्षरमन्त्रम् अक्षमालया अष्टोत्तरशतं वा अष्टाविंशतिर्वा अष्टौ वा जप्त्वा।

<u>महालक्ष्म्याः मानसाराधनम्</u>

हृदब्जे परमात्मानं वासुदेवं सनातनम्।
शङ्ख चक्र गदा शार्ङ्ग नन्दकादिभिरुज्ज्वलम्।
प्रभयेव मणिं पूर्णं गाम्भीर्येणेव सागरम्।
प्रभयेव विवस्वन्तं ज्योत्स्नयेव निशाकरम्।
पुरा ध्यात्वा जगन्नाथं प्रसन्नवदनेक्षणम्॥

इति प्रथमं देवेशं ध्यात्वा। तस्य दक्षिणोरसि निवासिनीं महालक्ष्मीं

हिरण्यवर्णां हरिणीं मूलबेरात् समागताम्।
सुखासीनां योगलक्ष्मीं हरेः सर्वाङ्गगां स्मरेत्॥ इति ध्यात्वा

स्वागतं तव पद्माक्षि सन्निधिं भज हृत्कजे।
गृहाण मानसीं पूजां यथार्थपरिभाविताम्॥

ओं श्रीं श्रियै नमः मन्त्रासनं समर्पयामि। ओम् अर्घ्यं समर्पयामि ----

नाभिचक्रमध्ये पद्म कुण्डे चिदग्निं ध्यात्वा। तस्मिन् हृदयकमलात्

ओं श्रीं श्रियै नमः इत्यावाह्य। परिषिच्य। ओं श्रीं श्रियै स्वाहा इति हुत्वा।

परिषिच्य। पुनः नियोज्य। समस्तोपचारान् समर्पयामि।

## बाह्याराधनम्

घण्टाधिदैवतायै – ओं सरस्वत्यै नमः

धूपपात्राधिदैवताय – ओं पावकाय नमः

दीपपात्राधिदैवताय – ओं भास्कराय नमः

वर्धिन्यादि अर्चनपात्राधिदैवताय ओं वं वरुणाय नमः इत्यभ्यर्च्य। पूर्ववत् पात्र स्थापनादि पात्र परिकल्पनान्तं कृत्वा। अर्घ्य पात्रे – ओं श्रियै नमः। पाद्य पात्रे – ओं गङ्गायै नमः। आचमनीय पात्रे – ओं सरस्वत्यै नमः। स्नानीय पात्रे – ओं वरुणाय नमः। शुद्धोदक पात्रे – ओं शान्त्यै नमः। इत्यावाह्याभ्यर्च्य। धूपदीपं समर्प्य।

## सपर्यासनम्

ओं श्रीं श्रियै नमः सपर्यासनं समर्पयामि इति सर्वत्र प्राथ्र्य। मूलबेरादि समस्त बेराणां पादयोः योगपीठार्चनं कुर्यात्। ओं ह्रिं आधारशक्त्यै नमः। ओं ज्रौं ष्ट्रूं कालपावक कूर्माय नमः। ओम् अं सहस्रफणाधृत चतुरश्रभूमण्डलाय अनन्ताय नमः। ओं भूं भूम्यै नमः।ओं धर्माय नमः। ओं ज्ञानाय नमः। ओं वैराग्याय नमः। ओम् ऐश्वर्याय नमः। ओम् अव्यक्तपद्माय नमः इत्यभ्यर्च्य। धूपदीपं समर्प्य।

## मूलबेरार्चनम्

पद्मासने सुखासीनां पूर्णचन्द्रायुतप्रभाम्।
मन्दस्मित मुखाम्भोजां पीतवर्णां चतुर्भुजाम्।
भक्तानां मुख्यहस्ताभ्याम् अभीतिवरदायिनीम्।
लीलार्थमन्य हस्ताभ्यां दिव्यपङ्कज धारिणीम्॥

इति ध्यात्वा। मूलबेरे ओं श्रीं श्रियै नमः सुस्थिता भव अभिमुखी भव इति प्रार्थ्य। प्रतिमामुद्रां प्रदर्श्य। ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य। ओं श्रीं श्रियै नमः मन्त्रासनं समर्पयामि इति प्रार्थ्य। पूर्ववत् अर्घ्यादिभिरभ्यर्च्य। हस्त मुख पाद शाटीं समर्प्य। मधुपर्कं साष्टाङ्गप्रणामञ्च कृत्वा। योगासनाब्जपत्रेषु पूर्वादिषु अष्टदलेषु

| | |
|---|---|
| ओं वीरलक्ष्म्यै नमः | ओं धान्यलक्ष्म्यै नमः |
| ओं धनलक्ष्म्यै नमः | ओं धैर्यलक्ष्म्यै नमः |
| ओं सन्तानलक्ष्म्यै नमः | ओं राजलक्ष्म्यै नमः |
| ओं जयलक्ष्म्यै नमः | ओं महालक्ष्म्यै नमः |

इत्यभ्यर्च्य। धूपदीपं समर्प्य।

## श्रियाः कर्मार्चादिबिम्बानां पूजनम्

पूर्ववत् अर्घ्यपात्रात् श्रीमन्त्रेण आवाहनपात्रे जलमादाय। तुलसीं निक्षिप्य। नासिकाग्रान्तमुद्धृत्य।

सर्वलक्षणसम्पन्नां सद्रत्नमकुटोज्ज्वलाम्।
पद्म ताटङ्क विकसत्कर्णद्वय मनोहराम्।
अर्धचन्द्रप्रतीकाश ललाटतिलकोज्ज्वलाम्।
चतुर्भुजां सुन्दराङ्गीं मन्दस्मितमनोहराम्।
पद्मगर्भप्रतीकाशां नानाभूषणभूषिताम्।
हस्ताभ्यामाश्रितवताम् अभीष्टवरदायिनीम्।
अपराभ्यां च हस्ताभ्यां दधानां रक्तपङ्कजे।
पद्मासने सुखासीनां तस्मात् कर्मणि कौतुके॥

ओं श्रीं श्रियै नमः आगच्छ आगच्छ इति मूलबेरादावाह्य। पात्रस्थां कर्मबिंबे विचिन्त्य। तुलसीं कर्मबिम्बस्य मूर्ध्नि समर्प्य। आवाहनादि षण्मुद्राः प्रदर्श्य। आवाहिता भव। स्थापिता भव। सन्निधा(हिता) भव। सन्निरुद्धा भव। साम्मुख्या भव। प्रार्थिता भव। प्रतिमामुद्रां प्रदर्श्य। ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य। मखार्चायाम् – ओं पद्ममालिन्यै नमः। बलिबेरे – ओं कीर्त्यै नमः। स्नपनबेरे – ओं जयायै नमः। तीर्थबिम्बे – ओं मायायै नमः। शयनबिम्बे – ओं श्रियै नमः इति क्रमेणावाह्य। ओं श्रीं श्रियै नमः मन्त्रासनं समर्पयामि इति सर्वत्र प्रार्थ्य। पूर्ववत् अर्घ्यं पाद्यादि परिवारार्चनान्तं सर्वं कृत्वा। धूपदीपं समर्प्य।

## स्नानासनम्

नमामि देवीं लोकानां जननीम् अब्धिसम्भवे।
सर्व लोकेश्वरश्रीश-वल्लभे दुर्लभोपमे।
वासुदेवाङ्गसंस्पर्श-सुखैक-रसभाजिते।
आसादयाशु स्नानार्थं मदनुग्रहकाम्यया॥

ओं श्रीं श्रियै नमः स्नानासनं समर्पयामि इति सर्वत्र प्रार्थ्य। पूर्ववत् पादुकारोहणं स्मृत्वा “ इदं विष्णुः” इति मन्त्रेण पादुकाम् अभिषिच्य। स्नपनदेवीं स्नानासन वेदिकायां निवेश्य। भगवदाराधनवत् दन्तधावनं – जिह्वानिर्लेखनं – हस्त मुख पादशाटीं – गण्डूषं – मुखमञ्जनं – हरिद्रास्नानं – गन्धाभिषेचनं – कुङ्कुमाभिषेचनं – महाभिषेचनं – सहस्रधारास्नपनञ्च

श्रीसूक्तमुच्चरन् सर्वं कृत्वा। प्लोतवस्त्र – अङ्गाम्बुमार्जनं – धौत – निर्मलवस्त्रद्वय समर्पणञ्च तत्तन्मन्त्रेण समर्प्य। अर्घ्यादिभिः अभ्यर्च्य।

## अलङ्कारासनम्

ओं श्रीं श्रियै नमः अलङ्कारासनं समर्पयामि इति सर्वत्र प्रार्थ्य। सर्वेभ्यः अर्घ्यादिभिः अभ्यर्च्य। भगवदाराधनवत् गन्धं – पुष्पं – अक्षतारोपणं – सर्वाभरणम् – अञ्जनं – दर्पणदर्शनञ्च भूसूक्तमुच्चरन् सर्वं कृत्वा। धूप – दीप – नक्षत्रदीपञ्च तत्तन्मन्त्रेण समर्प्य। मन्त्रपुष्पं पठित्वा। घटदीपं समर्प्य। अर्घ्यादिभिः अभ्यर्च्य।

## भोज्यासनम्

ओं श्रीं श्रियै नमः भोज्यासनं समर्पयामि इति सर्वत्र प्रार्थ्य। सर्वेभ्यः अर्घ्यादिभिः अभ्यर्च्य। मधुपर्कं समर्प्य। ओं इति अर्हणं दत्वा। देव्याः पुरतः स्थलानि संशोध्य। तन्मध्ये सर्वविध भक्ष्य भोज्यानि विनिवेश्य। अस्त्राय फट् इति प्रोक्ष्य। शोषणादीनि कृत्वा। ओं सुं सुरभ्यै नमः इति सुरभिमुद्रया अमृतीकृत्य। कवचाय हुं इति परिषिच्य। तुलसीं निक्षिप्य। अन्वारब्ध सव्येन प्रगृहीत अर्घ्यपुष्पेण दक्षिण करेण दर्शित ग्रासमुद्रया सह

ओं देवस्यत्वा सवितुः प्रसवे अश्विनौर्बाहुभ्यां पूष्णो हस्ताभ्याम् प्रतिगृह्णातु॥
ओं श्रीं श्रियै नमः <u>क्षीरगुलपायसान्नं</u> गृहाण स्वाहा इति मूलबेरात् सर्वेभ्यः निवेद्य। पानकपानीयं – ताम्बूलम् – आचमनीयञ्च समर्प्य। हस्तमुख पादशाटीं समर्प्य। नीराज्य। मखार्चया सह पचनालयं प्रविश्य। पूर्ववत् अग्न्याराधनं कुर्यात्। ओं श्रीं श्रियै स्वाहा इति समिधा शतवारं तदर्धं तदर्धं वा

हुत्वा। पुरुषसूक्तेन चरुणा षोडशाहुतीर्हुत्वा। सर्पिषा श्री मन्त्रेण पूर्वोक्त सङ्ख्या हुत्वा। स्विष्टकृद्धवनं – प्रायश्चित्तहवनं – पूर्णाहुतीञ्च हुत्वा। सन्निधौ – देव्याः पादयोः होमफलं समर्प्य। ततः बलिदेवीं शिबिकायाम् आरोप्य। सर्वविध वाद्य वेद घोषेण सह नित्योत्सवाख्यबलिं कारयेत्।

गर्भगृहद्वारे – ओं चण्ड्यै नमः, ओं प्रचण्ड्यै नमः

अर्धमण्डपद्वारे – ओं विभीषिकायै नमः, ओं वनमालायै नमः

महामण्डपद्वारे – ओं जयायै नमः, ओं विजयायै नमः

महाबलिपीठे – ओं सर्वाभ्यो श्रीमहालक्ष्मिपार्षदाभ्यो नमः इति निरवशिष्टं बलिं दद्यात्। भगवन्नित्योत्सववत् बलिदान – बलिबेरनिवेदन – घटदीप – नीराजनञ्च कुर्यात्। बलिदेवीं गर्भगृहे निवेश्य। पूर्ववत् अक्षमालया श्रीमन्त्रं जप्त्वा। नीराज्य। वेद इतिहास पुराण दिव्यप्रबन्धादीन् समर्पणं कृत्वा। सर्वेभ्यः तीर्थं पादुकाञ्च दत्त्वा। एवं त्रिसन्ध्यां संपूज्य। इतरकालेषु यथाशक्ति होमान्तपूजनं कृत्वा।

## शयनासनम्

अर्धरात्रौ पूजासमये होमान्तं सम्पूज्य। कर्मार्चादिबिम्बगत शक्तिं मूले नियोज्य। ओं श्रीं श्रियै नमः शयनासनं समर्पयामि इति सर्वत्र प्रार्थ्य। भगवत्पर्यङ्कवत् शयनं कल्पयित्वा। पूर्ववत् संपूज्य। तस्यां शयनदेवीं शाययित्वा। मङ्गलवाद्यानि वादयित्वा। कवचमन्त्रेण शनैः शनैः कवाटबन्धनं कुर्यात्। द्वारे सुदर्शनात्मिकां विजयां ध्यात्वा। प्रादक्षिण्येन स्वगृहं प्रविशेत्॥

परतन्त्र वीरलक्ष्म्याराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीगरुडार्चनम्

तार्क्ष्य सन्निधौ समासाद्य। दीपान् उद्दीप्य। सर्वोपकरणान् सम्पाद्य। पूर्ववत् पात्रपरिकल्पनं कुर्यात्। मूल – उत्सव बेरयोः योगपीठार्चनं कुर्यात्।

ओं ह्रीं आधारशक्त्यै नमः ------ ओम् ऐश्वर्याय नमः।

ओम् अव्यक्तपद्माय नमः। इत्यभ्यर्च्य। धूपं समर्प्य। स्वानन्दधामनिष्ठस्य चतुरात्मनोदेवस्य सङ्कर्षणांशात् गरुडमवतार्य "ओं पक्षि स्वाहा" इति गरुड मूलबेरे समभ्यर्च्य। सुस्थितो भव। अभिमुखो भव इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। ओं क्षां क्षीं क्षूं क्षैं क्षौं क्षः इति षडङ्गन्यासं कृत्वा। किरीट – कुण्डल – वनमाल – चक्र – शङ्ख – पद्म – गदा – गरुड मुद्राः प्रदर्श्य। अर्घ्यादिभिः अभ्यर्च्य। गरुड उत्सवबिम्बस्य आधारादीन् अभ्यर्च्य पूर्ववत् मूलबेरात् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। गरुड मूलमन्त्रेण अर्घ्यादिभिरभ्यर्च्य। गन्ध – पुष्प – धूप – दीपञ्च तत्तन्मन्त्रेण समर्प्य। भगवन्निवेदितान्नं निवेद्य। नीराजनं कुर्यात्॥

श्रीगरुडार्चनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीविष्वक्सेनार्चनम्

विष्वक्सेन सन्निधौ दीपान् उद्दीप्य। सर्वोपकरणान् पूर्ववत् सम्पाद्य। पात्रपरिकल्पनं कुर्यात्। मूल उत्सव बेरयोः योगपीठार्चनं कुर्यात्।

ओं ह्रीं आधारशक्त्यै नमः --------------- ओम् ऐश्वर्याय नमः।

ओम् अव्यक्तपद्माय नमः। इत्यभ्यर्च्य। धूपं समर्प्य।
कालवैश्वानराख्यमूर्तिरूपं भगवन्तं विष्वक्सेनमवतार्य
ओं वं विष्वक्सेनाय नमः इति विष्वक्सेन मूलबेरे समभ्यर्च्य। सुस्थितो भव। अभिमुखो भव इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। ओं वां वीं वूं वैं वौं वः इति षडङ्गन्यासं कृत्वा । किरीट – कुण्डल – वनमाल – चक्र – शङ्ख – पद्म – गदा – विष्वक्सेन मुद्राः प्रदर्श्य। अर्घ्यादिभिः अभ्यर्च्य। विष्वक्सेन उत्सवबिम्बस्य आधारादीन् अभ्यर्च्य। मूलबेरादावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। विष्वक्सेन मूलमन्त्रेण अर्घ्यादिभिरभ्यर्च्य। गन्ध – पुष्प – धूप – दीपञ्च तत्तन्मन्त्रेण समर्प्य। भगवन्निवेदितान्नं निवेद्य। नीराज्य। तदन्नं वाप्यां निक्षिप्य अथवा विष्वक्सेन भक्तेभ्यः दद्यात् ॥

श्रीविष्वक्सेनार्चनं सम्पूर्णम्

----------*****----------

श्रीः

## <u>श्री सुदर्शनाराधन विधिः</u>

अथ स्वतन्त्र सुदर्शनाराधन विधिरुच्यते। आचार्यः सुदर्शन सन्निधिं समासाद्य। भगवदालयवत् सर्वं कृत्वा। द्वारे चक्रं ध्यात्वा। अन्तः प्रविश्य। दीपान्प्रज्वाल्य। स्थलशुद्ध्यादीनि कृत्वा। महासुदर्शनाराधनं करिष्ये इति सङ्कल्प्य। भूतशुद्धिं कृत्वा। अस्यश्री सुदर्शन षडर्णस्य।
अहिर्बुध्नियो भगवान् ऋषिः। देवीगायत्री छन्दः। श्रीमहासुदर्शनो देवता।
रं बीजं। स्वाहा शक्तिः। श्री महासुदर्शन समाराधनार्थे जपे विनियोगः।

| करन्यासः | देहन्यासः |
|---|---|
| ओं सं अङ्गुष्ठाभ्यां नमः | ओं सं हृदयाय नमः |
| ओं हं तर्जनीभ्यां नमः | ओं हं शिरसे स्वाहा |
| ओं स्त्रां मध्यमाभ्यां नमः | ओं स्त्रां शिखायै वषट् |
| ओं रं अनामिकाभ्यां नमः | ओं रं कवचाय हुं |
| ओं हुं कनिष्ठिकाभ्यां नमः | ओं हुं नेत्रत्रयाय वौषट् |
| ओं फट् करतलकरपृष्ठाभ्यां नमः | ओं फट् वीर्याय अस्त्राय फट् |

## ध्यानम्

चक्रमध्यस्थितं श्रीशं जपाकुसुमसन्निभम्।
ज्वालाकेशं चक्रधरं द्विहस्तं कुटिलेक्षणम्।
दंष्ट्रा करालवदनं भयस्यापि भयङ्करम्।
रक्तवर्णाम्बरधरं किरीटादि विभूषितम्।
प्रणतार्तिहरं ध्यायेत् सहस्रार विराजितम्॥ - इति ध्यात्वा

किरीट –चक्र – शङ्ख – वनमाल – गदा – पद्म – खड्ग – मुसल – शार्ङ्ग – अनन्त – गरुड – विष्वक्सेन मुद्राः तत्तदङ्गेषु न्यस्य। सहस्रार हुं फट् इति वा ओं सुदर्शनाय स्वाहा इति वा जप्त्वा। मानसाराधनं कृत्वा। पूर्ववत् पात्र परिकल्पनादिकं कृत्वा। मूलबेरस्य पादयोः आधारादीन् अभ्यर्च्य। धूपं समर्प्य। मूलमूर्तिं ध्यात्वा।

महाचक्रं सहस्रारमयुतादित्यवर्चसम्।
ध्यात्वा तत्कर्णिकामध्ये देवं कुङ्कुमसन्निभम्।
ललाटनयनोद्गीर्ण ज्वालाज्वलितदिङ्मुखम्।
दंष्ट्रानिष्ठ्यूत संरावाद्भीतराक्षस दानवम्।

रक्तचन्दन लिप्ताङ्गं रक्त भूषाम्बरावृतं।

श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम्।

महौजसं महाकायमष्टभिश्शोभितं भुजैः।

पाशाङ्कुशौच मुसलं चक्रमत्युग्र तेजसम्।

शङ्खं कौमोदकीं चापं शरं चन्द्रार्ध सन्निभम्।

दधानमतुलं वीरं सङ्कर्षण समुद्भवम्॥ - इति ध्यात्वा

मूलबेरस्य मूर्ध्नि ओं सहस्रार हुं फट् इत्यभ्यर्च्य। सुस्थितो भव। अभिमुखो भव इति प्रार्थ्य। प्रतिमामुद्रां प्रदश्र्य। ओं सं हं स्रां रं हुं फट् इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदश्र्य। अर्घ्यादिभिः तत्तन्मन्त्रेण अभ्यर्च्य। तदनु कर्मार्चा – स्नानार्चा – बल्यर्चा – मखार्चान्तं तत्तत् बिम्बानां पादयोः आधारादीन् सम्पूज्य। धूपं समर्प्य। उत्सवबेरं ध्यात्वा

ततस्त्वावाहने पात्रे षोडशारं रविप्रभम्।

सूर्य चक्रं स्मरेत्तस्मिन् तीक्ष्णदंष्ट्रं त्रिलोचनम्।

रक्तजिह्वं करालास्यं भ्रुकुटीकुटिलेक्षणम्।

उग्रपिङ्गल केशान्तं ज्वाला माला विराजितम्।

रक्ताम्बरधरं रक्तपुष्प मालाभिरुज्ज्वलम्।

ऊर्ध्वज्वालागणालीढ किरीटतट शोभितम्।

अष्टारं चक्रमत्युग्रं मुसलंचाङ्कुशं तथा।

पद्मञ्च दक्षिणे भागे चतुर्भिर्बाहुभिर्द्धृतं।

दोर्भिर्वामैः शङ्ख पाश गदा सेषुधनुर्धरम्।

निजाट्टहास वित्रस्त पिशाचासुरराक्षसम्॥ - इति ध्यात्वा

मूलबेरात् ओं सहस्रार हुं फट् ओं सूर्यचक्राय नमः आगच्छ आगच्छ इति पूर्ववत् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। पूर्ववत् षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। विजयवल्लीं सुदर्शनवल्लीञ्च ओं विजयवल्ल्यै नमः ओं सुदर्शनवल्ल्यै नमः इति तत्तन्नाम्नेनावाह्य। ओं वां, ओं सां इति बीजेन षडङ्गन्यासं कृत्वा। स्नानार्चायां सहस्रार हुं फट् ओं भीमरूपाय नमः। बल्यर्चायां सहस्रार हुं फट् ओं ज्वालाचक्राय नमः। मखार्चायां सहस्रार हुं फट् ओं कालचक्राय नमः। इति तत्तत् बिम्बेषु आवाह्य। सर्वेभ्यः मूलमन्त्रेण अर्घ्यादिभिः अभ्यर्च्य। षडासनयुक्तवत् सम्पूज्य। यथाभागं निवेद्य। नीराज्य। महाबलिपीठे सर्वेभ्यो भूतेभ्यो नमः इति बलिं क्षिप्त्वा॥

परतन्त्रालय सुदर्शन सन्निधौ मूलबेर ध्यानार्चन उत्सवबेरार्चनमेव कुर्यात्। अन्यत् सर्वं त्यजेत्॥

श्री स्वतन्त्र सुदर्शनाराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीराम पृथगालय पूजा विधिः

अथ श्रीराम नित्याराधनविधिरुच्यते। अचार्यः पूर्ववत् नित्यकर्मादिकं कृत्वा। श्रीरामालयं प्रविश्य। भगवदाराधनवत् सर्वं कृत्वा। द्वाराद्बहिः मारुति नलादिभ्यो नमः इत्यञ्जलिं कृत्वा। अन्तः प्रविश्य। दीपान् प्रज्वाल्य। ओं रां रामाय नमः इति रामं साष्टाङ्गं प्रणम्य। प्रबुद्धं ध्यात्वा।

निर्माल्य गन्ध पुष्पादीनि हनुमत् शिरसि समर्प्य। स्थानशुद्ध्यादीनि कृत्वा।

पूजोपकरणान् सम्पाद्य। द्वार परिवारार्चनं कुर्यात्।

गर्भगृहद्वारे

| | |
|---|---|
| ओं नलाय नमः | ओं जाम्बवाय नमः |

प्रथमावरणे प्रागादिषु

| | |
|---|---|
| ओं भरताय नमः | ओं जाम्बवाय नमः |
| ओं सुग्रीवाय नमः | ओं नलाय नमः |
| ओं जानक्यै नमः | ओं लक्ष्मणाय नमः |
| ओं विभीषणाय नमः | ओं शत्रुघ्नाय नमः |

विष्वक्सेन स्थाने - ओं नीलाय नमः

( ओं विष्वक्सेनाय नमः अथवा ओं गुहाय नमः )

द्वितीयावरणे प्रागादिषु

| | |
|---|---|
| ओं वसिष्ठाय नमः | ओं भरद्वाजाय नमः |
| ओं वामदेवाय नमः | ओं कौशिकाय नमः |
| ओं जाबालये नमः | ओं वाल्मीकये नमः |
| ओं गौतमाय नमः | ओं नारदाय नमः |

तृतीयावरणे

ओं इन्द्राय नमः----ओं ईशानाय नमः

अग्रे – ओं हनुमते नमः ( ओं गरुडाय नमः )

इति अर्घ्य – पाद्याचमनीय – गन्ध – पुष्प – धूप – दीप सहितं समभ्यर्च्य।

पूर्ववत् भूतशुद्ध्यादीनि कृत्वा।

आत्मशुद्धिः

( मन्त्रन्यासः )

अस्यश्री राम मन्त्रस्य। शरभ ऋषिः। गायत्री छन्दः। श्रीरामो देवता। श्रीराम समाराधनार्थे जपे विनियोगः

| करन्यासः | देहन्यासः |
|---|---|
| ओं रां अङ्गुष्ठाभ्यां नमः | ओं रां हृदयाय नमः |
| ओं रीं तर्जनीभ्यां नमः | ओं रीं शिरसे स्वाहा |
| ओं रूं मध्यमाभ्यां नमः | ओं रूं शिखायै वषट् |
| ओं रैं अनामिकाभ्यां नमः | ओं रैं कवचाय हुं |
| ओं रौं कनिष्ठिकाभ्यां नमः | ओं रौं नेत्राभ्यां वौषट् |
| ओं रः करतलकरपृष्ठाभ्यां नमः | ओं रः अस्त्राय फट् |

ध्यानम्

वामेभूमिसुता पुरश्चहनुमान् पश्चात्सुमित्रासुतः।
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादि कोणेषु च।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्।
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्॥

इति ध्यात्वा

"ओं नमो भगवते वासुदेवाय चतुर्मूर्तिमयाय अभिरामशरीराय रामाय स्वाहा" इति मन्त्रं अक्षमालया यथाशक्ति जप्त्वा। मानसाराधने श्रीरामं ध्यात्वा। भगवदाराधनवत् बाह्याराधनं कुर्यात्। श्रीराम मूलाबेरादि समस्त बेराणां पादयोः योगपीठार्चनं कृत्वा। मूल बेर रामं

“ओं नमो भगवते वासुदेवाय चतुर्मूर्तिमयाय अभिरामशरीराय रामाय स्वाहा” इत्यभ्यर्च्य। सुस्थितो भव। अभिमुखो भव इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। द्वादशाक्षरेण स्थितिन्यासं ओं रामित्यादि षडङ्गन्यासञ्च कृत्वा। किरीट – कुण्डल – वनमाल – चक्र – शङ्ख – शार्ङ्ग – अनन्त – गरुड – विष्वक्सेन मुद्राः प्रदर्श्य। राम मुद्राञ्च प्रदर्श्य।ओं सीं सीतायै नमः इति सीतामभ्यर्च्य। सुस्थिता भव। अभिमुखी भव इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य।
ओं सामित्यादि षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाल मुद्राः प्रदर्श्य। ओं भं भरताय नमः इति भरतमभ्यर्च्य। ओं भामित्यादि षडङ्गन्यासं कृत्वा। ओं लं लक्ष्मणाय नमः इति लक्ष्मणमभ्यर्च्य। ओं लामित्यादि षडङ्गन्यासं कृत्वा। ओं शं शत्रुघ्नाय नमः इति शत्रुघ्नमभ्यर्च्य। ओं शामित्यादि षडङ्गन्यासं कृत्वा। ओं ह्रीं हरिमर्कट मर्कटाय नमः इति हनूमन्तमभ्यर्च्य। ओं ह्रामित्यादि षडङ्गन्यासं कृत्वा ( पृथगाञ्जनेय सन्निधौ एवमेव न्यस्य )। सर्वेभ्यः किरीट – चक्र – शङ्ख – वनमाल – मुद्राः प्रदर्श्य। मन्त्रासनं समर्पयामीति सर्वत्र प्रार्थ्य। मन्त्रासन उपचारान् तत्तन् मन्त्रेण समर्प्य।

## उत्सवबिम्ब पूजा

श्रीराम उत्सवबिम्बे “ओं ईं चतुर्मूर्तये चतुर्वेदमयाय शरशार्ङ्गभृते शरदिन्दीवरत्विषे भगवते अभिरामशरीराय रामाय नमः” इति मूलबेरादावह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। पूर्ववत् स्थितिन्यासं कृत्वा। ओं रामित्यादि षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। राम मुद्राञ्च प्रदर्श्य। सीताप्रभृति हनूमदन्तं मूलमूर्तिवत् तत्तन् मन्त्रेण आवाहनादिकं कृत्वा। षडङ्गन्यास किरीटादि मुद्राश्च प्रदर्श्य। मन्त्रासन प्रार्थनादि सर्वं कृत्वा।

भगवदाराधनवत् स्नानासन – अलङ्कारासन – मन्त्रपुष्प – भोज्यासन – नित्यहोम – शयनासनयुक्तं सम्पूज्य। नित्य होमे

ओं नमो भगवते वासुदेवाय चतुर्मूर्तिमयाय अभिरामशरीराय रामाय स्वाहा स्वाहा" इति हुत्वा। नित्योत्सवे इन्द्रादीनामेव बलिदानं कुर्यात्। महा बलिपीठे सर्वेभ्यः श्रीराम पार्षदेभ्यो नमः इति निरवशिष्टं बलिं दध्यात्। अन्यत् सर्वं पूर्ववत् कारयेत्॥

श्रीराम पृथगालय आराधनं सम्पूर्णम्

----------*****----------

श्रीः

<u>श्रीकृष्ण पृथगालय पूजा विधिः</u>

अथ श्रीकृष्णाराधन विधिरुच्यते। अचार्यः पूर्ववत् सर्वं कृत्वा। श्रीकृष्णालयं प्रविश्य। भगवदाराधनवत् सर्वं कृत्वा।

ओं क्लीं कृष्णाय गोविन्दाय गोपीजन वल्लभाय नमः इति कृष्णं साष्टाङ्गं प्रणम्य। प्रबुद्धं ध्यात्वा। द्वार परिवारार्चनं भगवदालयवत् चण्ड प्रचण्डादि गरुडान्तं समभ्यर्च्य। आवरणे इन्द्रादीन् अभ्यर्च्य। अस्यदेव देवस्य -------श्री रुक्मणी सत्यभामा समेत श्रीकृष्ण स्वामि सन्निधौ राजराष्ट्राभिवृध्यर्थं लोकक्षेमार्थं नित्याराधनं करिष्ये। तदङ्गं भूतशुध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। पूर्ववत् भूतशुद्धिं कृत्वा।

अस्यश्री कृष्ण मन्त्रस्य। सनक ऋषिः। गायत्रीच्छन्दः।

भगवान् श्रीकृष्णो देवता। श्रीकृष्ण समाराधनार्थे जपे विनियोगः।

| करन्यासः | देहन्यासः |
|---|---|
| ओं क्रां अङ्गुष्ठाभ्यां नमः | ओं क्रां हृदयाय नमः |
| ओं क्रीं तर्जनीभ्यां नमः | ओं क्रीं शिरसे स्वाहा |
| ओं क्रूं मध्यमाभ्यां नमः | ओं क्रूं शिखायै वषट् |
| ओं क्रैं अनामिकाभ्यां नमः | ओं क्रैं कवचाय हुं |
| ओं क्रौं कनिष्ठिकाभ्यां नमः | ओं क्रौं नेत्राभ्यां वौषट् |
| ओं क्रः करतलकरपृष्ठाभ्यां नमः | ओं क्रः अस्त्राय फट् |

### ध्यानम्

कस्तूरि तिलकं ललाटपलके वक्षस्थले कौस्तुभम्।
नासाग्रे वरमौक्तिकं करतले वेणुं करे कङ्कणम्।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठेश मुक्तावलिम्।
गोपस्त्रीपरिवेष्टितो विजयये गोपाल चूडामणिः॥

इति ध्यात्वा

ओं क्रौं कृष्णाय नमः इति मन्त्रं अक्षमालया यथाशक्ति जप्त्वा। मानसाराधने श्रीकृष्णं ध्यात्वा। भगवदाराधनवत् बाह्याराधनं कुर्यात्। समस्त बेराणां पादयोः योगपीठार्चनं कृत्वा। मूलबेरे ओं क्रौं कृष्णाय नमः सुस्थितो भव। अभिमुखो भव इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। द्वादशाक्षरेण स्थितिन्यासं – ओं क्रामित्यादि षडङ्गन्यासञ्च कृत्वा। किरीट – कुण्डल – वनमाल – चक्र – शङ्ख – शार्ङ्ग – अनन्त – गरुड – विष्वक्सेन मुद्राः प्रदर्श्य। कृष्ण मुद्राञ्च प्रदर्श्य। ओं रुं रुक्मिण्यै नमः इति रुक्मिणीम् – ओं सं सत्यभामायै नमः इति सत्यभामाञ्च सम्पूज्य। सुस्थिता भव। अभिमुखी भव इति प्रार्थ्य प्रतिमा मुद्रां प्रदर्श्य। ओं रामित्यादि – सामित्यादि च षडङ्गन्यासं कृत्वा।

किरीट – कमल – वनमाल मुद्राः प्रदर्श्य। मन्त्रासनं समर्पयामीति सर्वत्र प्रार्थ्य। मन्त्रासन उपचारान् तत्तन् मन्त्रेण समर्प्य। उत्सव बिम्ब पूजाकाले ओं क्रौं कृष्णाय नमः अगच्छ आगच्छ इति मूलबेरादावाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। पूर्ववत् अष्टाक्षरेण स्थितिन्यासं कृत्वा। ओं क्रामित्यादि षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। कृष्ण मुद्राञ्च प्रदर्श्य। मूलमूर्तिवत् तत्तन् मन्त्रेण आवाहनादिकं कृत्वा। षडङ्गन्यास – किरीटादि मुद्राश्च प्रदर्श्य। मन्त्रासन प्रार्थनादि सर्वं कृत्वा। भगवदाराधनवत् स्नानासन – अलङ्कारासन – मन्त्रपुष्प – भोज्यासन – नित्यहोम – शयनासनयुक्तं सम्पूज्य। नित्यहोमे ओं क्रौं कृष्णाय नमः स्वाहा इति हुत्वा। नित्योत्सवे इन्द्रादीनामेव बलिदानं कुर्यात्। महा बलिपीठे
सर्वेभ्यः श्रीकृष्ण पार्षदेभ्यो नमः इति निरवशिष्टं बलिं दध्यात्।
अन्यत् सर्वं पूर्ववत् कुर्यात्॥

श्रीकृष्ण आराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्री लक्ष्मीहयग्रीव आराधनम्

अथ लक्ष्मी हयग्रीवाराधन विधिरुच्यते। आचार्यः भगवदाराधनवत् सर्वं कृत्वा। अस्यदेव देवस्य। भगवतो वासुदेवस्य। श्रीलक्ष्मीहयग्रीव स्वामि सन्निधौ। राजराष्ट्राभिवृध्यर्थं। लोकक्षेमार्थं।

नित्याराधनं करिष्ये तदङ्गं भूतशुध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य।

अप उपस्पृश्य। भूतशुद्धिं कृत्वा।

अस्यश्री हयग्रीव महामन्त्रस्य। बृहस्पति ऋषिः। गायत्री छन्दः।

श्रीहयग्रीवो देवता। श्री लक्ष्मीहयग्रीव समाराधनार्थे जपे विनियोगः।

| करन्यासः | देहन्यासः |
|---|---|
| ओं हां अङ्गुष्ठाभ्यां नमः | ओं हां हृदयाय नमः |
| ओं हीं तर्जनीभ्यां नमः | ओं हीं शिरसे स्वाहा |
| ओं हूं मध्यमाभ्यां नमः | ओं हूं शिखायै वषट् |
| ओं हैं अनामिकाभ्यां नमः | ओं हैं कवचाय हुं |
| ओं हौं कनिष्ठिकाभ्यां नमः | ओं हौं नेत्राभ्यां वौषट् |
| ओं हः करतलकरपृष्टाभ्यां नमः | ओं हः अस्त्राय फट् |

ध्यानम्

शङ्खचक्रगदापद्म ज्ञानपुस्तकधारिणम्।
पाशाङ्कुशाग्निवज्रादि खेटकुन्तधरं विभुम्।
श्रीभूनीलाधिपं देवं वनमालाविराजितम्।
हयग्रीवं भजे नित्यं सर्वाभरणभूषितम्॥ - इति ध्यात्वा

मन्त्रशुद्धिं कृत्वा। ओं नमो भगवते हयग्रीवाय इति अक्षमालया यथाशक्ति जप्त्वा। मानसाराधनं कृत्वा।

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम्।
आधारं सर्व विद्यानां हयग्रीवमुपास्महे॥ - इति ध्यात्वा

सर्वोपचारान् समर्प्य। पात्राणि साधयित्वा। हयग्रीव मूलबेरस्य पादयोः आधारादीन् अभ्यर्च्य। ओं नमो भगवते हयग्रीवाय सुस्थितो भव।

अभिमुखो भव। इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण न्यासं कृत्वा। ओं हां हीं हूं हैं हौं हः इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य। ओं श्रीं महालक्ष्म्यै नमः इति महालक्ष्मीं सम्पूज्य। ओं श्राम् इत्यादि षडङ्ग न्यासं कृत्वा। मन्त्रासन उपचारान् कृत्वा। हयग्रीव उत्वसव बेरस्यपादयोः आधारादीन् अभ्यर्च्य। आवाहनं कृत्वा।

शङ्ख चक्र गदा पद्म ज्ञानपुस्तक धारिणम्।
पाशाङ्कुशधरं देवं हयग्रीवमहं भजे॥ - इति ध्यात्वा

ओं हयग्रीवाय नमः आगच्छ आगच्छ इति मूलबेरात् पूर्ववत् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। नाभ्यादि हृदयान्तम् अष्टाक्षरेण न्यासं कृत्वा। ओं हामित्यादि षडङ्ग न्यासं कृत्वा। ओं श्रीं श्रियै नमः इति श्रियम् आवाह्य। ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाला – मुद्राः प्रदर्श्य। पूर्ववत् मन्त्रासन उपचारान् कृत्वा। सर्वेभ्यः भगवदाराधनवत् पूजयिवा। बलिप्रदानानन्तरं

ऋग्यजुस्साम रूपाय वेदाहरणकर्मणे।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः॥
उद्गीथ प्रणवोद्गीथ सर्ववागीश्वरेश्वर।
सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय॥ - इति प्रार्थ्य

श्री हयग्रीव आराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्री भूवराहस्वामि आराधनम्

अथ भूवराहाराधन विधिरुच्यते। आचार्यः भगवदाराधनवत् सर्वं कृत्वा। श्री भूवराहस्वामि सन्निधौ। राजराष्ट्राभिवृध्यर्थं। लोकक्षेमार्थं। नित्याराधनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। भूतशुद्धिं कृत्वा।

अस्यश्री वराह मन्त्रस्य। ब्रह्मा ऋषिः। गायत्री छन्दः। श्रीवराहो देवता। श्री भूवराह समाराधनार्थे जपे विनियोगः।

| करन्यासः | देहन्यासः |
|---|---|
| ओं हां अङ्गुष्ठाभ्यां नमः | ओं हां हृदयाय नमः |
| ओं हीं तर्जनीभ्यां नमः | ओं हीं शिरसे स्वाहा |
| ओं हूं मध्यमाभ्यां नमः | ओं हूं शिखायै वषट् |
| ओं हैं अनामिकाभ्यां नमः | ओं हैं कवचाय हुं |
| ओं हौं कनिष्ठिकाभ्यां नमः | ओं हौं नेत्राभ्यां वौषट् |
| ओं हः करतलकरपृष्टाभ्यां नमः | ओं हः अस्त्राय फट् |

### ध्यानम्

शङ्खचक्रगदापद्म धनुर्बाणासिधारिणम्।
शूलवज्राग्निखेटादि पाशाङ्कुशधरं विभुम्।
सदावराभय हलधरं नीलोत्पल प्रभम्।
वन्देवराहग्रीवं तं सर्वाभरण भूषितम्॥ - इति ध्यात्वा

मन्त्रशुद्धिं कृत्वा। ओं हुं नमो भगवते वराहाय इति अक्षमालया यथाशक्ति जप्त्वा। मानसाराधनं कृत्वा

चक्र शङ्ख गदा पद्म धरं लक्ष्मीधरापतिम्।

श्रीवराहमहं वन्दे किरीटादि विभूषितम्॥ - इति ध्यात्वा

सर्वोपचारान् समर्प्य। पात्राणि साधयित्वा। भूवराह मूलबेरस्य पादयोः आधारादीन् अभ्यर्च्य। ओं हुं नमो भगवते वराहाय सुस्थितो भव। अभिमुखो भव। इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण न्यासं कृत्वा। ओं हां हीं हूं हैं हौं हः इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः वराह मुद्राञ्च प्रदर्श्य। ओं ह्रीं भूम्यै नमः इति भूमिं सम्पूज्य। ओं ह्राम् इत्यादि षडङ्ग न्यासं कृत्वा। किरीट – कमल – वनमाला मुद्राः प्रदर्श्य मन्त्रासन उपचारान् कृत्वा। भूवराह उत्सव बेरस्यपादयोः आधारादीन् अभ्यर्च्य। आवाहनं कृत्वा।

चक्र शङ्ख गदा पद्म धनुर्बाणासि धारिणम्।

वज्रायुध धरं देवं वन्दे वाराहरूपिणम्॥ - इति ध्यात्वा

ओं हुं वराहाय नमः आगच्छ आगच्छ इति मूलबेरात् पूर्ववत् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। नाभ्यादि हृदयान्तम् अष्टाक्षरेण न्यासं कृत्वा। ओं हामित्यादि षडङ्ग न्यासं कृत्वा। किरीटादि मुद्राः वराह मुद्राञ्च प्रदर्श्य। ओं ह्रीं भूम्यै नमः इति भुवम् आवाह्य। ओं ह्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट – कमल – वनमाला मुद्राः प्रदर्श्य। पूर्ववत् मन्त्रासन उपचारान् कृत्वा। सर्वेभ्यः भगवदाराधनवत् पूजयिवा। बलिप्रदानानन्तरं

नमस्तेऽस्तु वराहाय लीलयोद्धरते महि।
खुरमध्यगतो यस्य मेरुर्कण कणायते॥ इति प्रार्थ्य
श्रीभूवराहस्वामि आराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्री लक्ष्मीनृसिह्म आराधनम्

अथ श्रीलक्ष्मिनृसिह्माराधन विधिरुच्यते। आचार्यः भगवदाराधनवत् सर्वं कृत्वा। श्री लक्ष्मीनृसिह्म स्वामिसन्निधौ। राजराष्ट्र अभिवृध्यर्थं। लोकक्षेमार्थं। नित्याराधनं करिष्ये तदङ्गं भूतशुध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। भूतशुद्धिं कृत्वा। अस्यश्री नृसिह्म मन्त्रस्य। व्यास ऋषिः। गायत्री छन्दः। श्रीनृसिह्मो देवता। श्री नृसिह्म समाराधनार्थे जपे विनियोगः।

| करन्यासः | देहन्यासः |
|---|---|
| ओं क्षां अङ्गुष्ठाभ्यां नमः | ओं क्षां हृदयाय नमः |
| ओं क्षीं तर्जनीभ्यां नमः | ओं क्षीं शिरसे स्वाहा |
| ओं क्षूं मध्यमाभ्यां नमः | ओं क्षूं शिखायै वषट् |
| ओं क्षैं अनामिकाभ्यां नमः | ओं क्षैं कवचाय हुं |
| ओं क्षौं कनिष्ठिकाभ्यां नमः | ओं क्षौं नेत्रत्रयाय वौषट् |
| ओं क्षः करतलकरपृष्टाभ्यां नमः | ओं क्षः अस्त्राय फट् |

## ध्यानम्

वामाङ्कस्थ श्रियायुक्तं शङ्ख चक्राब्ज धृक्करं
पीताम्बरं सर्वभूषं प्रसन्नं नृहरिं भजे॥ - इति ध्यात्वा

मन्त्रशुद्धिं कृत्वा। ओं नमो भगवते नारसिह्माय इति अक्षमालया यथाशक्ति जप्त्वा। मानसाराधनं कृत्वा

सत्यज्ञान सुखस्वरूपममलं क्षीराब्धिमध्येस्थितम्।
योगारूढमति प्रसन्नवदनं भूषासहस्रोज्वलम्।
त्र्यक्षं चक्र पिनाकसाभयकरं बिभ्राणमर्कच्छविम्।
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिह्मं भजे॥ - इति ध्यात्वा

सर्वोपचारन् समर्प्य। पात्राणि साधयित्वा। नृसिह्म मूलबेरस्य पादयोः आधारादीन् अभ्यर्च्य। ओं नमो भगवते नारसिह्माय सुस्थितो भव। अभिमिखो भव। इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण न्यासं कृत्वा। ओं क्षां क्षीं क्षूं क्षैं क्षौं क्षः इति षडङ्गन्यासं कृत्वा। किरीटादि मुद्राः प्रदर्श्य नृसिह्म मुद्राञ्च प्रदर्श्य। ओं श्रीं श्रियै नमः इति श्रियं सम्पूज्य। ओं श्राम् इत्यादि षडङ्गन्यासं कृत्वा। मन्त्रासन उपचारान् कृत्वा। नृसिह्म उत्सव बेरस्यपादयोः आधारादीन् अभ्यर्च्य। आवाहनं कृत्वा। ओं नारसिह्माय नमः आगच्छ आगच्छ इति मूलबेरात् पूर्ववत् आवाह्य। आवाहनादि षण्मुद्राः प्रदर्श्य। नाभ्यादि हृदयान्तम् अष्टाक्षरेण न्यासं कृत्वा। ओं क्षामित्यादि षडङ्ग न्यासं कृत्वा। किरीटादि मुद्राः नृसिह्ममुद्राञ्च प्रदर्श्य। ओं श्रीं श्रियै नमः इति श्रियम् आवाह्य। ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट कमल वनमाला मुद्राः प्रदर्श्य। पूर्ववत् मन्त्रासन उपचारान् कृत्वा।

सर्वेभ्यः भगवदाराधनवत् पूजयित्वा। बलिप्रदानानन्तरं

दुष्टानां भीकरं देवं सृष्टानां अभयङ्करम्।
प्रह्लादवरदं विष्णुं तं नृसिह्ममहं भजे॥
उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिह्मं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्॥ - इति प्रार्थ्य

श्री लक्ष्मिनृसिह्म आराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीहनुमत् पृथगालय आराधन विधिः

श्रीहनुमत् पूजा विधिरुच्यते। आचार्यः पूर्ववत् नित्यकर्मादिकं कृत्वा। हनुमदालयं प्रविश्य। द्वाराद्बहिः ओं नलादिभ्यो नमः इति साष्टाङ्गं प्रणम्य। द्वारे गदां ध्यात्वा। वायुमन्त्रेण हस्ततालत्रयेण कवाटमुद्घाट्य। अन्तः प्रविश्य। दीपान् प्रज्वाल्य। निर्माल्यादीनि परिहृत्य। पूजोपकरणानि सङ्गृह्य। परिवारार्चनं कृत्वा। गर्भगृहद्वारे ओं नलाय नमः ओं नीलाय नमः। ओं द्वारश्रियै नमः। आवरणे इन्द्रादीन् अभ्यर्च्य। महापीठे ओं सर्वेभ्यः भूतेभ्यो नमः इत्यभ्यर्च्य। सङ्कल्प्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं श्रीगोविन्द ----कैङ्कर्यम् अस्यदेवदेवस्य। भगवतो वासुदेवस्य। श्री सीता लक्ष्मण समेत श्री रामचन्द्र स्वामिनः अचञ्चलभक्तियुक्तस्य। श्री आञ्जनेय स्वामि सन्निधौ। राजराष्ट्राभिवृद्ध्यर्थं। लोकक्षेमार्थं। नित्याराधनं करिष्ये तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये। इति सङ्कल्प्य। अप उपस्पृश्य।

पूर्ववत् भूतशुद्धिं कृत्वा।

<u>मन्त्रन्यासः</u>

अस्यश्री हनुमत् मूल मन्त्रस्य। मार्कण्डेय ऋषिः। अनुष्टुप् छन्दः। हनुमान् देवता। हं बीजं। रां शक्तिः। रं कीलकं। रां कवचं। रां अस्त्रं। हेमादिवर्णः। हनुमत् समाराधनार्थे विनियोगः।

| करन्यासः | देहन्यासः |
|---|---|
| ओं हां अङ्गुष्ठाभ्यां नमः | ओं हां हृदयाय नमः |
| ओं हीं तर्जनीभ्यां नमः | ओं हीं शिरसे स्वाहा |
| ओं हूं मध्यमाभ्यां नमः | ओं हूं शिखायै वषट् |
| ओं हैं अनामिकाभ्यां नमः | ओं हैं कवचाय हुं |
| ओं हौ कनिष्ठिकाभ्यां नमः | ओं हौं नेत्राभ्यां वौषट् |
| ओं हः करतलकरपृष्ठाभ्यां नमः | ओं हः अस्त्राय फट् |

<u>ध्यानम्</u>

चक्र शङ्ख धरं देवं शान्तं हैमवतीपतिम्।
सर्व भूषण भूषाङ्गं मर्कटेशमहं भजे॥ - इति ध्यात्वा

मन्त्र शुद्धिं कृत्वा। ओं ह्रीं हरिमर्कट मर्कटाय नमः इति अक्षमालया यथाशक्ति जप्त्वा। मानसाराधने श्रीरामं ध्यात्वा

श्रीराघवं दशरथात्मजमप्रमेयम्।
सीतापतिं रघुकुलान्वय रत्नदीपम्।
आजानुबाहुमरविन्द दलायताक्षम्।
रामं निशाचर विनाशहरं नमामि॥ - इति ध्यात्वा

सर्वोपचारान् समर्प्य। पात्राणि साधयित्वा। घण्टायाम् – ओ कं ब्रह्मणे नमः।

धूपपात्रे – ओं पावकाय नमः। दीप पात्रे – ओं भास्कराय नमः।
तीर्थ पात्रे – ओं वं वरुणाय नमः इत्यभ्यर्च्य। प्रथमं रामचन्द्रं सालग्रामं वा संपूज्य। अनन्तरम् हनुमत्पादयोः आधारादीन् अभ्यर्च्य।
ओं ह्रीं हरिमर्कट मर्कटाय नमः सुस्थितो भव। अभिमिखो भव। इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य। ओं हाम् इत्यादि षडङ्गन्यासं कृत्वा। किरीट – चक्र – शङ्ख – वनमाल – पद्म – गदा – मुद्राः प्रदर्श्य। तदनु उत्सव बेरम् एवमेव आवाह्य सम्पूज्य। सर्वेभ्यः अर्घ्य – पाद्य – आचमन – स्नान – गन्ध – पुष्प – धूप – दीपैः तत्तन्मन्त्रेण सम्पूज्य। यथाभागं शर्करान्न – नवनीत – माषापूपादींश्च निवेद्य। सर्वफलानि ताम्बूलानि च निवेद्य। नीराज्य। बलिं दद्यात्। श्रीरामस्य प्रसादं हनुमते दद्यात्।

मर्कटेश महोत्साह सर्वशत्रु विनाशन।
शत्रून् संहर मां रक्ष श्रियं दापय देहि मे॥ इति प्रार्थ्य।

कवाट बन्धनं कृत्वा। द्वारे वायुं गदाञ्च ध्यात्वा। स्वगृहं प्रविशेत्॥

श्रीहनुमदाराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीभक्तबिम्बाराधनम्

भक्तबिम्ब सन्निधौ दीपान् प्रज्वाल्य। पात्राणि साधयित्वा।
भक्तबिम्बानां पादयोः ओं धर्माय नमः। ओं ज्ञानाय नमः।
ओं वैराग्याय नमः। ओं ऐश्वर्याय नमः। ओं पद्माय नमः। इत्यभ्यर्च्य।

परमात्मनः पादाऽधोभागात् आवाह्य।

ओं ह्लं सरयोगिने नमः। - பொய்கையாழ்வார்

ओं ह्लं भूतयोगिने नमः। - பூதத்தாழ்வார்

ओं ह्लं महदाह्वयाय नमः। - பேயாழ்வார்

ओं ह्लं भक्तिसाराय नमः। - திருமழிசையாழ்வார்

ओं ह्लं शठगोपाय नमः। - நம்மாழ்வார்

ओं ह्लं मधुरकवये नमः। - மதுரகவியாழ்வார்

ओं ह्लं कुलशेखराय नमः। - குலசேகராழ்வார்

ओं ह्लं विष्णुचित्ताय नमः। - பெரியாழ்வார்

ओं ह्लं गोदायै नमः। - ஸ்ரீஆண்டாள்

ओं ह्लं विप्रनारायणाय नमः। - தொண்டரடிப்பொடியாழ்வார்

ओं ह्लं पाणाय नमः। - திருப்பாணாழ்வார் ( ओं मुनिवाहनाय नमः )

ओं ह्लं नीलाय नमः। - திருமங்கையாழ்வார்

ओं ह्लं रामानुजाय नमः। - ஸ்ரீராமாநுஜர்

ओं ह्लं सौम्यजामातृ मुनये नमः। - ஸ்ரீமணவாள மாமுனிகள்

ओं ह्लं वेङ्कटेशाय नमः। - ஸ்ரீவேதாந்த தேசிகர்

इति तत्तत् भक्तान् स्वस्व विद्यया आवाह्य। सर्वेभ्यः ओं ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः इति षडङ्गन्यासं कृत्वा। अर्घ्य – पाद्य – आचमन – गन्ध – पुष्प – धूप – दीपैः सम्पूज्य। हविर्निवेद्य। नीराजयेत्॥

श्रीभक्तबिम्बाराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीगृहार्चाराधनम्

अथ गृहार्चाराधन विधिं वक्ष्ये। आचार्यः परार्थ माध्याह्निक पूजा सम्पूर्णेन स्वगृहं गत्वा। गृहार्चास्थलमासाद्य। दीपान् प्रज्वाल्य। निर्माल्यादीनि परिहृत्य। पूजोपकरणानि सम्पाद्य। प्रबुद्धं ध्यात्वा। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम्। अस्मिन्गृहे। अस्यदेव देवस्य। भगवतो नारायणस्य। श्रीभूमि नीला----नायिका समेत श्री-----स्वामि सन्निधौ नित्याराधनम् करिष्ये। इति सङ्कल्प्य। अप उपस्पृश्य।( आलय कैङ्कर्य रहितंचेत् भूतशुद्ध्यादि मानसयागान्तम् अवश्यं कृत्वा )

### भूतशुद्धिः

### संहार क्रमम्

ओं लां नमः पराय सर्वात्मने श्रीमते नारायणाय स्वाहा।

ओं वां नमः पराय निवृत्त्यात्मने अनिरुद्धाय स्वाहा।

ओं रां नमः पराय विश्वात्मने प्रद्युम्नाय स्वाहा।

ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा।

ओं षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा।

इति पादादि मस्तकान्तम्

### सृष्टि क्रमम्

ओं षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा।

ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा।

ओं रां नमः पराय विश्वात्मने प्रद्युम्नाय स्वाहा।

ओं वां नमः पराय निवृत्त्यात्मने अनिरुद्धाय स्वाहा।

ओं लां नमः पराय सर्वात्मने श्रीमते नारायणाय स्वाहा।

इति मस्तकादि पादान्तम् ( अष्टाक्षर न्यासं कृत्वा )

अर्घ्यादि पात्रस्थ जलं सावित्र्या अभिमन्त्र्य। भगवन्तं प्रार्थ्य। देवस्य पादयोः तुलसीं समर्प्य। पूर्ववत् भगवन्तम् ओं भूर्भुवस्सुवरोम् इत्युच्चरेण त्ततन्नामेन आवह्य (सालग्रामं चेत् नावाहयेत् )। भगवत्पादयोः

| | |
|---|---|
| ओम् ऋग्वेदाय नमः | ओं सामवेदाय नमः |
| ओं यजुर्वेदाय नमः | ओम् अथर्ववेदाय नमः |

इत्यभ्यर्च्य। आसनं समर्पयामि। चक्राब्जमण्डलं विधिवत् सम्पूज्य।

ओं नारायणाय विद्महे--------प्रचोदयात्॥ अर्घ्यं समर्पयामि।

त्रीणिपदाविचक्रमे--------धारयन्॥ पाद्यं समर्पयामि।

ओं॥ इति आचमनीयं समर्पयामि।

अपोहिष्टामयोभुवः--------आपोजनयथाचनः॥ स्नानं समर्पयामि (संस्नाप्य)।

ओंभूर्भुवस्सुवः॥ प्लोतवस्त्रं समर्पयामि।

जितन्ते दक्षिणतो--------सुराजयाति॥ वस्त्रं समर्पयामि।

इदं विष्णुर्विचक्रमे--------सुरे॥ उपवीतं समर्पयामि।

ओं॥ गन्धं समर्पयामि।

तद्विष्णोःपरमंपदꣳसदा--------परमंपदम्॥ पुष्पं समर्पयामि।

जितन्ते दक्षिणतो--------सुराजयाति। धूपं समर्पयामि।

उद्दीप्यस्व जातवेदो--------दिशोदिश॥ दीपं समर्पयामि।

देवस्य पुरतः स्थलानि संशोध्य। गृहे पाचित सर्वविध मधुर पक्वाः व्यञ्जनाः लेह्य रसादि समस्त भक्ष्याः फलवर्ग ताम्बूलादिनाञ्च देवस्य पुरतो विनिवेश्य। देवालय भगवन्निवेदितान्नेन सह ओं देवस्यत्वा सवितुः-----प्रतिगृह्णातु

ओं नमो नारायणाय अमृत महानैवेद्यं गृहाणस्वाहा।

इति निवेद्य। भक्तबिम्बेभ्यः निवेद्य। पानकपानीयं समर्पयामि। आचमनीयं समर्पयामि। नीराजनं समर्पयामि। पुष्पेण तुलस्या वा देवस्य पादयोः समर्चयेत्।

ओं वासुदेवाय नमः
ओं सङ्कर्षणाय नमः
ओं प्रद्युम्नाय नमः
ओम् अनिरुद्धाय नमः

ओं मत्स्याय नमः
ओं कूर्माय नमः
ओं वराहाय नमः
ओं नारसिम्हाय नमः
ओं वामनाय नमः
ओं परशुरामाय नमः
ओं दशरथ रामाय नमः
ओं बलरामाय नमः
ओं श्रीकृष्णाय नमः
ओं कल्किने नमः

ओं श्री केशवाय नमः
ओं नारायणाय नमः
ओं माधवाय नमः
ओं गोविन्दाय नमः
ओं विष्णवे नमः
ओं मधुसूदनाय नमः
ओं त्रिविक्रमाय नमः
ओं वामनाय नमः
ओं श्रीधराय नमः
ओं हृषीकेशाय नमः
ओं पद्मनाभाय नमः
ओं दामोदराय नमः

पुरुषसूक्तं वा द्वादशाक्षरं वा अष्टाक्षरं यद्वा प्रणवं यथाशक्ति जप्त्वा। वेद दिव्यप्रबन्धादीन् समर्पणं कुर्यात्। पितृसंविभाग भगवत् प्रसादेन भगवद्रूप पितृन् सन्तर्प्य। भगवत् प्रसादेन पङ्क्तिभोजन योग्यैः सह संभोजयेत्॥

श्रीगृहार्चाराधनं संपूर्णम्

----------*****----------

श्रीः

## अथ श्रीपुरुषसूक्त आराधनम्

( शुक्ल यजुर्वेदीय पुरुषसूक्तम् )

अचार्यः गृहार्चासमीपे गत्वा ( भगवदालयेपि अवकाशानुसारेण पुरुषसूक्तेन आराध्य ) । पूर्ववत् सकलं कृत्वा। प्राणानायम्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम्। अस्मिन्गृहे। अस्यदेव देवस्य। भगवतो नारायणस्य। श्रीभूमि नीला ----नायिका समेत श्री----- स्वामि सन्निधौ। पुरुषसूक्तविधानेन नित्याराधनमं करिष्ये। इति सङ्कल्प्य। अप उपस्पृश्य। भूतशुद्धिं कृत्वा। अर्घ्यादिपात्राणि साधयित्वा।

अस्यश्री पुरुषसूक्त महामन्त्रस्य वासुदेवो भगवान् ऋषिः। अनुष्टुप् छन्दः। श्री वासुदेवो देवता। पुरुषसूक्त आराधने विनियोगः।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुम्। - शिरसि
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति। - ललाटे
एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि। - चक्षुषि

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।

ततो विष्वङ् व्यक्रामत्साशनानशने अभि। - नासिकायाम्

ततो विराळजायत विराजो अधि पूरुषः।

स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः। - मुखे

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।

पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये। - कण्ठे

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। - करयोः

तस्मादश्वा अजायन्त ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः। - उरसि

तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये। - नाभौ

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।

मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते। - गुह्ये

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।

ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत। - ऊरौ

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाꣳ२ अकल्पयन्।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः।

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।

देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ - पादयोः

इति क्रमेन न्यस्य। ततः आवाहनादि उपचारान् कृत्वा।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।

स भूमिं सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुम्। - आवाहयामि

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।

उतामृतत्वस्येशानो यदन्नेनातिरोहति। - आसनं समर्पयामि

एतावानस्य महिमातो ज्यायांश्च पूरुषः।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि। - पाद्यं समर्पयामि

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।

ततो विष्वङ् व्यक्रामत्साशनानशने अभि। - अर्घ्यं समर्पयामि

ततो विराळजायत विराजो अधि पूरुषः।

स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः। - आचमनीयं समर्पयामि

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।

पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये। - स्नानं समर्पयामि

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। - वस्त्रं समर्पयामि

तस्माद॑श्वा॑ अजायन्त ये के चो॑भयाद॑तः।

गावो॑ ह जज्ञिरे तस्मात्तस्मा॑ज्जाता अ॑जावय॑ः। - उपवीतं समर्पयामि

तं यज्ञं ब॒र्हिषि प्रौक्ष॒न्पुरु॑षं जा॒तम॑ग्र॒तः।

तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये। - गन्धं समर्पयामि

यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्पयन्।

मुख॒ं किम॑स्यासी॒त्किं बा॒हू किमू॒रू पादा॑ उच्येते। - पुष्पं समर्पयामि

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्य॑ः कृ॒तः।

ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः प॒द्भ्यां शू॒द्रो अ॑जायत। - धूपं समर्पयामि

च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒ः सूर्यो॑ अजायत।

श्रोत्रा॑द्वा॒युश्च॑ प्रा॒णश्च॒ मुखा॑द॒ग्निर॑जायत। - दीपं समर्पयामि।

नाभ्या॑ आसीद॒न्तरि॑क्षं शी॒र्ष्णो द्यौः सम॑वर्तत।

प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॒त्तथा॑ लो॒काँ अ॑कल्पयन्। - नैवेद्यम् समर्पयामि

यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत।

व॒स॒न्तो॑ऽस्यासी॒दाज्य॑ं ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः। - नमस्कारं समर्पयामि

स॒प्तास्या॑सन्परि॒धय॒स्त्रिः स॒प्त स॒मिध॑ः कृ॒ताः।

दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न्पुरु॑षं प॒शुम्। - प्रदक्षिणम्

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।

ते ह॒ नाकं॑ महि॒मान॑ः सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः॥ - पुष्पाञ्जलिं समर्पयामि

नीराजनं समर्पयामि। चक्राब्जमण्डलं विधिवत् सम्पूज्य।

गृहे शुचौदेशे। विधिवत् वैष्णवाग्निं संस्कृत्य। तन्मध्ये भगवन्तम् आवाह्य।

समिदन्नाज्यैः प्रत्येकं पुरुषसूक्तेन होमं हुत्वा। पूर्णाहुतिं हुत्वा। होमफलं देवस्य पादयोः समर्पयेत्। अग्निस्थम् भगवन्तम् उद्वास्य। पुरुषसूक्तादीन् जप्त्वा। नीराजयेत्॥

यो नित्यं पूजयेद्विष्णुं गृहस्थो वेश्मनि स्वयम्।
स नयेत् स्वकुलोद्भूतान् पुरुषानेकविंशतिम्॥

श्रीपुरुषसूक्त आराधनं सम्पूर्णम्

----------*****----------

श्रीः

## श्रीसूक्त आराधनम्

गृहे – महालक्ष्म्याऽलयेपिच अवकाशानुसारेण श्रीसूक्तेन आराधनं कृत्वा।

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रांहिरण्मयीं लक्ष्मीञ्जातवेदोम आवह। श्रियम् आवाहयामि
तांम आवहजातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयङ्गामश्वं पुरुषानहम्। - आसनं समर्पयामि
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियन्देवीमुपह्वयेश्रीर्मादेवीर्जुषताम्। - अर्घ्यं समर्पयामि, पाद्यं समर्पयामि
कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीन्तृप्ता न्तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णान्तामिहोपह्वये श्रियम्। - आचमनीयं समर्पयामि
चन्द्रां प्रभासां य्यशसाज्वलन्तीं श्रियंल्लोके देवजुष्टामुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मेनश्यतान्त्वांवृणे। - फलादि उपहारान्
समर्पयामि

आदित्यवर्णे तपसोऽधिजातोवनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः। - मधुपर्कं
समर्पयामि

उपैतुमान्देवसखः कीर्तिश्चमणिनासह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिन्ददातुमे। - स्नानं समर्पयामि
क्षुत्पिपासामलांज्येष्ठामलक्ष्मीन्नाशयाम्यहम्।
अभूतिमसमृद्धिन्च सर्वां निर्णुदमे गृहात्। - धौतवस्त्रं समर्पयामि
गन्धद्वारां दुराधर्षांनित्यपुष्टाङ्करीषिणीम्।
ईश्वरीं सर्वभूताना न्तामिहोपह्वये श्रियम्। - गन्धं समर्पयामि
मनसःकाममाकूतिंव्वाचस्सत्यमशीमहि।
पशूनां रूपमन्नस्य मयिश्रीश्श्रयतांय्यशः। - दिव्याभरणं समर्पयामि
कर्दमेन प्रजाभूता मयि संभवकर्दम।
श्रियंव्वासय मे कुलेमातरंपद्ममालिनीम्। - पुष्पं समर्पयामि
आपस्सृजन्तुस्निग्धानिचिक्लीतवसमे गृहे।
निचदेवींमातरंश्रियंव्वासय मे कुले। - धूपं समर्पयामि
आर्द्रांय्यः करिणींय्यष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रांहिरण्मयींल्लक्ष्मीञ्जातवेदो म आवह। - दीपं समर्पयामि
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णांहेममालिनीम्।
सूर्यां हिरण्मयींल्लक्ष्मीञ्जातवेदो म आवह। - नैवेद्यं समर्पयामि

तांम् आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यंप्रभूतङ्गावो दास्योश्वान् विन्देयं पुरुषानहम्। - प्रणम्य
ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि।
तन्नो लक्ष्मी प्रचोदयात्॥ - नीराजनं समर्पयामि
अन्यत् सर्वं पुरुष सूक्त आराधनवत् कुर्यात्

श्रीः

## अग्निकार्य विधिः

अथाग्निकार्यविधिरुच्यते। आचार्यः अग्न्यागारद्वारे ओं च्रों चण्डाय नमः ओं प्रिं प्रचण्डाय नमः। मध्ये ओं क्षं गरुडाय नमः इत्यभ्यर्च्य। अन्तः प्रविश्य। अग्निकुण्डस्य पश्चिमे भागे प्राङ्मुखः आसने उपविश्य ( अग्निकुण्डस्य दक्षिणे भागे उदङ्मुखः आसने उपविश्य )। ओं असुरान्तचक्राय स्वाहा वीर्याय अस्त्राय फट् इति कुण्डस्य सम्मार्जनालेपने कृत्वा।

प्राच्यां शिरस्समाख्यातं बाहुयुग्मं व्यवस्थितम्।
ऐशान्याग्नेयकोणे तु जङ्घेवायव्य नैर्ऋते।
उदरंकुण्डमित्युक्तं योनिर्योनौ विधीयते॥

कुण्डमेवं ध्यात्वा। ---------- होमं करिष्ये इति सङ्कल्प्य। पुण्याहं वाचयित्वा। ओं भूर्भुवस्सुवरोमिति कुण्डस्य प्रोक्षण – अवोक्षण – अभ्युक्षणानि कृत्वा। आत्मनः दक्षिणेपार्श्वे पुष्पभाजनं वामे च अन्यानि होमद्रव्याणि निक्षिप्य। ओम् आचक्रायस्वाहेति स्वस्वमन्त्रन्यासं कृत्वा। कुण्डस्य उत्तरे पार्श्वे प्रागग्रान्

षड् दर्भान् आस्तीर्य। तेषु आज्यपात्र – चरुस्थाली – प्रोक्षणी – प्रणीता – समित् – कुश – तण्डुल – परिधि – स्रुक् – स्रुव – दर्वी – अग्नेर्विहरण – व्यजन – मेक्षण – शुष्ककाष्ठ – घण्टाक्षत – गन्धद्रव्याणि यथासम्भवं न्यग्विन्निधाय। पात्राणि अर्वाङ्मुखं संस्थाप्य। कुण्डमध्ये

ओं नमो नारायणायेति तिस्रोरेखाः दक्षिणादुत्तरान्तं प्रागायताः पश्चिमादि पूर्वान्तम् उदगायताः तावतीर्लिखित्वा। दर्भान् विसृज्य।

ओं इडायै नमः ओं पिङ्गलायै नमः ओं सुषुम्णायै नमः

इत्यभ्यर्च्य। दर्भमुष्टिभिः कुण्डस्य पर्यग्निकरणं कृत्वा। कुण्डमध्ये भद्रासनं कल्पयित्वा। ओं भद्रासनाय नमः। ओं विमलासनाय नमः इत्यभ्यर्च्य।

कुण्डमध्ये तथालक्ष्मीं सर्वाभरणभूषितां।
सर्वावयवसम्पूर्णाम् ऋतुस्नातां विचिन्तयेत्॥
देवं नारायणं ध्यात्वा सर्वलक्षणलक्षितम्।
चतुर्बाहुं विशालाक्षं कोमलं पीतवाससम्।
शङ्खचक्रगदापद्मैश्चतुर्भिःकृतलक्षणम्।
कञ्जपाणिं तथापादं श्रीवत्साङ्कितवक्षसम्।
कालमेघनिभं शान्तं चन्द्रबिम्बनिभाननम्।
हारकेयूरसंयुक्तं किरीटेनोपशोभितम्॥

एवं ध्यात्वा। तत्र तयोः सङ्गमं विचिन्त्य। तस्मादुत्पन्नमग्निं ध्यात्वा। अरणेः सूर्यकान्ताश्मनो वा अग्निं द्वादशाक्षरेण मथित्वा। श्रोत्रियागाराद्वा समाहृत्य। ओं भूर्भुवस्सुवः इति प्रोक्ष्य। अग्निबीजस्य काश्यप ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। होमार्थे विनियोगः। ओं रं अग्नये नमः इति दिव्याग्निं ध्यात्वा।

ओं रामित्यादि षडङ्गन्यासं कृत्वा।

ओं रां हृदयाय नमः
ओं रीं शिरसे स्वाहा
ओं रूं शिखायै वषट्
ओं रैं कवचाय हुं
ओं रौं नेत्रत्रयाय वौषट्
ओं रः अस्त्राय फट्

कुण्ड मध्ये अग्निं निधाय। ओं असुरान्तचक्राय स्वाहा इति इन्धनान्यग्नौ निक्षिप्य। वायुबीजस्य किष्किन्ध ऋषिः। जगती छन्दः। वायुर्देवता। अग्नि उद्दीपनार्थे विनियोगः। ओं यं वायवे नमः इति अग्निम् उद्दीप्य। ओं वीर्याय अस्त्राय फट् इति अस्त्रमन्त्रेण अद्भिः परिसमूह्य। कुण्डस्य परितः प्रागुदगग्रं प्रागादिक्रमेण प्रादक्षिण्येन त्रिभिर्वा पञ्चभिर्वा सप्तभिर्वा नवभिर्वा एकादशभिर्वा पञ्चविंशतिर्वा निष्ठान्तैः दर्भैः वासुदेवादि मन्त्रेण परिस्तीर्य।

ओं वासुदेवाय नमः
ओं सङ्कर्षणाय नमः
ओं प्रद्युम्नाय नमः
ओं अनिरुद्धाय नमः

तत्र द्रव्याग्निमध्ये पूर्वाग्रान् दर्भान् आस्तीर्य। तदुपरि प्रणीतापात्रं निधाय। अद्भिरापूर्य। अक्षतैरभ्यर्च्य। द्विदर्भकृत प्रादेशसम्मितं कूर्चं तस्यां विन्यस्य। त्रिभिर्दर्भैः पवित्रैः आच्छाद्य। प्रोक्षणीपात्रम् आत्मनः अग्रे विन्यस्य। कूर्चेन सह प्रणीताजलं प्रोक्षण्याम् आवाप्य। कूर्चेन हस्तयोरङ्गुष्ठानामिकाभ्यां मूलेन त्रिरुत्पूय। तत्कुर्चेन प्रोक्षणीं होमद्रव्याणि सर्वाणि च प्रोक्ष्य। तेन नामादेशं यथायथं स्पृष्ट्वा। तानि पात्राणि उत्थानानि कृत्वा। पुनः प्रोक्ष्य। तानि प्रोक्षणीजलेन सत्यन्त्वर्तेन परिषिञ्चामि इति कुण्डस्य प्रादक्षिण्येन स्त्रावयित्वा। प्रणीतां पुनः अद्भिस्सम्पूर्य। तस्मिन् ओं कौमोदकीशङ्खचक्रपद्मधराय वासुदेवाय नमः इत्यावाह्याभ्यर्च्य। अग्नेरैशान्यां दर्भविष्टरे तां संस्थाप्य। अग्नेर्दक्षिणतः दर्भेषु द्वादशदर्भकृतकूर्चं पूर्वाग्रं विन्यस्य। तस्मिन्

चतुर्मुखं भुजद्वन्द्वं साक्षमाला कमण्डलम्।
हेमाभं शक्तिसहितं ब्रह्माणन्तु विचिन्तयेत्॥

ओं कं ब्रह्मणे नमः इत्यावाह्याभ्यर्च्य। यथाविधि चरुं श्रपयित्वा। अग्नेरुत्तरतो निक्षिप्य। आज्यपात्रमादाय। आत्मनः पुरतः संस्थाप्य। ओम् अं विष्णवे नमः इत्यभ्यर्च्य।

आप्यायस्वसमेतुते विश्वत स्सोम वृष्णियम्।भवा वाजस्य सङ्गथे।

इति मन्त्रेण द्रावितं गालितम् आज्यं संसिच्य। अग्नेरुत्तरतः पूर्वाग्रान् दर्भानास्तीर्य। तेष्वङ्गारान्निरूह्य। तेष्वाज्यपात्रं निधाय। द्विदर्भकृत प्रादेशसम्मितं कूर्चं तस्यां निधाय। त्रिभिर्दर्भैः पवित्रैः आच्छाद्य। दर्भान् आदीप्य। दर्शयित्वा। विसृज्य। दर्भाग्रद्वयं प्रच्छिद्य प्रक्षाल्य प्रत्यस्य। पुनः दर्भान् आदीप्य। श्रीमन्नारायणचरणौ शरणं प्रपद्ये श्रीमते नारायणाय नमः इति वा मूलेन वा त्रिः पर्यग्निकरणं कृत्वा। विसृज्य। दर्भकाण्डद्वयेन नीराजनं कृत्वा। विसृज्य। आज्यस्थालीम् उदगुद्वास्य। अङ्गारान् अग्निना संयोज्य। आज्यस्थालीं पुरतः कृत्वा। उदगग्राभ्यां पवित्राभ्याम् अङ्गुष्ठानामिकाभ्यां मूलेन त्रिरुत्पूय। पवित्रग्रन्थिं विस्रस्य। अपस्स्पृष्ट्वा। प्रागग्रमग्नौ प्रहृत्य। आज्यं सुरभिमुद्रया अमृतीकृत्य। चक्रमुद्रां प्रदर्श्य। दर्भैः आच्छाद्य। अग्नेरष्टासु दिक्षु इन्द्रादीन् आवाह्य सम्पूज्य। ओम् इन्द्राय नमः-------ओम् ईशानाय नमः इत्यभ्यर्च्य। उष्णोदकेन स्रुक्स्रुवौ प्रक्षाल्य। दर्भपञ्चकृतकूर्चेन स्रुक्स्रुवयोः मूलं - मूलेन मध्यं – मध्येन अग्रम् – अग्रेण अस्त्रमन्त्रेण सम्मार्ज्य। ओं वीर्याय अस्त्राय फट्। अग्नौ निष्टप्य। अद्भिस्संप्रोक्ष्य। आत्मनः उदीच्यां स्रुक्स्रुवौ निधाय। कूर्चग्रन्थिं विस्रस्य। अप उपस्पृश्य। प्रागग्रम् अग्नौ प्रहृत्य। स्रुवेण

आज्यमादाय। होमद्रव्येषु चरूञ्च ओम् आप्यायस्व समेतुते----सङ्गथे इति मन्त्रेण संसिच्य। परिधिं सम्पूज्य। कुण्डस्य पश्चिमे कुण्डायामसदृशम् अङ्गुष्ठनहनम्। दक्षिणे तस्मात् अङ्गुलीहीनं मध्यमाङ्गुलिनहनम्। उत्तरे तस्मात् अङ्गुलीहीनं कनिष्ठिकानहनं परिधित्रयं क्रमेण

ओं श्रीधराय नमः ओं नृसिंहाय नमः ओं हयग्रीवाय नमः

इति मन्त्रेण संस्थाप्य। मध्यमपरिधिं प्रणवेनोपस्पृश्य।

अग्नि – ईशानकोणयोः आघारसमिधौ तत्तन्मन्त्रेण संस्थाप्य

ओं अग्नये नमः। ओं ईशानाय नमः।

ओं अदितेऽनुमन्यस्व ओं सरस्वतेऽनुमन्यस्व

ओं अनुमतेऽनुमन्यस्व ओं देवसवितःप्रसुव

इति वा कवचमन्त्रेण वा ( विद्युल्काय स्वाहा बलाय कवचाय हुं ) परिषिच्य। अनूयाज समिधं प्रणीतामुखे निधाय। पञ्चदश एकतोऽग्रा-घृताक्ताः समिधः मुष्टिमुद्रया प्रजापतिं मनसा ध्यायन् सकृदेव मूलेन हुत्वा ( ओं पद्मनाभाय स्वाहा इति वा हुत्वा )। कुशकूर्च वेष्टितो वामकरतले घृतपात्रं निधाय। स्रुवेन हुत्वा। नैर्ऋत्यादीशानान्तं प्रजापतय इदं न मम।

वायव्यादाग्नेयान्तम् इन्द्राय इदं न मम। तदग्नौ उत्तरे ओं अग्नये स्वाहा। अग्नये इदं न मम। दक्षिणे ओं सोमाय स्वाहा। सोमाय इदं न मम।

मध्ये ओं भूः स्वाहा। अग्नये इदं न मम। ओं भुवः स्वाहा। वायवे इदं न मम। ओं सुवः स्वाहा। सूर्याय इदं न मम। ओं भूर्भुवस्सुवः स्वाहा।

प्रजापतये इदं न मम। इति व्याहृतिभिश्च हुत्वा। अग्निं ध्यात्वा

<u>बालाग्निध्यानम्</u>

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम्।
वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा।
अभीतिदं चर्मधरं वामेचाज्यधरं करे।
कालीकरालीसुमना लोहिताधूम्र एव हि।
स्फुलिङ्गिनीविश्वरूपा सप्तजिह्वाः प्रकीर्तिताः।
काल्यास्तु मध्यमं स्थानं कराल्यां पूर्वदिग्भवेत्।
मनोजवायाश्चाग्नेय्यां लोहितायास्तु वारुणे।
सुधूम्रासोमनिलया स्फुलिङ्गिन्यनिलयाश्रया।
ऐशान्यां विश्वरूपीतु एवं स्थानं स्मरेत्क्रमात्।
जिह्वायां दक्षिणे वक्रे धूम्रायां मारणादिकम्।
लोहितायां वशीकारः काल्यां कर्म च शान्तिकम्।
सर्वसिद्धिः स्फुलिङ्गिन्यामानने दक्षिणेतरे।
विश्वरूपरसज्ञायामणिमादिमहाबलम्।
करालिकाविजयदा पुष्टिदा च मनोजवा।
कार्ष्ण्यं लौहित्यमेतासां वर्णश्श्यामत्वमेवच।
स्फुलिङ्गरूपञ्च ततो वर्णः स्फटिकसन्निभः।
तपनीयनिभःप्रोक्तः जिह्वानामानुपूर्वशः॥

एवं बालाग्निं ध्यात्वा। ओं रं बालाग्नये नमः आवाहयामि। समस्तोपचारान् समर्पयामि इति आज्येन सकृत् हुत्वा। परिषिच्य।

| | |
|---|---|
| अदिते अन्वमꣳस्थाः | सरस्वते अन्वमꣳस्थाः |
| अनुमते अन्वमꣳस्थाः | देवसवितः प्रासावीः |

श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अग्नेः जातदोषशान्त्यर्थम् आघारसम्मिश्रं तिलं द्वादशाक्षरेण अष्टोत्तरशताहुतिं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। ओं नमो भगवते वासुदेवाय स्वाहा इति हुत्वा। परिषिच्य।

श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् आसांमध्ये काल्यां गर्भाधान – पुंसवन – सीमन्तोन्नयन – जातकर्म – नामकरण – अन्नप्राशन – चौल – उपनयन – प्राजापत्य – सौम्य – आग्नेय – वैश्वदेव – वैष्णव – गोदान – शुक्रिय – उपनिष्क्रमण – समावर्तन – विवाहादि कर्मभिः संस्करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। द्वादशाक्षरविद्यया हुत्वा।

| | |
|---|---|
| ओं ओं ओं स्वाहा | ओं तें ओं स्वाहा |
| ओं नं ओं स्वाहा | ओ वां ओं स्वाहा |
| ओं मों ओं स्वाहा | ओं सु ओं स्वाहा |
| ओं भं ओं स्वाहा | ओं दें ओं स्वाहा |
| ओं गं ओं स्वाहा | ओं वां ओं स्वाहा |
| ओं वं ओं स्वाहा | ओं यं ओं स्वाहा |

परिषिच्य। ( इदं वैष्णवीकरणं प्रतिकर्म सङ्कल्पपूर्वकं परिषेचन संपुटितं हुत्वा )

श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अग्नेः प्रशमनार्थाय सप्तजिह्वाहवनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

काल्यां मूलमन्त्रेण समिधः (मध्ये)।

मनोजवायां प्रणवेन आज्यम् (आग्नेये)।

सुलोहितायां वासुदेवमन्त्रेण अन्नम् (पश्चिमे)।

सुधूम्रायां सङ्कर्षणमन्त्रेण लाजम् (उत्तरे)।

स्फुलिङ्गिन्यां प्रद्युम्नमन्त्रेण तिलम् (वायव्ये)।

विश्वरूप्याम् अनिरुद्धमन्त्रेण मुद्गम् (ईशान्ये)।

कराल्यां पुंसूक्तेन मधुना (पूर्वे)। प्रत्येकं षोडशाहुतीर्हुत्वा। परिषिच्य।

श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अग्नेः पूर्णाहुतिं करिष्ये इति सङ्कल्प्य।

अप उपस्पृश्य। परिषिच्य। स्रुक्स्रुवौ आज्येन सम्पूर्य ओं रं अग्नये स्वाहा।

अग्नये इदम् इति हुत्वा। परिषिच्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् अग्नि मध्ये

भगवदाराधन हवनं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

घण्टानाद् पुरस्सरं ओं ह्रीं आधारशक्त्यै स्वाहा इत्यारभ्य ओं भद्रासनाय स्वाहा

इत्यन्तम् आज्येन हुत्वा। अग्निमध्ये ओं नमो भगवते वासुदेवाय इति हृदयस्थं

चिद्रूपं परमेश्वरं ध्यात्वा आवाह्य। आवाहानादि षण्मुद्राः प्रदर्श्य।

नाभ्यादिहृदयान्तं द्वादशाक्षरेण स्थितिन्यासं कृत्वा। किरीटादिमुद्राः प्रदर्श्य।

स्वामिन् सर्व जगन्नाथ यावद्धोमावसानकम्।

तावत्त्वं भक्तिभावेन वह्नौ त्वं सन्निधिं कुरु॥ इति प्रार्थ्य

विभो सकल लोकेश ---- जनार्दनम् ॥

ओं नमो भगवते वासुदेवाय मन्त्रासनं गृहाण स्वाहा।

ओं तत्सवितुर्वरेण्यम्-------प्रचोदयात्। अर्घ्यं गृहाण स्वाहा।

ओं त्रीणिपदाविचक्रमे-------धारयन्। पाद्यं गृहाण स्वाहा।

ओं आपःपुनन्तु पृथिवीम्----माम्। आचमनीयं गृहाण स्वाहा।

मधुक्षीरञ्च-----न लोपयेत् ओं नमो भगवते वासुदेवाय मधुपर्कं गृहाण स्वाहा।

दासोहन्ते-----हिते सदा। प्रणम्य।

ओं श्रीवत्सायै स्वाहा
ओं वनमालायै स्वाहा
ओं योगमायायै स्वाहा
ओं वैष्णव्यै स्वाहा
ओं विमलायै स्वाहा
ओं सृष्ट्यै स्स्वाहा

ओं उत्कर्षिण्यै स्वाहा
ओं प्रज्ञायै स्वाहा
ओं सत्यायै स्वाहा
ओं ऐशान्यै स्वाहा
ओं अनुकम्पायै स्वाहा
ओं पितामह्यै स्वाहा

ओं व्याप्त्यै स्वाहा
ओं कान्त्यै स्वाहा
ओं तृप्त्यै स्वाहा
ओं श्रद्धायै स्वाहा

ओं विद्यायै स्वाहा
ओं जयायै स्वाहा
ओं क्षमायै स्वाहा
ओं शान्त्यै स्वाहा

ओं शङ्खिने स्वाहा
ओं चक्रिणे स्वाहा
ओं गदिने स्वाहा
ओं खड्गिने स्वाहा

ओं पद्मिने स्वाहा
ओं मुसलिने स्वाहा
ओं शार्ङ्गिणे स्वाहा
ओं वनमालिने स्वाहा

ओं इन्द्राय स्वाहा
ओं अग्नये स्वाहा
ओं यमाय स्वाहा
ओं निर्ऋतये स्वाहा

ओं वरुणाय स्वाहा
ओं वायवे स्वाहा
ओं सोमाय स्वाहा
ओं ईशानाय स्वाहा

ओं अनन्ताय स्वाहा ओं गरुडाय स्वाहा ओं विष्वक्सेनाय स्वाहा
इति हुत्वा

सम्पन्नं देव सद्वस्त्र----तृतीयकम्।

ओं नमो भगवते वासुदेवाय अलङ्कारासनं गृहाण स्वाहा। अलङ्कारासनार्थम्

अर्घ्यं गृहाण स्वाहा। पाद्यं गृहाण स्वाहा। आचमनीयं गृहाण स्वाहा।

इदं विष्णुर्विचक्रमे-----सुरे। दिव्यगन्धं गृहाण स्वाहा।

तद्विष्णो परमम्पदम्----पदम्। पुष्पं गृहाण स्वाहा।

जितन्ते दक्षिणतो----जयाति। सर्वाभरणान् गृहाण स्वाहा।

इरावती-----मयूखैः। अक्षतान् गृहाण स्वाहा।

जितन्ते दक्षिणतो----जयाति। धूपं गृहाण स्वाहा।

उद्दीप्यस्व-----दिश। दीपं गृहाण स्वाहा।

मन्त्रपुष्पं गृहाण स्वाहा।

प्रभूतमेध्यान्यन्नानि----उपाश्रय।

ओं नमो भगवते वासुदेवाय भोज्यासनं गृहाण स्वाहा। भोज्यासनार्थम्

अर्घ्यं गृहाण स्वाहा। पाद्यं गृहाण स्वाहा। आचमनीयं गृहाण स्वाहा।

मधुपर्कं गृहाण स्वाहा।

शीतलोदक----स्मृतम्। ओं अर्हणपानीयं गृहाण स्वाहा।

ओं देवस्यत्वा सवितुः-----प्रतिगृह्णातु। ओं नमो भगवते वासुदेवाय क्षीर –

गुल – पायसान्नं गृहाण स्वाहा। पानकं गृहाण स्वाहा। पानीयं गृहाण स्वाहा।

ताम्बूलं गृहाण स्वाहा। आचमनीयं गृहाण स्वाहा। जपार्थञ्च सकृद्धुत्वा।

ओं नमो भगवते वासुदेवाय स्वाहा। ओं नमो नारायणाय स्वाहा।

समस्तोपचारान् गृहाण स्वाहा इति हुत्वा। परिषिच्य। श्रीभगवदाज्ञया

भगवत्कैङ्कर्यं अस्मिन्नग्नऔ समिदन्नाज्यहोमं करिष्ये इति सङ्कल्प्य।

अप उपस्पृश्य। परिषिच्य। पालाशादि यज्ञवृक्षसमिद्भिः शतेन तदर्धेन पादेनाष्टाभिश्चतसृभिर्वा घृताक्ताभिः मूलमन्त्रेण जुहुयात्। आज्यावसिक्तं चरुं ग्रासमुद्रया नृसूक्तेन हस्तेन वा पलाशपत्रेण वा षोडशाहुतीर्हुत्वा। स्रुवेणाज्येन समित्सङ्ख्यया च मूलमन्त्रेण जुहुयात्। परिषिच्य। ( अत्र तत्तत् कार्यानुसारित हवनं सङ्कल्पपूर्वकं कुर्यात् ) श्रीभगवदाज्ञया भगवत्कैङ्कर्यं कुक्कुटाण्डप्रमाणेन स्विष्टकृद्धोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

कुक्कुटाण्डप्रमाणं घृताप्लुतं चरोः पिण्डं स्रुगावर्ते निक्षिप्य। स समिद्दर्भकुसुमं स्रुवेणाभिघार्य। नासिकाग्रान्तम् उद्धृत्य। (ओं अतो॑दे॒वा अ॑वन्तुनो॒यतो॒ विष्णु॒र्वि॑चक्र॒मे। पृ॒थि॒व्यास्स॒प्तधाम॑भिः। इ॒दं विष्णु॒ र्वि॑च॑क्रमे त्रे॒धा नि द॑धे प॒दम्। सम॑ूढमस्यपाꣳसु॒रे )। ओं नमो भगवते वासुदेवाय स्विष्टकृते स्वाहा।

परिषिच्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यम् एतत् कार्यमध्ये सम्भावित – मन्त्रलोप – तन्त्रलोप – क्रियालोप – श्रद्धालोप – नियमलोप – आज्यलोप – द्रव्यलोपादि प्रायश्चित्तार्थं न्यूनातिरेक शान्त्यर्थं पञ्चोपनिषन्मन्त्रैः शान्तिहोमं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य।

ओं षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा।

ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा।

ओं रां नमः पराय विश्वात्मने प्रद्युम्नाय स्वाहा।

ओं वां नमः पराय निवृत्त्यात्मने अनिरुद्धाय स्वाहा।

ओं लां नमः पराय सर्वात्मने श्रीमते नारायणाय स्वाहा।

सर्वं श्रीविष्णवे स्वाहा। विष्णवे परमात्मने इदम्। परिषिच्य। श्रीभगवदाज्ञया भगवत्कैङ्कर्यं पूर्णाहुतिं करिष्ये इति सङ्कल्प्य। अप उपस्पृश्य। परिषिच्य। स्रुचम् आज्येन सम्पूर्य। स समिद्दर्भकुसुमं स्रुवेणपिधाय। आनासिकमुद्धृत्य। ओं इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाँसुरे इति वा मूलमन्त्रेण वा पूर्णाहुतिं हुत्वा। आत्मनः अग्रे स्रुचं निधाय। तस्य दक्षिणतः आज्यस्थालीं स्रुगुत्तरे स्रुवञ्च निक्षिप्य। उपयुक्तकुशान् सर्वान् हस्ताभ्याम् उदगग्रं गृहीत्वा। आज्यपात्रे मूलम्। स्रुचो मध्ये मध्यम्। स्रुवगर्ते अग्रं यथाक्रमं स्पर्शयित्वा। एवं त्रिः कृत्वा। दर्भान् अग्नौ निक्षिप्य।

अनूयाज – परिधि – ऊर्ध्व समिधश्च क्रमेण हुत्वा।

| | |
|---|---|
| अदिते अन्वमँस्ताः | सरस्वते अन्वमँस्ताः |
| अनुमते अन्वमँस्ताः | देवसवितः प्रासावीः |

आत्मनः अग्रे प्रणीतां संस्थाप्य। प्रोक्षणीजलं तस्यां संयोज्य। प्राच्यादिसोमान्तं संसिच्य। पश्चिमायां निक्षिप्य। स्वात्मानं संप्रोक्ष्य। ओं कं ब्रह्मणे नमः इति ब्रह्माणमुद्वास्य। स्रुक्स्रुवौ जलेन सम्पूर्य। वर्मणा परिषिच्य। शेषेण आत्मानं सम्प्रोक्ष्य। अग्निस्थं भगवन्तमुद्वास्य ( ओं यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। तेहनाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः। ) ओं नमो भगवते वासुदेवाय इति स्वहृदये विसृज्य ( कुम्भे वा मण्डले )। शिरसि भस्मना तिलकं कृत्वा। हस्ते पुष्पं गृहीत्वा। देवं विज्ञाप्य।

भक्त्या यदग्नौ विहितं यथाशक्ति यथाविधि।
आराधनं तवैवेदं गृहाण परमेश्वर॥

ज्ञानतोऽज्ञानतो वापि यथोक्तं नकृतं मया।
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा॥
ओं अच्युत जगन्नाथ मन्त्रमूर्ते जनार्दन।
रक्ष मां पुण्डरीकाक्ष क्षमस्वाथ प्रासीद ओं ॥
भूमौ स्खलितपादानां भूमिरेवावलम्बनम्।
त्वयि विप्रतिपन्नानां त्वमेव शरणं विभो॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात्कारुण्य भावेन रक्ष रक्ष जनार्दन॥
तर्पितोऽसि विभो भक्त्या होमेनानलमध्यग।
होमद्रव्येषुयद्वीर्यं तदिदं चात्मसात् कुरु॥
मन्त्रहीनं क्रियाहीनं द्रव्यहीनमभक्तिकम्।
तत्सर्वं क्षम्यतां देव दीनं माम् आत्मसात् कुरु॥
उपचारापदेशेन कृतानहरहर्मया।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यद्धुतन्तु मया देव परिपूर्णं ततस्तु ते॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै।
यानितेषामशेषाणां कृष्णानुस्मरणं परम्॥

सर्वं श्रीकृष्णार्पनमस्तु। इति देवं साष्टाङ्गं प्रणम्य। ओं रं बालाग्नये नमः उद्वासयामि इति अग्निमुद्वासयेत्॥

अग्नौ आराधनहवनेषु स्नानशयनासनं विना भवेत्।

श्रियादि समस्त परिवाराणामुद्दिश्य होमेषु नतु मन्त्रासनाद्युक्तम् आराधन हवनम्। षोडशोपचारैः एव हुनेत्॥

## अग्नि विकल्पः

नित्याग्निर्वृद्ध इत्युक्तः उत्सवाग्निर्युवाभवेत्।

दीक्षाशान्तिप्रतिष्ठाग्निः बाल इत्यभिधीयते॥ - पाद्मे

एवं तत्तत् कर्मानुगुणम् अग्निं ध्यात्वा

## समिधां दोषाः तत्तत् फलञ्च

समिधाम् आयामः - एकताल: - कनिष्ठानहनं भवेत्। चर्महीने – विनाशः।

भेदे – कुलक्षीणम्। आर्द्रासु – बन्धुनाशम्। पुरातने – पुत्रनाशम्।

क्षतासु – भार्यामरणम्। शाखिनी – कलहम्। स्थूला – उद्वेगः।

ह्रस्वाः – अनिष्टसिद्धिः ( अवग्रहकारिणी )। आयामातीताः – अतिवृष्टिः।

एवं दोषाः ज्ञात्वा॥

## होमद्रव्य फलम्

अश्वत्थ समिधा – सर्वशान्तिः। पुष्पैः – सौभाग्यम्। धूपद्रव्यैः – आरोग्यम्।

दध्ना – पुष्टिः। पयसा – शुचिः( शुद्धिः)। अन्नेन – विविधकामाः अन्नप्राप्तिश्च।

आज्य – दूर्वयोश्च – ज्ञानञ्च दीर्घायुष्मतीयाः प्रजाः च। श्वेतपद्मेन – ब्रह्मतेजः।

कमल – बिल्व – सिद्धार्थाश्च – ऐश्वर्यं – ऋणविमोचनञ्च। कृष्णपुष्पेण – इष्टकन्याः। गोमयेन – गावः। यवागुना – इन्द्रियाणि।

तिलेन – सर्वजनप्रीतिः। पलाशसमिधा – ब्रह्मवर्चः।

वेणु – यव – नीवार – शालिभिः – सर्वाभीष्टम्। लाजेन – सर्वमङ्गलम्।

पायसेन – पुत्रप्राप्तिः। आज्येन – सर्वप्राप्तिः एवं ज्ञात्वा ॥

## होमद्रव्य परिमाणाः

सर्पः – मधु – क्षीराणि – चतुरङ्गुल धाराः। दधि – शुक्तिमात्रम्।
पायसं – ग्रासमात्रम्(कबलम्)। फलम् – अखण्डितपुष्पं – भक्ष्याणि –
अर्धकबलमात्रम्। तिल – व्रीहि –यवानि – मुष्टेः पादमात्रम्।
धूपद्रव्यं – निष्पाववीजमात्रम्। समिधम् – अष्टाङ्गुलेन तदर्धेन वा।
दूर्वा – षडङ्गुलेन। गोमयं – मृद्वीकाक्षप्रमाणेन।
पूर्णाहुति समये घृतस्य – कुडुपमानम् इति विधिः।
एतेषां द्रव्याणां परिमाणे न्यूनाधिख्ये दोषाः भवन्ति॥

अग्नि कार्य विधिः सम्पूर्णम्

----------*****----------

श्रीः

## नित्यस्नपन विधिः

देवस्य स्नानासने – अस्यदेवदेवस्य-------सन्निधौ नित्याराधनाङ्ग स्नपनं करिष्ये इति सङ्कल्प्य। पुण्याहं वाचयित्वा। तज्जलेन सर्वाणि स्नपन द्रव्याणि घटानि च प्रोक्ष्य। अर्धमण्डप मध्ये प्रागुदक् सूत्रं षण्णिपात्य। तदुपरि प्रत्याच्छादनेन शाली तण्डुल तिलैः धान्यराशिं कृत्वा।तत्र सुवर्णादि लोहजान् मृण्मयान् प्रक्षालितान् सूत्रवेष्टितान् नव कलशान् ब्रह्मादीशानान्तं संस्थाप्य। तान् घृत – पाद्य – दधि – अर्घ्य – क्षीर – आचमन – मधु – पञ्चगव्य – फलैः  प्रत्येकम् आपूर्य। सवस्त्र – रत्न – अवागग्रकूर्च – अश्वत्थपल्लवापिधानं कृत्वा। मध्य कुम्भे परवासुदेवं द्वादशाक्षरेणावाह्य। अष्टकुम्भेषु विष्ण्वादि

दामोदरान्त मूर्तयः तत्तन्नामेन दिक्विदिक् क्रमेणावाह्य। अर्घ्यादिभिः अभ्यर्च्य।

निवेद्य। नीराज्य। देवं स्नानासन उपचारै उपचर्य।

इदं विष्णु______सुरे – इति पाद्य कुम्भेन

आपोहिष्ठा______जनयथाचनः – इति अर्घ्य कुम्भेन

इमम्मे वरुण______प्रमोषीः – इति आचमन कुम्भेन

इमं मे वरुण श्रुधीहवमद्याच मृडय। त्वामवस्युराचके।

तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः।

अहेडमानो वरुणे हबोध्युरुशꣳ समान आयुः प्रमोषीः॥

पवित्रन्ते – इति पञ्चगव्य कुम्भेन

पवित्रन्ते विततं ब्रह्मणस्पतेः। प्रभुर्गात्राणि पर्येषि विश्वतः।

अतप्ततनु नततापो अश्नुते। शृतास इद्वहन्तस्तत्समाशत॥

दधिक्राव्णो______तारिषत् – इति दधि कुम्भेन

दधिक्राव्णो अकारिषञ्जिष्णोरश्वस्य वाजिनः।

सुरभिनो मुखाकरत् प्रण आयूꣳषितारिषत्॥

पयोव्रत साम्ना______क्षीर कुम्भेन

इ२योऽ३। इया२। इ१योऽ२इ१या। इ२योऽऽ३। इया२।

अग्ने१युक्ष्वा१हीऽ३ ये२तवा। अग्ने१युक्ष्वा। ही२य१तवा। अ२ग्ने१युक्ष्वा१

हीऽ३ये१तवा। इयोऽ३। इया२।इ१योऽ२इ१या। इ२योऽ३ इया२।

अश्वा१सो१ दा१इवाऽ३ सा२धवाः। अ१श्वासो१दाइ। वा२सा१धवाः।

अ२श्वा१सो१दा१इ वाऽसा२धवाः। इयोऽ३। इया२। इ१योऽ२इ१या।

इ२योऽ३। इया२। अरंवहा१न्तीऽ३ आ२शवाः। अरं१वहा।

तीरयाशवाः। अरंवहान्तीऽ३ आरशवाः। इरयोऽ३। इया२।

इयाऽरइया। इरयो इयाऽ३उवारऽ३। आऽ२। (त्रिः) हस्

स्थिएरऽ३ पयाऽर३४५ः॥

मधुवाता______भवन्तुनः – इति मधु कुम्भेन

मधुवाता ऋतायते मधु क्षरन्तिसिन्धवः। माध्वीर्न

स्सन्त्वोषधीः।मधु नक्तमुतोषसि मधुमत् पार्थिवꣳ रजः।

मधुद्यौरस्तुनः पिता। मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः।

माध्वीर्गावोभवन्तु नः॥

याःफलिनी______त्वꣳहसः – इति फलवारिणा

याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः।

बृहस्पति प्रसूता स्तानोमुञ्चन्त्वꣳ हसः॥

घृत स्नात साम्ना – घृत कुम्भेन

घृतवतीभुवनानाम्। भाऽ५इश्रिया। उर्वीपृत्वीमधुदुघे

सुपेशाऽरसा। द्यावापृथिवीवरुणा। स्याधर्मणा।

वाइष्करभिताइ। अरजरेऽरभूरि। रायेरऽ३। तसारउवाऽ३।

इन्दुस्सरमुद्रमुर्विरयाविभारतीऽर३४५॥

संस्नाप्य। प्रति द्रव्य घटाप्लवं उपस्नान – प्लोतवस्त्रोत्तरीय – अर्घ्यपाद्याचमन – गन्ध – पुष्प – धूप – दीप प्रदान सहितं समभिषिच्य। अनन्तरं सहस्रधारा स्नानं कारयेत्॥

नित्य स्नपनं समाप्तम्

----------*****----------

श्रीः

## भगवदाराधन योग्य पुष्पाणि

## पुष्पाणां श्रेष्ठत्वम्

புஷ்பங்களின் உத்தமம்

पुष्पाणि नन्दवनादारामादात्मानोऽपि वा।

आरण्याद्वा गृहीत्वा च विक्रियान्यापणस्थलात्।

अयाचितानि लब्धानि यद्वा कमलसम्भव॥ - पाद्मे

நந்தவனத்திலிருந்து வந்தவையோ, தன் வீட்டுத்தோட்டத்திலிருந்து பறித்ததோ, காட்டிலிருந்து வந்தவையோ, கடையிலிருந்து விலைக்கு வாங்கப்பட்டவைகளோ எந்த புஷ்பங்பகளாயினும் இரவல் வாங்காத புஷ்பங்கள் உத்தமம் ஆகும்.

## पूजने निषिद्ध पुष्पाणां लक्षणम्

பூஜையில் தவிர்க்க வேண்டிய புஷ்பங்கள்

अन्यायोपार्जितम् - அந்யாயத்தால் (திருடி) வந்தவை

अन्यदेवतार्थानि - பிற தேவதைகளுக்கென வந்தவை

भिन्नम् - கிழிந்த பூக்கள் (கசங்கியது)

मुकुलम् - மொட்டு

पातितम् - கீழேவிழுந்தது

जीर्णम् - அழுகியது

पर्यूषितम् - பழைய புஷ்பம் (நேற்றையது)

कीटदूषितम् - புழுக்களைக்கொண்டது (அ) புழுக்களால் சேதமடைந்தது

पादलङ्घितम् - காலால் தாண்டப்பட்டது

म्लानम् - வாடியது

अस्पृश्यैःनीतम्, अस्पृश्यैः स्पृष्टम् - தீண்டத்தகாதாரால் வந்தது, தீட்டுள்ளவர்கள் தொட்டது

प्रतिलोमजैः आगतम् - ப்ரதிலோமர்களால் கொண்டுவரப்பட்டது

## पुष्पाहरण विधिः

புஷ்பங்கள் பறிக்கும் முறை

स्नातश्शुद्धाम्बरो मौनी पादौ प्रक्षाल्य वारिणा।

पात्रे पुष्पाणि गृह्णीयाद्विविजे तृणजेऽथवा॥ - पाद्मे

ஸ்நாநம் செய்து மடிவஸ்த்ரம் தரித்து மௌனமாய் கைகளை அலம்பிக்கொண்டு பிரம்பாலான கூடையிலோ அல்லது புற்களாலான கூடையிலோ பூக்களை பறித்துச் சேர்க்க வேண்டும்.

## पूजने योग्य पुष्पाणि (वृक्षपुष्पाणि)

திருவாராதனத்திற்குறிய புஷ்பங்கள்

कल्पकः - கற்பகப் பூ

पारिजातः - பவழமல்லிகைப்பூ

हरिचन्दनः - ஹரிசந்தனமரப்பூ

सन्तानम् - ஸந்தானமரப்பூ

मन्दारम् - மந்தாரமரப்பூ

सौगन्धिकम् - ஸௌகந்திமரப்பூ

पलाशम् - புரசமரப்பூ

इमानि उत्तमानि

# कालभेदेन पुष्प भेदाः

## प्रातः काल पुष्पाणि

காலை வேளைக்கு உண்டான புஷ்பங்கள்

पद्मद्वयम् - இருவித தாமரை

उत्पल त्रयम् - மூன்றுவித நெய்தல்

शतपत्रिका - அருகம்புல்

चम्पकः - செண்பகப்பூ

केतकी - தாழம்பூ

श्रीमन्मालती - குருக்கத்திப்பூ

माधवी - ஜாதி முல்லை

नन्द्यावर्तम् - நந்தியாவட்டை

पुन्नागम् - சுரபுன்னை

सुरपर्णी - ஸுரபர்ணீ

एकपर्णी - ஏகபர்ணீ

प्रियङ्गु - ஞாழல் (அ) குங்குமப்பூ

पाटलद्वयम् - இருவகை பாதிரிப்பூ

मन्दारद्वयम् - இருவகை மந்தாரை

लक्ष्मी - ருத்தி எனும் மூலிகைப்பூ

कर्णिकारः - சரகொன்றைப்பூ

यूथिका -காட்டு மல்லிகை (அ) காட்டு முல்லை

कुरवः - மருதாணிப்பூ

पट्टिका - ஏழிலைப்பாலைப்பூ

## माध्याह्निक पुष्पाणि

மத்யாஹ்னத்திற்கு உண்டான புஷ்பங்கள்

श्वेतकरवीरम् - வெள்ளை அலரி (அரளி)

किङ्करतम् - மலைவேம்புப்பூ

सौवर्णम् - கொன்றைப்பூ

सहचरी - குறிஞ்சிப்பூ

## प्रदोषकाल पुष्पाणि

ப்ரதோஷ காலத்திற்கு உண்டான் புஷ்பங்கள்

जातीयुग्मम् - இருவகை ஜாதிப்பூ

विचकिलम् - மருகு

मल्लिकाद्वयम् -இருவகை மல்லிகைப்பூ (செடி, கொடி)

वकुलम् - மகிழம்பூ

वनजाती - காட்டு ஜாதிப்பூ

वनमल्लिका - காட்டு மல்லிகை

कुमुदम् - ஆம்பல் (அல்லி)

प्रातःकालोदितं पुष्पं युक्तं मध्यन्दिनेऽपिच।

प्रदोषे कथितं पुष्पं मध्यरात्रेच शस्यते।

दिवापुष्पैर्दिवा पूजा निशापुष्पैस्तथा निशि॥ - पाद्मे

காலைக்கு என்று கூறப்பட்ட பூக்கள் மத்யான்னத்திற்கும் ஏற்றவையே. ப்ரதோஷத்திற்கு சொல்லப்பட்ட பூக்கள் அர்தராத்ரி பூஜைக்கு ஏற்றவையே. பகலில் சொல்லப்பட்ட பூக்களை பகலிலும் இரவில் சொல்லப்பட்ட பூக்களை இரவிலும் உபயோகப்படுத்த வேண்டும். மாற்றிச்செய்யலாகாது.

## एतेषां पुष्पाणाम् अलाभे

அந்தந்த கால புஷ்பங்கள் கிடைக்கவில்லையானால்

उषःकाले – नन्द्यावर्तम् விடியற்காலையில் நந்தியாவட்டை

प्रातःकाले – मालती காலையில் மாலதி என்ற ஜாதிப்பூ

मध्याह्ने – करवीरम् மத்யாஹ்னகத்தில் அலரி (அரளி)

सायाह्ने – जातीपुष्पम् ஸாயங்காலத்தில் ஜாதிப்பூ

प्रदोषे – वकुलम् ப்ரதோஷத்தில் மகிழம்பூ

अर्धरात्रे – मल्लिका அர்த்த ராத்ரியில் மல்லிகைப்பூ

सदाकाले - जलजम् எப்பொழுதும் தாமரை போன்ற நீர் புஷ்பங்கள் உபயோகிக்கலாம்

अबद्धेभ्यो प्रसूनेभ्यो बद्धमाला प्रशस्यते।

मालाभ्यः स्रग्वरामाला सजातीया प्रसूनजा।

स्रक् तु नानाविधैः पुष्पैर्निर्मिता कदलीत्वचा॥ - पाद्मे

கட்டாத பூக்களைவிட கட்டிய மாலையே (சரங்கள்) சிறந்தது. ஒரே பூவில் கட்டியமாலையை விட பலவகை பூக்கள் சேர்த்துக்கட்டியது சிறந்தது. அவைகளை வாழை நாரில் கட்டினால் உயர்ந்தது.

## <u>पर्युषति रहित पुष्पाणि</u>

பர்யுஷிதமாகாத புஷ்பங்கள்

पद्मादि जलपुष्पाणर्वाक् कर्तुस्त्रयोद्भवेत्।

न च पर्युषितो दोषो नीरजानां भवेत्तथा॥ - पाद्मे

தாமரை முதலான நீர் புஷ்பங்களுக்கு மூன்றுநாள் வரை பர்யுஷிதம் இல்லை.

## <u>सदा पर्युषित रहित पुष्पाणि</u>

எப்பொழுதும் பர்யுஷிதமாகாத புஷ்பங்கள்

ह्रीबेरम् - குருவேர் (விளாமிச்சை வேர்)

तमालम् - பச்சிலை

दमनकत्रयम् - மருகு, மரிக்கொழுந்து

## <u>सदाकाले उपयोग्य दलानि</u>

எப்பொழுதும் உபயோகமான தளங்கள்

सित कृष्ण तुलस्यौ - துளசி, கருந்துளசி

केवलः - கஞ்சாங்கோரை என்ற கேவல துளசி

क्षपकः - திருநீற்றுப்பச்சை என்ற க்ஷபக துளசி

दूर्वा - அருகம்புல்

बिल्वः - வில்வம்

पूजितन्तु करवीरैः गृहे कुलक्षयकरी॥ - पाद्मे

க்ருஹத்தில் எப்பொழுதும் அலரி (அரளி) பூக்களால் பூஜை பண்ணக்கூடாது. அவை குலநாசத்தைத் தரும்.
(கோயில் எம்பெருமானுக்கு சாற்றியதாக இருந்தால் தோஷமில்லை)

अनिर्माल्यानि देयानि पुनः प्रक्षाल्य वारिभिः ॥ - पाद्मे

புதிய பூக்களாக இருந்தாலும் தீர்த்தத்தால அலம்பியே (ப்ரோக்ஷித்து) உபயோகப்படுத்த வேண்டும்.

---------------------- पुष्पपत्राद्यसन्निधौ ।

अक्षतैः अर्चनं कुर्याद्धरेः कलमजैस्सितैः ॥ - पाद्मे

புஷ்பமோ தளங்களோ இல்லாவிடில் **அக்ஷதையால்** எம்பெருமானை அர்ச்சிக்கவேண்டும்.

पुष्प विधानम् सम्पूर्णम्

----------*****----------

श्रीः

# भगवदाराधन विषये प्रमाणानि

भट्टाचार्याणां योग्यता विशेषः

चतुर्वेदविदो विप्रान् प्राहुः श्रोत्रिय संज्ञिकः।

दशश्रोत्रिय तुल्यस्तु अर्चकः पाञ्चरात्रवित्।

दशाऽर्चकः समःपूर्णः दशपूर्ण समोगुरुः।

गुरूणां दशभिस्तुल्यः भट्टाचार्यस्स उच्यते॥ - विहगेन्द्रे

आचार्य पदनिरुक्तिः

आचिनोतिहि शास्त्रार्थान् आचारे स्थापयत्यपि।

स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते॥ - पराशरे

आकारादागमज्ञेयः चकारोऽऽचार कोविदः।

यकारोयाज्ञिको ज्ञेयः आचार्यः परिकीर्तितः॥ - परमपुरुषम्

अमन्त्रमर्चकेन प्रत्यवायः

सर्पं दृष्ट्वा महाकायः कंपते च मुहुर्मुहुः।

अमन्त्रमर्चकं दृष्ट्वा दूरेभ्येति जनार्दनः॥ - विष्णुतत्वे

व्याघ्रं दृष्ट्वा महारण्ये पुरुषो कम्पयेत् द्विजः।

अमन्त्रमर्चकं दृष्ट्वा दूरो याति जनार्दनः॥

अन्त्यकाले च मृत्युञ्च दृष्ट्वा जीवो यथा भवेत्।

तथाऽर्चकं पापिनं दृष्ट्वादूरेऽभ्येति जनार्दनः॥ - पराशरे

अमन्त्रमर्चकेन अकालपूजनेन दोषाः

अमन्त्रमर्चनं कुर्यात् दूरे भीतो जनार्दनः।
छाया मृगपतिं दृष्ट्वा गजवद्भीत कम्पितः।
क्रिया शरीरमित्युक्तं तन्मन्त्रं जीवमुच्यते।
मन्त्रहीनं क्रियाहीनं तच्छक्त्या निष्फलं भवेत्।
अमन्त्रमर्चनं कुर्यात् अकालेचापि पूजनम्।
ग्रामनाशश्च दुर्भिक्षं राजराष्ट्रो विनश्यति॥ - परम संहिता

पाञ्चरात्रिक दीक्षित विशेषः

विष्णोरागम शास्त्रज्ञः पूजने दीक्षितो द्विजः।
अन्यविप्रैः अर्चयेद्वा सर्वे देवलकः स्मृतः।
दीक्षितो यो निजश्शुद्धः पाञ्चरात्र कृतश्रमः।
स एव भगवद्रूपं विष्णुपादनलोबिनः॥ - पाद्मे

दीक्षा स्वीकारेणैव देवस्य पूजनम्

पाञ्चरात्रोक्त मार्गेण यो दीक्षा चक्रमण्डले।
कृत्वासमर्चनं विष्णोः द्विषड्ढाक्षरविद्यया।
आराधयेत् सशास्त्रोक्त विधिनादेशिकोत्तमः।
तेषां हृदंबुजे साक्षात् आविरस्ति पदः पुमान्।
तरन्ति विष्णुमायान्ते नतरन्तीतरे जनाः॥ - पाद्मे

अर्चकस्य वयः क्रमः

आचार्यो मन्त्रसंपूर्णः ज्ञानसंपूर्ण दीक्षितम्।
गुरुश्च शास्त्रसंपूर्णः सर्व संपूर्णवंशजाः॥
आ षोडशाब्द पर्यन्तं बाल इत्यभिधीयते।

पञ्चविंशति संपूर्ण वत्सरस्य युवाभवेत्।

परं समो मध्यमः षष्टिवर्षाऽवसानकम्।

अत ऊर्ध्वान्तरं श्रेष्टं जीर्णमित्यभिधीयते॥ - परम संहिता

कार्य भेदेन आचार्य भेदाः

नित्याराधनविधौ बालः उत्सवादा युवा भवेत्।

स्थापने प्रोक्षणं कर्तुं वार्धकः दीक्षितेपि च॥ - परम संहिता

अर्चकस्य दर्शने फलम्

दर्शनन्त्वर्चकस्यापि हरिभावेन केवलम्।

सर्वसम्पत्करं भूयात् सर्वपातक नाशनम्॥ - परमपुरुषम्

बिम्ब सान्निध्य अतिशयः

आचार्यो मन्त्रसम्पूर्णः क्रिया पूर्णस्तु शिल्पिनः।

दातारो वित्त सम्पूर्णः बिम्बसान्निध्य कारणम्॥ - ( अभियुक्तिः )

अर्चकस्य तपोयोगात् पूजायाश्चाऽतिशयेन च।

आभिमुख्याश्च बिम्बस्य तत्र सन्निहितो हरेः॥ - पारमेश्वरे

भगवतः अर्चकयोः भावना विशेषः

आचार्य शिश्यवन् मन्त्रविष्टरे स्नपनासने।

जननीव शिशुं रथ्यां सतीव प्रिय नायकम्।

अलङ्कारेऽतिथिश्चैव भोज्यायां गृहस्तवत्।

यात्रासनेतु शय्यायां नृपं मन्त्रीव सेवकः।

प्रार्थनायां मित्रवच्च देवं ध्यायेत पूजकः॥ - श्रीप्रश्ने

अनर्चक लक्षणम्

पञ्चसंस्कार रहिताः शिखाकौपीन वर्जिताः।
नित्यकर्मादिरहितः अनर्चक इति स्मृतः॥
प्रपत्ति रहितस्सोपि अधमश्च भवेन्मुने।
अनर्चक द्विजादीनां तीर्थपानं सुरा समम्।
प्रसादं मांसतुल्यञ्च चन्दनं रुधिरं भवेत्॥ - पराशरे

अर्चकेषु देवलकत्वम्

प्रस्थ तण्डुलमुद्दिश्य योदेवार्चनं चरेत्।
सवै देवलकोनाम ब्रह्मगादिषु गर्हितः॥ - ह्रीप्रश्ने

आचार्य स्नान विधिः

स्नानमूलाः क्रियाः सर्वाः स्नानञ्च बहुधा स्मृतं।
वारुणं दिव्यमाग्नेयं वायव्यं पार्थिवं तथा।
मान्त्रं मानसमित्येवं स्नानं सप्तविधं भवेत्॥ - पाद्मे

तेषां लक्षणानि

वारुणम्, दिव्यम्

अवगाहनमप्स्वन्तर्वारुणं स्नानमुच्यते।
सहातपेन वर्षेण स्नानंदिव्यमनन्तरम्॥ - पाद्मे

आग्नेयम्

समिधां दीपितानाञ्च गोमयस्य हुतस्य च।
सितेन भस्मनाङ्गेषु ललाटादिषु च क्रमात्।
यदूर्ध्वपुण्ड्रकरणं मन्त्रोच्चारणपूर्वकम्।
तदाग्नेयं भवेत्स्नानं शोधनं परमं स्मृतम्। - पाद्मे

वायव्यम्

गच्छत्सु गोषु पादोत्थै रजोभिर्भुवि सम्भवैः।

स्पर्शनं वपुषस्स्नानं वायव्यं तदुदाहृदम्॥ - पाद्मे

पार्थिवम्

प्रशस्ते पर्वताग्रादौ जातया श्वेतमृत्स्नया।

उच्चार्य केशवादीनि नामान्यङ्गे यथाक्रमम्।

ललाटादौ यद्विधानम् ऊर्ध्वपुण्ड्रस्य तद्भवेत्।

ऊर्ध्वपुण्ड्रं मृदा धार्यं सान्तरालं त्रयङ्गुलम्।

लक्ष्म्या सार्धं सुखासीनो रमते तत्र निर्वृतः।

पार्थिवं---------------------------------॥ - पाद्मे

मन्त्रम्

पार्थिवं स्नानमब्लिङ्गैः मन्त्रैर्विप्रवरेरितैः।

अम्भोभिः प्रोक्षणं ब्रह्मन् तन्मन्त्रस्नानमिष्यते॥ - पाद्मे

मानसम्

द्विराचम्याहतं वासः परिधाय सुखासन।

प्राणानायम्य मां ध्यायेत् हृदयाम्भोरुहे स्थितम्।

ध्यानेनानेन निर्धूतकल्मषो जायते पुमान्।

स्नानं मानसमेतत्स्यात् स्नातश्च हरिमर्चयेत्॥ - पाद्मे

अर्चकस्य अलङ्करणम्

यत्किञ्चिद्द्वलं पुष्पं यत्किञ्चिदनुलेपनम्।

अलक्ष्म्याः परिहारायैर्नित्यं धारयेद्द्विजोत्तम।

अङ्गरागैः गन्धमाल्यैः वस्त्रविचित्रकैः।

रत्नाङ्गुलीयकैः चित्रैः भूषणैः विविधैः शुभैः।

हेमयज्ञोपवीतेन उत्तरीयेण भास्वतः।

दुकूलैः सूक्ष्मवस्त्रैश्च उष्णीषमुखवाससैः।

कटकैर्वलयैश्चैव केयूरैः पट्टबन्धनैः।

वस्त्राभरण माल्यैश्च सर्वालङ्कार शोभिताः।

अभुक्तो वा सुभुक्तो वा कृतकृत्यश्च पूजकः।

सपवित्र उभौहस्तौ शुचिर्भूत्वा समाहिताः॥ - जयोत्तरे

<u>ऊर्ध्वपुण्ड्रस्य आवश्यकत्वम्</u>

श्रीचूर्ण रहितं पुण्ड्रं कदाचिन्नैव कारयेत्।

धारयेद्यदि मोहेन तत्पुण्ड्रंस्यादनर्थकम्।

श्रीचूर्ण सहितं पुण्ड्रं विष्णुस्थानं प्रकीर्तितम्।

नोचेत् ज्येष्टागृहं विद्याब्  त् तस्मात्तत् धारयेत् द्विज।

स पवित्रेण करेणैव धारयेदूर्ध्वपुण्ड्रकम्।

चन्दनाऽलेपनंचैव तद्दानञ्चैव वर्जयेत्॥ - सनक संहिता

<u>ऊर्ध्वपुण्ड्र आकार भेदाः</u>

वश्यार्थीरक्तयाचूर्णं पीतया शान्तिकामिका।

श्यामयामोक्षकामीच श्वेतयाचोर्ध्वपुण्ड्रकम्।

वर्तिदीपाकृतिंचैव वेणुपत्राकृतिं तथा।

पद्मस्यमुकुलाकारं उत्पलं मुकुलाकृतिम्।

मथ्स्यकूर्माकृतिं चैव शङ्खाकारमतःपरम्॥ - पारमेश्वरे

ऊर्ध्वपुण्ड्र धारण विधिः

प्रशस्ते पर्वताग्रादौ जातयाश्वेतमृत्स्नया।
उच्चार्य केशवादीनि नामान्यङ्गे यथाक्रमम्।
ललाटादौ यद्विधानम् ऊर्ध्वपुण्ड्रस्य तद्भवेत्।
ऊर्ध्वपुण्ड्रं मृदाधार्यं सान्तरालं त्र्यङ्गुलम्।
लक्ष्म्यासार्धं सुखासीनो रमते तत्र निर्वृतः॥ - पाद्मे

ऊर्ध्वपुण्ड्र सङ्ख्या निर्णयः

ललाटादिषु द्वादशसु धरेत्पुण्ड्राणि वै द्विजः।
षट्पुण्ड्राण्यथवाप्येकं ललाटे धारयेद्रमे॥ - श्रीप्रश्ने

ऊर्ध्वपुण्ड्र आकार भेदेन फलानि

पुष्टिदेनाङ्गुष्ठेन तर्जन्या मुक्तिसिद्धये।
वाञ्छितार्थदायिन्या मुनेऽनामिकयाऽथवा।
आयुष्कामी मध्यमया अङ्गुल्याचाऽथ देवताः।
एताभिरङ्गुलीभिस्तु कारयेन्न नखैः स्पृशेत्॥ - पारमेश्वरे

ऊर्ध्वपुण्ड्रस्य अधिदेवताः

ललाटे केशवं विद्यात् नारायणमथोदरे।
माधवं हृदयेकुर्यात् गोविन्दं कण्ठकूपके।
उदरे दक्षिणेपार्श्वे विष्णुरित्यभिधीयते।
तत्पार्श्वे बाहुमध्येतु मधुसूदन इष्यते।
त्रिविक्रमं कण्ठकूपे वामे कुक्षौतु वामनम्।
श्रीधरं वामबाहौ च हृषीकेशन्तु कण्ठके।
अपरे पद्मनाभं तु ककुद्दामोदरं स्मरेत्॥ - पारमेश्वरे

श्रीचूर्णस्य लक्षणम्

विष्ण्वर्पितं रक्तवर्णं हरिद्राचूर्णमुत्तमम्।
लक्ष्मी निवाससिद्ध्यर्थं दीपाकारं सुसूक्ष्मकम्।
ऊर्ध्वपुण्ड्रस्य मध्येतु ललाटे धारयेद्विज॥ - पराशरे

ऊर्ध्वपुण्ड्र रहित कार्याणां निष्फलत्वम्

यज्ञो दानो तपो होमो भोजनं पितृकर्मच।
ततस्सर्वं निष्फलं प्रोक्तं ऊर्ध्वपुण्ड्रविनाकृतम्।
तस्मात् सर्वप्रयत्नेन धारयेत् सर्वसिद्धिदम्॥ - पारमेश्वरे

कण्ठे तुलसीमाला धारणफलम्

कण्ठमूलेतु तुलसीं यस्तु धारयते नरः।
अहोरात्रकृतं पापं तस्य नश्यति तत्क्षणात्॥ - अगस्त्ये

मन्त्र लिङ्गत्रय भेदाः

ऐहिकाऽमुष्मिकं सर्वं मन्त्रेणैव प्रसिद्यति।
स्त्रीपुंनपुमिति त्रैवं भजन्ते मन्त्र जातयः।
संस्त्यानमन्त्राः स्वाहान्ताः नमोन्तासु नपुंसकाः।
शेषाः पुरुषमन्त्राः स्युरिति त्रिविधमीरितम्॥ - पाद्मे

आचमन तीर्थ लक्षणम्

वस्त्रं तु त्रिणीकृत्य पाणौ पाणि निवेशयेय्।
गोकर्णवत् करं कृत्वामाषमग्नजलं पिबेत्।
तन्यूनं अधिकंपीत्वा सुरापानसमं भवेत्॥ - विष्णु संहिता

पूजन कालभेदेन मन्त्रभेदाः

प्रातःकाले उपनिषदः मध्याह्ने पौरुषं भवेत्।

नारायणोपनिषद्रात्रौ त्रिकालं वेदपारगैः॥ - अनन्ताख्ये

पूजायाम् अन्यत्र नामानि

अर्चनं पुजनं पूजा याग माराधनं तथा।

अर्चना च प्रपूजा च समाराधनमेवच।

संपूजनञ्च नवधा कथितान्यर्चनाविधौ॥ - अगस्त्ये

परत्वादिषु पाञ्चरात्रेणैव पूजनम्

वैकुण्टे सत्यलोके क्षीराब्दौ रविमण्डले।

पातालादिषु लोकेषु पाञ्चरात्रेण पूजयेत्।

यत्र अष्टाक्षरसंसिद्धाः महाभाग्यो महीयते।

तत्र न संचरिष्यन्ति व्याधि दुर्भिक्ष तस्कराः।

भक्तियुक्त स्वभावेन कुर्याद्देवस्य पूजनम्॥ - परम संहिता

देव दर्शन विधिः

आपीठान्मौलिपर्यन्तम् अवलोख्य हरिं विभुम्।

उपेत्यायतनं विष्णोः प्रणिपद्य ततस्ततः।

परिस्थुत्यच देवेशं प्रणम्य आत्मानमर्चयेत्॥ - शाण्डिल्ये

आराधन काल भेदाः

आराधनविधिर्ह्येषु कालभेदेषु शस्यते।

अह्नि रात्रौ च तान् ब्रह्मन्नधुना कथयामि ते।

एकस्त्रयो व षड्वापि कालो द्वादश एव वा।

पञ्चकालश्चतुष्कालस्तत्कालो बहुधा मतः।
यथाविभवमुद्दिष्टं समाराधन कर्मणि॥ - पाद्मे

<u>बहुकाल समयाः</u>

एको मध्याह्नसमयः प्रातर्मध्यन्दिनं निशा।
त्रयश्चेत् षड्वु पूर्वे स्युः कालभेदाः पुनस्त्रयः।
मध्यरात्रोऽपराह्णश्च तथा प्रत्यूष ईरितः।
प्रत्यूषश्चार्धरात्रञ्च प्रातर्मध्यन्दिनं निशा।
पञ्चकाला इमे प्रोक्ता ततःकालचतुष्टयम्।
एतेषु हीनः प्रत्यूषो विज्ञेयश्चतुरानन।
काला द्वादश विज्ञेयाः पञ्च पञ्च च नाडिकाः।
इतरे कालभेताःस्युः प्रत्येकं यामसंमितः॥ - पाद्मे

<u>चतुष्काल पूजन समयाः</u>

प्रातर्माध्यन्दिने सायं त्रिकालञ्च यथाक्रमम्।
प्रातःकाले निशीतान्ते चतुष्कालः प्रकीर्तिताः॥ - नारदीये

<u>क्षुद्र - श्रेष्ठ पूजाकालः</u>

एककालेच मध्याह्ने क्षुद्रकं तत्प्रकीर्तितम्।
उत्तमादिषुदेवषु त्रिकालं पूजयेत्सदा॥ - कपिञ्जले

कालभेदेषु सर्वेषु श्रेष्ठं कालत्रयं विदुः।
प्रातर्मध्यन्दिनं रात्रिर्मुख्यं च कमलासन॥ - पाद्मे

आराधने उत्तमादि भेदाः

उत्सवावसितं श्रेष्ठमाराधनमुदाहृदम्।

होमान्तं मध्यमं प्रोक्तं प्रापणान्तमथाधमम्।

क्षुद्रञ्च धूपदीपकम् अधमाराधनं हरेः॥ - पाद्मे

परिवारार्चन विषयाः

उत्सवाद्यङ्गबिम्बानि सेनान्यं विहगेश्वरम्।

चण्डप्रचण्डौ द्वारस्थौ सर्वकालेषु पूजयेत्॥ - पाद्मे

वाद्य वादन कालाः

मध्यन्दिने प्रदोषे च पुरस्तादाद्यवादनम्॥ - पाद्मे

कवाटोद्घाटन काले कर्तव्य नियमाः

आजानुपादौ प्रक्षाल्य हस्तौचाऽमणिबन्धनात्।

आचम्य च द्वारपार्श्वं गत्वाऽङ्गन्यास पूर्वकम्।

तालत्रयञ्च हस्ताभ्यां कृत्वाभिवलजं स्थितः।

कवाटमुद्घाट्य ततो वायुमन्त्रेण पद्मज।

साम्नादेवव्रतेनान्तः प्रविशेद्दक्षिणाङ्घ्रिणा॥ - पाद्मे

शङ्खध्वनि समोपेतं दुन्दुभिः पटहस्वनैः।

वादिबृन्दोत्थितोश्चापि नाना वग्भिर्महामते।

महा जयजयाऽरावैः पुनःपुनः उदीरितैः।

प्रभोद् लक्षणस्तोत्रैः उत्थाप्य शयनेस्थितः।

द्वारमासाद्य तत्रस्थो दशदिक्बन्ध पूर्वकम्।

अवकुण्ट्याऽथ तर्जन्या मन्त्रं कवचमुच्चरन्।

स्थितेवा कल्पिते तत्र पूजयेद्बलिमण्डले।

सर्वं खगेशपूर्वन्तु परिवाराभिचाच्युतम्।

मनसा प्रणवेनाथ पुष्पमादाय कीर्तिदम्।

समस्त परिवाराय अच्युताय नमो नमः।

वास्तुपुरुष अन्यांश्च समभ्यर्च्य यथाक्रमम्।

मूल मन्त्रेण साङ्गेन निरङ्गेनाऽथवायथा।

न्यासं कृत्वाऽथवाच्छाद्य हस्त तालं हृदा तथा।

मूलमन्त्रेणचोद्घाट्य कवाटं नेत्र मन्त्रतः॥ - वासिष्ठे

<u>तालत्रय कालानि</u>

प्रबोधने कुम्भदीपे पात्रादिस्थापने कृते।

आह्वानार्थं बोधनार्थं तालत्रयमथाचरेत्॥ - विष्णुतत्वे

<u>गर्भालय प्रवेशानन्तरं कर्तव्य नियमाः</u>

प्रणमेच्छिरसा देवं पुण्डरीकाक्षविद्यया।

आरोपितेषु दीपेषु माल्येचापि निरासिते।

विद्यां पात्रेषु बिम्बेषु शोधितेषु यथातथाम्।

द्वारपूजां मुखे सर्वपरिवारसमर्चने।

कृते शिष्येण वान्येन परिचारकरेण वा॥ - पाद्मे

<u>विश्वरूप कालः</u>

भास्करस्योदयात्पूर्वं बहवस्सूतमागधाः।

प्रबोधयेयुर्देवेशं स्तुवन्तोवाद्यवादनैः॥ - पाद्मे

## विश्वरूपकाले देव दर्शित द्रव्याणि

ततोयवनिकां त्यक्त्वा हरेर्नीराजनं चरेत्।

तदा देवाय गोपृष्ठमश्ववक्त्रमिभाननम्।

नीलकीशं महादर्शं कन्यकामपि दर्शयेत॥ - श्रीप्रश्ने

प्रथमं पञ्चगव्यञ्च द्विदीयं घृतदर्शनम्।

तृतीयं क्षीरकुम्भञ्च चतुर्थं गजदर्शनम्।

पञ्चमंचाष्टधान्यञ्च धेनुवथ्सञ्च षष्टकम्।

सप्तमं कन्यकानान्तु श्वेताश्वञ्चाष्टकं भवेत्।

नवमं दर्पणं प्रोक्तं दशमं कृष्णमर्कटम्।

एकादशन्तुभक्तानां द्वादशं नृत्तगीतकम्।

यजमानाः त्रयोदश्यां दर्शयित्वा यथाक्रमम्॥ - अनन्ताख्ये

## विश्वरूपकाले तीर्थाहरण विधिः

परिचारैस्तु कर्तव्यं सचलेन स्नान पूर्वकम्।

जलकुम्भं समादाय सर्वालङ्कार शोभितम्।

उत्तमन्तुगजारूढं मध्यमं नर मूर्द्धनि।

छत्रचामर संयुक्तं नृत्तवाद्य समन्वितम्।

वीथिप्रदक्षिणं कुर्यात् मण्डपञ्च प्रवेशयेत्॥ - परम संहिता

परिचारैश्च कर्तव्यं स्नानान्तो नियत मानसः।

दौतवस्त्रोत्तरीयञ्च ऊर्ध्वपुण्ड्रैरलङ्कृतः।

घटं प्रक्षाल्यमनुना सौरभेयीं प्रदर्शयेत्।

जलं पुरुषमन्त्रेण संशोष्यगुरुरात्मवान्।

अग्निमन्त्रेण गन्धाञ्च चन्द्रकोटिसमप्रभम्।

निवृत्तिमन्त्रं तत्ध्यायेत् पुण्यतीर्थाणि चिन्तयेत्॥ - सनक संहिता

<u>तीर्थे उत्तमादि भेदाः</u>

उत्तमन्तु नदीश्रेष्ठं मध्यमञ्च तटाकयोः।

अधमं कूपपानीयं यथासम्भवमाचरेत्॥ - सनक संहिता

<u>विश्वरूपकाले निवेदन द्रव्याणि</u>

गोदर्शनञ्च विधिवत् कारयेद्देवे सन्निधौ।

गोक्षीरं शर्करायुक्तं नवनीतं सुवासितम्।

निवेदयित्वा देवाय अर्चकाय प्रदापयेत्॥ - जयोत्तरे

विश्वशक्तियुतं देवं जितन्ताप्रमुखै स्तवैः।

स्तूयाद्गाथाभिः अन्याभिः गोक्षीरं शर्करायुतम्।

दध्यन्ननि निवेद्याथ नितपूजमुपक्रमेत्॥ - श्रीप्रश्ने

<u>विश्वरूप दर्शने फलम्</u>

विश्वरूपञ्च यःपश्येत् देवस्य पुरतस्थितः।

दशजन्मार्जितं पापं तत्क्षणादेव नश्यति।

इत्येवं दर्शनात्पुण्यं महापातक नाशनम्॥ - वासुदेव संहिता

<u>पूजाकाले दर्शने निषिद्धाः</u>

प्रच्छन्नपठ संयुक्तं यथा कालन्तु पूजयेत्।

पापरोग मथि ब्रष्टान् नास्तिकान् श्रुति दूषकान्।

कृतघ्नश्च पतितश्चैव विष्णुनिन्दापरस्सदा।

गुरुनिन्दापरश्चैव पाषण्ड समयस्थिताः।

असत्पङ्कुरपस्मारो पापरोगोपवेशिनः।

मूकश्च बधिरश्चैव पूजाकाले न दर्शयेत्॥ - पारमेश्वरे

<u>प्रच्छन्न पट आच्छादन कालाः</u>

अर्चनादि क्रियाकाले प्रच्छन्नपटमुत्तमम्।

कल्पयेद्देवदेवस्य दृष्टिदोष विनिवृत्तये।

निर्माल्योद्वासनकाले स्नानान्तेतु विशेषतः।

हविरादौ च निरुक्तान्ते कुर्याद्यवनिकां सुधीः॥ - परम संहिता

स्वस्थाने पूजने काले प्रच्छन्नपटमुत्तमम्।

पूजाकालेतु देवानां पुष्पाऽलङ्करणे तथा।

मुद्राकालेतु सर्वत्र हेम रत्न समर्पणे।

एवमेतेषु कालेषु पटमाच्छाद्य वाससा॥ - वासुदेव संहिता

पूजाकाले स्नानकाले नैवेद्य वस्त्रभूषणम्।

यानादिरोहणे कृत्वा प्रच्छादन पटं न्यसेत्॥ - विहगेन्द्रम्

<u>प्रच्छन्नपट रहित कालानि</u>

आस्थान मण्डपे प्रच्छन्नन्तु पटं त्यजेत्।

कुन्भमण्डल होमेतु पुण्याहं दान रक्षकम्।

नद्यादि स्नानकाले च प्रच्छादन पटं विना॥ - कपिञ्जले

निर्माल्य विसर्जन विधिः

दीपात् सन्दीपयित्वातु निर्माल्यमपकृष्यच।

विष्वक्सेनाय दत्वातु सम्मार्ज्याक्षौदवारिणा॥ - पौष्करे

निर्माल्य विसर्जन आवश्यकत्वम्

नभारं मेरुशिखरं नभारं सप्तसागरम्।

रात्रौपूजित निर्माल्यं प्रभाते भारमुच्यते॥ - विहगेन्द्रे

सेनेशपूजा पुण्याह विषयः

सेनेशं मनसा ध्यायेद्याग विघ्नोप शान्तये।

ततः स्व देह शुद्ध्यर्थं याग द्रव्याऽलयस्यच।

शुद्ध्यर्थं पाकशालायाः पुण्याहं वाचयेद्गुरुः॥ - श्रीप्रश्ने

पुण्याहवाचन कालानि

द्रव्यशुद्धिः स्थलशुद्धिश्च आत्मशुद्धिश्च कर्मकम्।

चतुरशुद्धिश्च मन्त्राणां पुण्याहञ्चापि कारयेत्।

पुण्याहवाचन कालेतु कोष्टधारण माचरेत्।

कोष्टधारण हीनेतु सर्वकर्मा विनश्यति॥ - पुरुषोत्तमे

पुण्याह स्थण्डिल विधिः

अस्त्रमन्त्रेण धरणीं संप्रोक्ष्य प्रथमं गुरुः।

पुण्याहं वाचयेत् पश्चात् ब्राह्मणैः सह देशिकः।

स्थण्डिलं हस्तमात्रन्तु मेखलात्रय संयुतम्।

वृत्तंवा चतुरश्रंवा कृत्वा कर्म समाचरेत्।

पुण्याहं शान्तिहोमञ्च अङ्कुरादि प्रतिष्ठकम्।

श्वेतं हरिद्रा कुङ्कुमञ्च अक्षतानि समर्चयेत्॥ - विष्णु संहिता

पुण्याह कालभेदेन तीर्थ भेदाः

प्रातः काले हरिद्राञ्च मध्याह्ने गन्ध तोयकम्।

रात्रौ शुद्धोदकञ्चैव पुण्याहं त्रिविधं स्मृतम्॥ - वासिष्टे

पुण्याह कुम्भस्थापन विधिः

चरणं पवित्रमुच्चार्य महीं प्रक्षाल्य वारिणा।

विष्णोरराट मन्त्रेण दर्भैः सम्मार्जयेदनु।

गन्धद्वारेति मन्त्रेण गोमयेनाऽनुलिप्यच।

आप उन्दन्दु मन्त्रेण सुधाचूर्नैरलङ्क्रियात्।

देवस्यत्वेति मन्त्रेण विकिरेदक्षतान् क्षितौ।

ग्रीष्मोहेमन्त मन्त्रेन धान्यपीठं प्रकल्पयेत्।

शन्नोदेवीति मन्त्रेण शतपत्रं लिखेत् सुधीः।

धन्वनागेति मन्त्रेण दर्भैरूर्ध्वं परिस्तरेत्।

तस्मिन् लक्षण सम्युक्तं कनकादि विनिर्मितम्।

रत्नं स्वर्णं नालिकेरमाम्र मश्वत्थ पल्लवम्।

विनिक्षिप्यच तोयेन गन्धेनापूरयेत् घटम्।

चन्दनाक्षत मालाभिर्भूषणैश्चाप्यलङ्क्रियात्॥ - श्रीप्रश्ने

पुण्याह प्रोक्षण मन्त्राः

पुण्याहं स्वस्ति ऋद्धिञ्च संवाच्य सह मूर्तिपैः।

प्रोक्षयेच्छतधारेण स्थानानीत्यादिकेनच॥ - पारमेश्वरे

पवमानस्य मन्त्रेण कृत्वा सम्मार्जनं तथा।

गर्भगेहं चतुर्वक्र लक्ष्मी मन्त्रेण लेपयेत्॥ - पाद्मे

पुण्याह रहिते फलम्

अकृत्वा यदि पुण्याहं कृत्वा कर्म निरर्थकम्॥ - श्रीप्रश्ने

मानुष पुण्याहे दोषः

वासुदेवाख्य पुण्याहं वाचयेद्देव सन्निधौ।

मानुषं यदि पुण्याहं मन्दिर शून्यतां व्रजेत्॥ - विष्णुतिलके

आचार्य दर्शनेन शुद्धिः

वासुदेवाभिदानन्तु प्रागुक्तंच समाश्रयेत्।

ततो लोचनयुग्मेन स्तब्देन मुनिपुङ्गवाः।

जपन् लोचन मन्त्रन्तु पश्येद्यागोपयोगिनम्।

सम्भारमखिलं तेन द्रव्यसङ्गो विशुध्यति॥ - ईश्वरे

पञ्च शुद्धि विषयः

पूजाकाले पुराकुर्यात् पञ्चशुद्धिं गुरूत्तमम्।

स्थानशुद्धिं पात्रशुद्धिं बिम्बशोधनमेवच।

आत्मनो भूतशुद्धिश्च मन्त्रवर्णास्तथा रमे॥ - श्रीप्रश्ने

देहशुद्धिं स्थानशुद्धिं द्रव्यशुद्धिरनन्तरम्।

मन्त्रशुद्धिः बिम्बशुद्धिः पञ्चशुद्धिरितीरितम्॥ - पाद्मे

द्रव्याणाम् अष्टाविंशति शुद्धयः

देहशुद्धिं पादतीर्थं स्नान शुध्यादि तीर्थयोः।

द्रव्यशुद्धिश्च पुण्याहं मन्त्रशुद्धिः गुरुर्मुखः।

पादशुद्धिस्तु प्रक्षालणं ताम्बूलं आस्य शुद्धयोः।

करन्यासं कर शुद्धिस्तु अङ्गन्यासादि भूत हृत्।

तत्वन्यासं रोग शुद्धिः द्वादशाक्षर चिन्तकाः।

अग्निश्च स्थलशुद्धिश्च पात्र शुद्धिश्च तिन्त्रिणी।

अर्चकस्यच दीक्षायाः बिम्बशुद्धिस्तु मन्त्रकः।

दान शुद्धिश्च द्रव्याणां नैवेद्यं शुद्धि मुद्रयोः।

दीपशुद्धिः घृतेनैव एलादिः द्रव्यतीर्थयोः।

दृष्टिदोषं घटदीपेन नीराजनं ज्ञान शुद्धयोः।

भुक्तिशुद्धिश्च गायत्र्या प्रेत शुद्धिश्च शान्तयोः।

वाद्यादि तालशुद्धिस्तु घनिका विप्र कन्ययोः।

स्पर्शदोषस्तु कैङ्कर्यं पापशुद्धिस्तु वन्दनात्।

क्षौरे स्नान पुनस्नानात् उत्सवञ्च तु पावयोः।

अष्ठाविंशति शुद्धिस्तु तत्तत्कर्मानुसारतः।

अन्यता कारयेन्मोहात् तत्पूजा निष्फला भवेत्॥ - परम संहिता

<u>द्रव्याणां द्वात्रिंशद् शुद्धि विषये</u>

पञ्च शुद्धि प्रवक्ष्यामि देवदेवस्य शार्ङ्गिणः।

स्नानाचमन शौचेन प्राणायामेन देशिकः।

अन्तर्बहिश्शरीरस्य साधकः सह शुध्यति।

प्रसन्न ज्ञान संतोषात् मानसं शुद्धिरुच्यते।

सत्यं भूतहितंचैव प्रियाऽऽलापस्तथैवच।

वचसांशुद्धिरुद्दिष्टो साधकस्य विशेषतः।

मार्जनं लेपनंचैव प्रोक्षणंचाऽक्षतार्पणम्।

स्थानशुद्धिरिति प्रोक्ता द्रव्यशुद्धि रिहोच्यते।

तिन्त्रिणी फल तोयेन ताम्रं हेमंच शोधयेत्।

गृहधूमेन कल्केन शान्ताङ्गारेण राजतम्।
शङ्खं शुक्तयोश्च शुद्धिस्तु तुषतक्रेण देशिकः।
मृज्जलेन द्विजः श्रेष्ट फलपात्रं विशुध्यति।
अत्युष्णेन तु तोयेन दीपपात्रं विशुध्यति।
मृण्मयाणांच पात्राणां दाहनाच्छुद्धिरुच्यते।
वस्त्राणां धूपनात् शुद्धिः पठादीनां तथैव च।
शैलजं शर्करा चूर्णजलेन च विशुध्यति।
रत्नजा मणिनाचैव क्षाळणात् कुशवारिणा।
प्रोक्षणाद् द्विज जातीनां पुष्पाणांचैव शुध्यति।
दीपस्यौज्वलनात् शुद्धिः स्तम्बानां क्षाळणात्तथा।
प्रभूतानांच दारूणां तक्षकाच्छुद्धिरुच्यते।
वेदादिमादिमं कृत्वा नमस्कार प्रदक्षिणम्।
मन्त्रं मन्त्रेप्रयुञ्जीत तन्मन्त्र शुद्धिरुदाहृतः।
कुशेन गन्ध तोयेन बेर शुद्धिरुदाहृतः।
निर्दोषतोयमादाय नव पात्रेषु पूरयेत्।
नवपात्रेण पूतेन तोयशुद्धिर्भविष्यति।
द्रव्य शुद्धिरिति प्रोक्तासंक्षेपेण द्विजोत्तम॥ - कपिञ्जले

<u>शुद्धि विषयः</u> <u>विशेषः</u>

कीर्तनेन वचस्शुद्धिर्जायते वार्षिकी प्रिये।
बिंबस्य दर्शनात्विष्णोश्चाक्षुशी शुद्धिरीरिता।
श्रवणाद्यशसो विष्णो श्रोत्राणां शुद्धिरीरिता।
नत्याच शिरसा शुद्धिस्त्वचसा साष्टाङ्गवन्दनात्।
उत्तीर्णधूप पुष्पाद्यैर्नासा शुद्धिर्वरानने।
करयोर्मार्जनादिभ्यः प्रादक्षिण्न्यात्पदैरपि।

एकादश्याम् सकृत् कृत्वा सर्वेषां देहवासिनाम्।
आजीवनांतं या शुद्धिस्साशुद्धिर्जायते धृवम्॥ - बृहद्ब्रह्मे

<u>कूर्मासनस्य लक्षणम्</u>

कूर्मवच्चतुरः पादं शिरण्चोर्ध्वैव पञ्चमम्।
श्वेतवर्णं बृहत्कुक्षिं तालत्रय समायतम्।
पीठं पञ्चाङ्गुल घनं त्रितालं विस्तृतं भवेत्॥ - वासिष्ठे

<u>आसनस्य वृक्ष भेदाः कालश्च</u>

खादिरं चन्दनञ्चैव यज्ञ वृक्षेण कल्पये।
रजतं ताम्रजं वापि तस्योपरि निवेशयेत्।
जपहोमार्चनाकाले प्राङ्मुखोवाप्युदङ्मुखः।
कूर्मासनगतो विप्रः जपहोमौविशेषतः।
अश्वमेध फलं पुण्यं विष्णुलोके महीयते॥ - वासिष्ठे

<u>श्रोत्राचमन लक्षणम्</u>

गङ्गाच दक्षिणे श्रोत्रे नासिकायां हुतासन।
उभयोःस्पर्शनेचैव श्रोत्राचमनमिष्यते॥ - वासुदेवे

<u>प्राणायाम पद निरुक्तिः</u>

प्रकारं पापनाशंस्यात् णकारं नाडिबन्धनम्।
यकारं यामविद्यानां मकारं मयिचिन्तनम्।
प्राणायाममिति प्रोक्तं मिक्षमार्गैक कारणम्॥ - विहगेन्द्रे

प्राणायामस्य अधिदेवताः फलानि च

ब्रह्मविष्णु महेशाद्याः रेचकाद्यधि नायकाः।
रेचकैः शोधयेत्पापं पूरकैरपि दाहयेत्।
कुम्भकैः स्तम्भयेद्वह्निं एवं पापं विशोधयेत्॥ - श्रीप्रश्ने

भूतशुद्धेः आवश्यकत्वम्

भवेत्प्राण जयः पुंसः प्राणायामः स उच्यते।
ततस्तु काय शुद्ध्यर्थं वर्णं भौमादि विन्यसेत्।
भूत शुद्धिं श्रुनु मुने यथावदनु पूर्वशः।
पृथिव्यप्तेजोऽनिलाकाशं शरीरं भूत पञ्चकम्।
इन्द्रजालोपमं विद्धि ज्ञानाद्यैरूर्जितं गुणैः।
मलिनञ्चाऽस्वतन्त्रञ्च रेतो रक्तोद्भवं क्षयि।
यावन्न शोधितं सम्यग्धारणादिर्निरन्तरम्।
तावदेतदयोग्यं स्यात् मन्त्रन्यासीदि वस्तुषु॥ - पारमेश्वरे

मन्त्रन्यास विषयः

अष्टाक्षर करन्यासः

सृष्टिस्थितिलयन्यासैः हस्तन्यासपुरस्सरम्।
न्यसेदङ्गेषु मूर्धादिपादान्तेषु यथातथम्।
तलं पृष्ठं च करयोश्शोधयित्वाऽस्त्रविद्यया।
अङ्गुलीनां च सर्वासां पर्वस्वाद्यन्तवर्तिषु।
इष्यते प्रणवन्यासो मध्यमेषु च पर्वषु।
मन्त्राक्षराणि विन्यस्येन्न्यास एषस्सनातनः।
पर्व दक्षिणदर्जन्याः प्रक्रम्याङ्गुष्ठपर्वषु।

दक्षिणेतर तर्जन्याः पर्वान्तं साधकोत्तमः।
सृष्टिन्यासमिमंकुर्यात् व्यत्यासेन संहृतिः।
प्रक्रम्य तर्जनीपर्व कनिष्ठापर्व विश्रमः।
स्थितावष्टाक्षरस्यैष मन्त्रस्य न्यास ईरितः॥ - पाद्मे

<u>द्वादशाक्षर करन्यासः</u>

द्वादशाक्षरमन्त्रस्य न्यासस्संप्रति कथ्यते।
न्यासस्तले मध्यमया तर्जन्यङ्गुष्ठपर्वणि।
कृत्वा प्रदक्षिणं पर्वस्वङ्गुष्ठेनेतरेषु तु।
सव्ये तले तु विश्रान्तिस्सृष्टावपरथा लये।
तलयोः प्रक्रमस्थाने दक्षिणेतरयोर्द्वयोः।
कनिष्ठयोश्च विश्रान्तिः पर्वणोरुभ्योरपि।
द्वादशाक्षरमन्त्रस्य न्यासोयं कमलासन॥ - पाद्मे

<u>अष्टाक्षर द्वादशाक्षर देहन्यासः</u>

ताभ्यां मूर्धादिपादान्तं देहे न्यस्येत्समन्ततः।
व्यापकं कञ्चुकं यद्वा मन्त्रं त्वक्षरशस्ततः।
मूर्ध्नि नेत्रे मुखे चित्ते नाभौ गुह्ये च जानुनि।
चरणौ क्रमशः स्पृष्ट्वा न्यासो मन्त्रस्स इष्यते।
विपरीतक्रमो ज्ञेयः संहृतौ पालने पुनः।
नाभ्यादि हृदयान्तेषु न्यासोऽङ्गेषु प्रकीर्तितः।
अष्टाक्षरस्य मन्त्रस्य स्थानान्येतानि तानि च।
शिरः पश्चिमं पूर्वं दक्षिणं चोत्तरं ततः।

चत्वारि च चतुर्वक्रस्थानानि द्वादशाक्षरे॥ पाद्मे

<u>अष्टाक्षर द्वादशाक्षर न्यास भूमयः</u>

मूर्ध्नि मध्यमयाऽङ्गुल्या तर्जन्या सह चक्षुषोः।

न्यस्येन्मुखेऽनामिकया साङ्गुष्ठेन च मन्त्रवित्।

अङ्गुष्ठतर्जनीभ्यान्तु हृदये न्यसनं भवेत्।

तथाङ्गुष्ठकनिष्ठाभ्य नभौ न्यासः प्रशस्यते।

विनाङ्गुष्ठेन शेषाभिर्गुह्ये जानुनिचोभयोः।

समस्तभिश्चरणयोरित्यष्टाक्षर भूमयः।

प्राग्भागे शिरसोऽङ्गुल्या न्यासोऽङ्गुष्ठेन दक्षिणे।

तर्जन्या पश्चिमे भागे न्यासोऽनामिकयोत्तरे।

कनिष्ठया तदेताः स्युर्द्वादशाक्षर भूमयः॥ - पाद्मे

<u>षडङ्गन्यास स्थानानि</u>

स्थाने यथोक्ते विन्यस्य षडङ्गन्यासमाचरेत्।

हृदयञ्च शिरश्चैव शिखाकवचमेव च।

अस्त्रं नेत्रं षडेतानि हृदये मस्तके तथा।

शिखायामानुपूर्व्येण स्कन्धस्योभयपार्श्वयोः।

नेत्रयोर्दिक्षु सर्वासु न्यसनीयानि भूमिषु॥ - पाद्मे

<u>आश्रम भेदेन न्यास भेदाः</u>

स्थितिन्यासो गृहस्थस्य सृष्ट्याख्यो ब्रह्मचारिणः।

मुमुक्षोसंहृतिन्यासः एवं न्यासस्त्रिधा भवेत्॥ - अनिरुद्धे

आत्मानं परमेश्वरो ध्यानम्

दिव्यायुधधरं दिव्यवस्त्रमाल्यानुलेपनम्।
कौस्तुभं वनमालाञ्च श्रीवत्सं दिव्यलक्षणम्।
बिभ्राणं भावयेत् साक्षात् आत्मानं परमेश्वरम्॥ - पाद्मे

मानसाराधनम्

मानसैरुपचारैश्च हृदयाम्बोरुहेस्थितम्।
होमान्ते अर्चयेत्पूर्वं वासुदेवं सनातनम्॥ - पाद्मे

घण्टा चालने फलम्

सञ्चालयेत्ततः सम्यक् सुशब्दां मन्त्रबोधिनीम्।
त्रैलोक्यद्राविणीं घण्टां सर्वदुष्टनिबर्हिणीम्।
एषा द्रुतिर्हि मन्त्राणां सुप्तानाञ्च प्रबोधिनी।
वारणी सर्व विघ्नानां सर्वमन्त्रप्रसादिनी॥ - पारमेश्वरे

घण्टा चालन कालाः

आहूतिकाले मन्त्राणां धूपदाने विशेषतः।
दीपदानेऽर्घ्यदाने च तथा नैवेद्यजोषणे।
जपस्तुत्यवसनाभ्यां प्रवृत्ते चाग्नितर्पणे।
पूर्णाहुतिप्रदाने च मन्त्राणान्तु विसर्जने।
विष्वक्सेनार्चने चैव तत्पूजाप्रतिपादने।
बलिप्रदानकाले तु देवतानां विशेषतः।
नातोऽन्यदा स्याद्विहितं चालनं सिद्धिमिच्छताम्॥ - पारमेश्वरे

घण्टा चालन नियमाः

कवाटोद्घाटने होमे पूजने बलिकर्मणे।
अर्घ्यै स्नपन आचामे विवाहे धूपदीपयोः।
ताडयेदेकपार्श्वेन तथाऽऽवाहन कर्मणि।
नीराजने यवनिकासमुद्घाट्य निवेदने।
पार्श्वाभ्यां ताडनं कुर्यादुपचारान्तेषु च॥ - वासुदेवे

अर्घ्यादि पात्र लोह भेदाः

सुवर्णं राजतं ताम्रं कांस्यपात्र मथापिवा।
एवं पात्र मलाभे च मृत्पात्रं नूतनं क्रमात्।
अन्यानि लोहजं पात्रं तत्पूजा निष्फलं भवेत्॥ - विहगेन्द्रे

त्रिपात्र स्थापन विधिः

पाद्यं मध्ये दक्षिणेऽर्घ्यं वामेचाचमनीयकम्।
एवं त्रिपात्रं संस्थाप्य द्रव्याणि विनिवेशयेत्।
दक्षिणे जलकुम्भंस्यात् पुष्पगन्धादि पात्रयोः।
वामे गण्डूषपात्रन्तु अग्रे नैवेद्य पात्रकम्॥ - विहगेन्द्रे

त्रिपात्र देवताः

अर्घ्यस्य विष्णुदैवत्वं पाद्येच मधुसूदनम्।
त्रिविक्रमञ्चाचामेपि त्रिः पात्रेषु समर्चयेत्॥ - विष्णु तिलके

पञ्च पात्राणां स्थापन विधिः

पाद्यं मध्ये दक्षिऽणेर्घ्यं वामेचाचमनीयकम्।
तस्य पात्रस्य पार्श्वे तु वामे स्नानीयपात्रकम्॥ - पाद्मे

भगवत्पुरतः पीठे स्थापयेत्पात्र वेदिकाम्।
भूम्यां प्रतिग्रहं पात्रं तन्मुखे विनिवेशयेत्।
आग्नेयादिषु कोणेषु प्राच्यादिष्वथवा रमे।
वेदिकायाञ्च पात्राणि मध्ये चैकं विनिक्षिपेत्॥ - श्रीप्रश्ने

<u>पञ्चपात्राणां देवताः</u>

श्रीरर्घ्यस्य भवेद्देवी वागीशाचमनीयके।
पाद्यस्य पितरोदेवः स्नानीये वारुणस्तथा।
शुद्धोदकस्य शान्तिः स्यात् पात्रेष्वेतान् समर्चयेत्॥ - पाद्मे

<u>पात्राणां निक्षिप्य द्रव्याणि</u>

कुशाग्रमक्षतं पुष्पं फलं मलयजं तथा।
तिलान् सिद्धार्थ सहितान् यवानर्घ्यस्य भाजने।
तिलं दूर्वा विष्णुपर्णी श्यामाकं पद्ममक्षतम्।
पाद्यपात्रे षडेतानि द्रव्याणि विनिवेशयेत्।
एलालवङ्ग तक्कोल जाती कर्पूर चन्दनम्।
पुष्पाण्याचमनीयेच पात्रे द्रव्याणि कल्पयेत्।
गन्धः सर्वौषधीः रत्न फल बीजं कुशानिच।
तिलानिचाक्षतञ्चैव दधि क्षीर घृतं तथा।
रजनी द्वादशाङ्गानि स्नानिय द्रव्यमुच्यते।
कोष्ठं मांसि हरिद्रे द्वे मुरा शैलेय चम्पकाः।
वचा कच्छोरमुस्ताश्च सर्वौषध्यः प्रकीर्तिताः।
तिलैश्च तुलसी चैव निक्षिपेच्छान्तिवारिणा॥ - पाद्मे

मूलबेरस्य योगपीठार्चनम्

बिंबाकृत्यात्मना बिम्बे समागत्यावतिष्ठति।

योगपीठादिकं सर्वं मूलबिम्बे प्रकल्पयेत्॥ - परम संहिता

अर्चनं योगपीठस्य मन्त्रन्यसनमेवच।

बिम्बेस्थिरे सदाकार्यं पूजारम्भे चतुर्मुख॥ - पाद्मे

आसीनादिबिंब भेदेन योगपीठार्चन विधिः

आसीनस्य शयानस्य कर्मबिम्बस्यवै रमे।

पीठकल्पन कालेतु स्मरेत् पद्मान्तमादितः।

ततोऽनन्तं स्मरेद्देवी सहस्रफणमण्डितम्।

यानारूढस्य बिम्बस्य पद्मात्ताक्ष्यं विचिन्तयेत्॥ - श्रीप्रश्ने

शयनबिम्ब यानारूढ बिम्ब पीठार्चन विषये

एवं चास्याचले पीठे शयानस्य विभोस्त्वथ।

सशक्तिकाच्चितो भानोरूर्ध्वेऽनन्तं समर्चयेत्।

यानारूढे त्वनन्तस्य स्थाने तार्क्ष्यं समर्चयेत्॥ - पारमेश्वरे

पीठार्चने देवप्राची निरूपणम्

आहूतोपविशेद्यत्र मन्त्रनाथोऽभिसम्मुखः।

तत्प्रागपेक्षया कुर्याद्धर्मादीनां निवेशनम्॥ - पारमेश्वरे

श्रियादि देवीनां योगपीठार्चन विधिः

श्रियादीनान्तु देवीनां पिठमूलेतु कच्छपम्।

तन्मध्ये पन्नगाधीशंऽस्यकोणेषु पद्मज।

धर्मादीन् क्रमशोध्यात्वा तदूर्ध्वेऽव्यक्त पङ्कजम्॥ - श्रीप्रश्ने

लक्ष्म्यादीनां तु देवीनां पीठस्याधः फणीश्वरम्।
तत्कोणेषुच धर्मादीन्स्तदूर्ध्वेऽव्यक्तपङ्कजम्॥ - पारमेश्वरे

विशेषोयं प्रवक्ष्यामि योगपीठे प्रकल्पनम्।
हरिं विनाश्रयादीनां ब्रह्मादीनां चतुर्मुख।
चण्डादि परिवाराणां भक्तानां पीठ कल्पनम्।
आधारादि चतुर्थ्यन्तं धर्मादिश्च चतुष्टयम्।
प्रकल्प्य पादरूपेण पीठं भद्रं प्रकल्पयेत्।
पद्मासनं ततोऽभ्यर्च्य मूर्तिमन्त्रेण पूजयेत्॥ - विष्णुतिलके

पद्मासनस्य प्राशस्त्यम्

देवानामपि सर्वेषां आदि पद्ममभूदितः।
तस्मात् सर्वदेवानां पद्मेनैवासनं भवेत्॥ - नारदीये - पाद्मे

देवस्य षडासनाणां नामानि

मन्त्रासनं यथोस्नानं अलङ्कारन्तु भोजनम्।
यात्रासनञ्च शयनं षडैते देवतार्चनम्॥ - पाद्मे

मन्त्रासनादि भेदेन आसन ध्यान भेदम्

मन्त्रासने योगपीठं पद्ममन्यत्र चिन्तयेत्।
ध्यायेत् मन्त्रासने तार्क्ष्यं अनन्तं शयनासने॥ - श्रीप्रश्ने

आसनभेदेन भगवत् स्वरूपाः

अर्घ्यवस्त्राम्बराकल्पं पुष्पगन्धानुलेपनैः।
प्रदिकस्थिते स्थितं ध्यायेत् पाद्याचमनयोः पुनः।

आसीनं स्नानकाले च पद्मासन सुखासने।
नैवेद्य धूप दीपादावासीनं स्वस्तिकासने।
उपचारेषुचान्यत्र तत्तत्कर्मानुसारतः।
स्थितमासीनमथवा देवं ध्यायीत पूजकः॥ - पाद्मे

योगेस्थितं मण्डनेच यात्रायां भोजने तथा।
स्नानेच सुखमासीनं शय्यायां शयनं विभुम्।
अन्यत्रचोपचारेषु स्थितं आसीनमेव वा॥ - श्रीप्रश्ने

<u>पूजनकाले अर्चकस्य स्थानानि</u>

देवस्य दक्षिणेपार्श्वे आसनेच समाविशेत्।
उदङ्मुखं पूर्ववलजे च अर्चयेत् क्रमयोगतः।
दक्षिणे वलजे विप्र पूर्वाभिमुखतोऽर्चयेत्।
पश्चिम द्वारजो विप्र दक्षिणाभिमुखोऽर्चयेत्।
देव प्राच्यां नदोषस्यात् अर्चकानां नरोत्तमाः॥ - खगप्रश्ने

<u>आवाहन विधिः</u>

ध्यात्वा तद्वारिणा कर्मशिरः कूर्चेन सेचयेत्।
द्वादशार्णं चतुर्वारमागच्छेति समं वदेत्।
पात्रस्थं परमात्मानं कर्मार्चायां विचिन्तयेत्।
प्रदर्श्यावाहनमुद्रां स्थापनन्तु ततः परं॥ - श्रीप्रश्ने

आगच्छ पदमन्त्रेण मूलमन्त्रेण हृत्कजाम्।
एवं तेजोमयं देवं नाडी दक्षिणमार्गतः।
सर्वभूतरतं विष्णुं मन्त्रमूर्तिस्समागतम्।
समाहूय स्व मन्त्रेण पूजायास्याभिमुखं भवेत्॥ - विहगेन्द्रे

<u>आवाहनरहिताः</u>

नाऽवाहयेदेकबेरे सुरसिद्धावतारिते।
ऋषिभिर्मनुजैर्वापि स्थापिते निश्चिते हरौ।
सुस्थितोऽभिमुखी भावःस्तदेवाऽवाहनं हरेः॥ - पाद्मे

मूलबेरं भवेद्यस्य एकबेरं यथा भवेत्।
बेरेह्यावाहनमुद्वासं ध्रुवबेरं नकारयेत्॥ - विहगेन्द्रे

<u>मूलबेरात् कर्मार्चादीनां आवाहन विषयः</u>

दीपयेद्बिम्बतोऽन्यत्र तस्मिन् पुष्पाञ्जलिं हरौ।
आगच्छपदमन्त्रेण मूलमन्त्रेण हृत्कजात्।
प्रत्यहं कर्मबिम्बानां मूलबिम्बे हृदब्जगात्।
किञ्चिदावाहनं कार्यं तत्रत्वेवं क्रमो द्विजाः।
मूलबेरे तु यत्तेजः षड्भागैकन्तु कर्मणि।
कर्मबिम्बांश षड्भागं पञ्चांशन्तु उत्सवस्यतु।
तद्बिम्बांश चतुर्भागं स्नानबिम्बे मुदाहृदम्।
तद्बिम्बस्य त्रिभागन्तु बलिबेरमुदाहृदम्।
बलिबिम्ब द्विभागांशं तीर्थबिम्बेन संयुतम्।

शय्यबेरं ततःकुर्यात् एकांशेन विधीयते।

तत्तत्कर्मावसानेतु पुनर्मूले नियोजयेत्॥ - श्रीमन्नारायणे

षड्विंशत् एकभागस्तु बलि कर्मार्चनादिषु।

एवं तेजोमयं देवं नाडी दक्षिणमार्गतः॥ - ईश्वरे

<u>आवाहनविशेषः</u>

ज्वलनस्सूर्यकान्तो यथा भाति दिवाकरात्।

तथाऽर्चकः प्रार्थनया मूलात् कर्मणि कौतुके॥ - श्रीप्रश्ने

यथा सर्वगतोवायुं व्यजनेन महामते।

वृत्तिमभ्येति भगवन् आहूतस्तद्वदेवहि॥ - ईश्वरे – पारमेश्वरे

<u>द्विविध आवाहन विधिः</u>

आवाहनं द्विधाप्रोक्तं अचलेपि चलेपिच।

अचलेपूर्वमावाह्य पश्चादावाहयेच्छले॥ - पाद्मे

<u>आवाहन कालानि</u>

त्रिमुहूर्तात् पुरा प्राप्त पूजने पुरुषोत्तमम्।

नोद्वास्य पूजनं कृत्वा ततोद्वासनमाचरेत्॥

त्रिकाल अर्चनायुक्ते एकदाऽवाहनं चरेत्।

अन्यबेरार्चनायान्तु विसर्जनमथाचरेत्॥ - श्रीप्रश्ने

आवाहिते प्रतिष्ठायां अर्चा च जगतःपते।

नोद्वास्य सर्व पूजानां आवाह्य पुरतोर्चनात्।

त्रिकालं अङ्गबिम्बेतु कर्मार्चादिषु स्वस्वपि।
आवाह्य पूजयेन्मूलात् विशेषेस्वपि कार्यतः।
तत्तत्कर्मावसानेतु पुनर्मूले नियोजयेत्।
यदन्यता कृते पूजा सापूजा निष्फला भवेत्।
तस्मात् सर्व प्रयत्नेण मूलादावाह्य पूजयेत्॥ - विहगेन्द्रे

आवाहन मन्त्रोद्धारः

प्रणवद्वितयस्यान्ते तारिकाद्वय मुद्धरेत्।
ततः परमधामाचाऽवस्थिते मदनुग्रहा।
अभियोगागतेचेकतथैवाऽवतरेतिच।
इहाभिमत शब्दश्च सिद्धिते इतिच त्रयम्।
ततो मन्त्रशरीरेच तारस्तारा नमो नमः॥ - लक्ष्मीतन्त्रे – जयाख्ये - पाद्मे

मूलबेर उत्सवबेरयोः पूजन कालभेदः

नीराजनान्तिमं पूर्वं मूलबिम्बं समर्चयेत्।
ततः कर्मादि बिम्बानां मन्त्रवत्क्रमशो भवेत्।
अनर्च्य मूलबिम्बं वा समकालेन वा रमे।
व्यत्यासेनच वा कुर्यात् पूजनं गुरुसत्तमः।
तद्दोष शान्तये देवी जपेन्मूल सहस्रकम्।
पुनः पूजां प्रकुर्वीत मूलार्चादिषु मन्त्रवत्॥ - श्रीप्रश्ने

मूलबेर श्रीभूदेव्यौ पूजनानन्तरम् कर्मार्चादि पूजनम्

दीपं समर्प्य देवाय मधुपर्कं निवेदयेत्।
पञ्चामृतं वापि ततः श्रीभूम्योरर्चनं चरेत्।
कर्मार्चा सहजे पीठे भिन्ने तु कमलालये।

मन्त्रन्यासाय देवाय योगपीठं प्रकल्पयेत्॥ - श्रीप्रश्ने

<u>देवस्य देहे न्यास क्रमः</u>

यथा देहे तथा देवे मन्त्रन्यासं समाचरेत्।
हस्तन्यासं विना शङ्ख चक्र मुद्रां प्रदर्शयेत्॥ - पाद्मे

<u>मन्त्रासन उपचाराः</u>

आवाहनं नमस्कारं प्रत्युत्थानमनन्तरम्।
पुष्पाञ्जलिस्स्वागतोक्तिरासनं पादपीठिका।
अर्घ्यं पाद्यं प्रतिग्राहः पादं प्लोताभिमर्शनम्।
आलेपनं चरणयोश्चन्दनक्षोदवारिणा।
अपामाचमनीयानां प्रतिग्रहणदर्शनम्।
उपस्पर्शनमालेपश्चन्दनाद्यम्बुचर्चया।
पुष्पमाला धूपदानं मधुपर्कनिवेदनम्॥ - पाद्मे

आवाहनं आसनं च अर्घ्यं पाद्यं तथैव च।
मन्त्रन्यासञ्च मुद्राञ्च षण्मुद्राञ्च प्रदर्शयेत्।
आचामं पादशाटीञ्च तिलदानं तथैवच।
मधुपर्कं मुखवासञ्च मन्त्रासनमिति स्मृतम्॥ - गारुडे

<u>अर्घ्यादीनां समर्पण अङ्गानि</u>

अर्घ्यं शिरसिविन्यस्य पाद्यं पादतले न्यसेत्।
हस्ते आचमनं दध्यात् गन्धं कायानुलेपनम्।
पुष्पन्तु मूर्ध्निविन्यस्य भोज्यं करतले न्यसेत्।
दीपञ्च नेत्रयोर्दध्यात् धूपं नासन्तिकेपि च॥ - अनिरुद्धे

भक्तिनम्रेण शिरसा दद्यादर्घ्यं तु मूर्धनि।
पादारविन्दयोर्दद्यात्पाद्यं पाद्यप्रतिग्रहे।
ध्यायेदाचमनीयस्य दानकाले जगद्गुरुम्।
आचामन्तमिवाम्भोभिस्साक्षादम्भः प्रतिग्रहः॥ - पाद्मे

आचमन समर्पण कालाः

भोजनान्तेच वस्त्रस्य परिधाने तथाप्लवे।
जिह्वा निर्लेपनान्ते च सर्वत्रचाऽचमनीयकम्॥ - पारमेश्वरे

अर्घ्यादीनां समर्पन प्रकारः

तुलस्याऽर्घ्यं हरेर्दद्यात् ज्ञानमुद्रागृहीतया।
तर्जनी मध्यमान्तस्तु तुलस्या पाद्यमर्पयेत्।
हस्तप्रक्षालनाऽचामं गण्डूषं मुखशोधनम्।
उद्धरण्यां हरेर्दद्यात् पाद्याऽर्घ्यं तुलसीदलात्॥

स्वयंव्यक्तादि आलये अर्घ्य समर्पण प्रकारः

स्वयंव्यक्ते त्रिरर्घ्याणि दिव्ये सैद्धे तथैवच।
मानुषं च गृहार्चायां एकमर्घ्यं प्रदापयेत्॥ - खगप्रश्ने

परिवारेषु एकपात्र पूजा

मूलार्चा उत्सवं बेरं लक्ष्म्यादि पूजनं तथा।
न्यासपूजा यथोक्तञ्च अन्यबेरादिकं तथा।
पुण्याहं शान्तिहोमञ्च बलिदानञ्च कुम्भयोः।
ताम्बूलं तीर्थ कालेच अङ्कुरं यागशालयोः।

परिवारं भक्तदेवञ्च एक पात्रेण पूजयेत्।
एतानि नामदेयानि प्रणवं पूजयेत् क्रमात्॥ - ईश्वरे

<u>साष्टाङ्ग प्रणाम लक्षणम्</u>

हस्ताभ्यां शिरसा पद्भ्यां मनसाच धिया तथा।
अहङ्कारेणचात्मानं निपात्य धरणी तले।
इत्यष्टाङ्गप्रणिपादेन प्रणमेत् पुरुषोत्तमम्॥ - पाद्मे

<u>मधुपर्क लक्षणानि</u>

मधु क्षीरञ्च दध्याज्यं मधुपर्कमितिस्मृतम्।
एकाङ्गं वा समस्तं वा मधुपर्कन्नलोपयेत्।
एकैकं प्रस्थ मात्रंस्यात् तदर्धं वा निवेदयेत्॥ - विष्णुतिलके

मधुपर्कं दधि घृतं मधुयुक्त मनन्तरम्।
समस्तमेवमेकाङ्गं दधिवाऽपि निवेदयेत्॥ - पारमेश्वरे

फलान्येलाफलं सर्पि शर्कराच मधून्यपि।
पञ्चानामपि संयोगात् मधुपर्कमितिस्मृतम्॥ - नारदीयम्

<u>हस्तमुख पादशाटि लक्षणम्</u>

हस्तशाठीं पादशाठीं वामाङ्गे धारयेद्बुधः।
अन्यथा धारयेन्मोहात् सापूजानिष्फला भवेत्।
शाठीमादाय हस्ताभ्यां द्विधाकृत्वा विचक्षणः।
भागमेकं हस्तशाठी हस्तदेशस्त वारिभुक्।
अन्य भागं पादशाठी पाद देशस्त वारिभुक्।

शाठिका द्विविधेनैव शिरोदेशस्त वारिभुक्।
यथैव वामपार्श्वेच शाठीनिक्षिप्यतो बुधः।
तथैवदक्षिणे कर्णे पवित्रं धारयेद्बुधः॥ - सनातन संहिता

<u>श्रीवत्सादि परिवाराणां स्थानानि</u>

प्रणवं कर्णिकामध्ये स्मरेद्वेदादि मब्जजे।
तस्य द्वादशपत्रेषु पूर्वादिषु यथाक्रमम्।
श्रीवत्सं वनमालां च योगमायां च वैष्णवीम्।
विमलां च तथा सृष्टिं शक्तिमुत्कर्षनीमपि।
प्रज्ञां सत्यां तथेशानामनुकम्पां पितामहीम्।
बद्धाञ्जलिधराः पूर्वैर्दोर्भिश्चैतास्तथा परैः।
विकसत्स्वर्णपद्मानि दधानाः कमलेक्षणाः।
वह्निमण्डलपूर्वादिदिक्ष्विन्द्रादीन् यथाक्रमम्।
अर्कस्य मण्डले देवि कुमुदादिपदेष्वमून्।
शङ्खं चक्रं गदां शार्ङ्गं वज्रं खड्गं तथा परम्।
पद्मं मुसलमित्येतानायुधान् पुरुषाकृतीन्।
सोमस्य मण्डले चापि पूर्वादिश्वष्टसु क्रमात्।
व्याप्तिं कान्तिं तथा तृप्तिं श्रद्धां विद्यां जयां क्षमाम्।
शान्तिं च शक्तीरष्टैताः स्मरेच्चामरधारिणीः।
बहिरावरणे तार्क्ष्यमीशकोणे तु सेनपम्।
सर्वां स्थितां प्राञ्जलीं च देवस्याभिमुखान् स्मरेत्॥ - श्रीप्रश्ने – पाद्मे

अनन्तादीनां स्थान निर्णयः

पादुकायां अनन्तञ्च सेनेशं शिवदिक्स्थितम्।

अग्रे देवाय पक्षीन्द्रं गन्ध पुष्पादिभिर्यजेत्॥ - विष्णुतिलके

पादुका समर्पण कारणः

आसनं गन्तुमीशस्य पादयोः पादुकां न्यसेत्॥ - विष्णुतिलके

स्नानासन क्रिया क्रमः मन्त्रश्च

दद्याच्च पादुके स्नातुमुत्थानसमये हरेः।

इदं विष्णुरिति द्वाभ्यां पादुकारोहणं स्मरेत्।

उद्धरेच्च हरिं स्नातुमुत्तिष्ठ ब्रह्मणस्पते।

इति मन्त्रेण देवेशं प्रापयेत् स्नानपीठिकाम्।

मन्त्रैस्तु भद्रं कर्णेभिरिति स्नानासनासने।

सावित्र्या वितरेदर्घ्यं पाद्यं त्रीणि पदेति च।

आपः पुनन्त्वित्येतेन मन्त्रेणाचमनक्रिया।

दन्तधावन काष्ठञ्च तद्विष्णोरिति निर्वपेत्।

जिह्वानिर्लेपनं तत्र तद्विप्रास इति प्रभोः।

मुखप्रक्षालनं दद्याद्विष्णुगायत्र्या पुनः।

अभ्यङ्गं वामदेव्येन कुर्यादुद्वर्तनं पुनः।

कार्यं विष्णोर्नुकमिति मन्त्रेणामलकादिना।

न ते विष्णो इति द्वाभ्यामभिषेकविधिस्ततः।

आपोहिष्ठेति तिसृभिरतो देवा अवन्त्विति।

कङ्कतेन मृजेत्केशान् कलशैः स्नपनं तथा।

हिरण्यवर्णां हरिणीमित्यालेपो हरिद्रया।

हिरण्यवर्णाः शुचयः पावकेति चतसृभिः।

क्षालयो गन्धाम्बुना देहः पुनस्तं कुङ्कुमेनतु।

आलिप्य विष्णुगायत्र्या क्षालयेत्पावमानिभिः।

ब्रह्मजज्ञानमिति च कयानश्चित्र आभुवत्।

इत्येवमर्घ्यपाद्याद्यैर्यजेताद्यं महेश्वरम्।

परिषिच्य तु सावित्र्या सूक्तेन पुरुषात्मना।

सहस्रधारया स्नानं यद्वा कुम्भेन तत्भवेत्।

अग्निर्मूर्धेति मन्त्रेण प्लोतेनाङ्गाम्बु निः सृतिः।

विष्णुगायत्र्या दद्याद्वस्त्रे द्वे धौतनिर्मले।

प्रणवेन ब्रमसूत्रमुत्तरीयञ्च कल्पयेत्॥ - पाद्मे

<u>स्नानासन विषयाः</u>

<u>स्नानासन प्रार्थना</u>

स्नानकालस्त्वयं प्राप्तः तवेच्छा वर्तते यदि।

अभ्यञ्जयित्वा देवेश सुस्नानं कर्तुमर्हसि।

सपादपीठमपरं शुभं स्नानासनं महत्।

आसादयाशुस्नानार्थं मदनुग्रह काम्यया॥ - श्रीप्रश्ने

<u>स्नपनस्य पद निरुक्तिः</u>

स्नकारं सर्व सिद्धिस्यात् पकारं पापनाशनम्।

नकारं नर तेजस्यात् स्नपनं नाम उच्यते॥

<u>अभिषेक पद निरुक्तिः</u>

अकारं अतिरूपं स्यात् भकारं भाग्यवर्धनम्।

षकारं षड्रसोपेतं ककारं कर्म सिद्धितम्।

अकारञ्च भकारञ्च षेकारञ्च ककारकम्।

अभिषेकमिति प्रोक्तं धर्म कामार्थ मोक्षदम्॥ - परम संहिता

<u>स्नानासन उपचाराणि</u>

घनसारे नागवल्ली स्नानविष्टरगोचराः।

पादुके स्नानपीठञ्च स्नानशाटकमन्वतः।

दन्तकाष्ठमथोदर्शो जिह्वानिर्लेखपट्टिका।

ताम्बूलवीटिका वस्त्रमपरार्धप्रसारितम्।

अभ्यङ्गो मौलिमालाच तालवृन्तमनन्तरम्।

चन्दनैश्चर्चनं तन्वा गन्धामलकवारिभिः।

कङ्कतं रजनीस्नानं वस्त्रं गन्धानुलेपनम्।

उत्तरीयं पवित्रं च नृत्त गेयमनन्तरम्।

पाद्यं दशशत च्छिद्रैः स्नानं धारामिरम्भसाम्।

नीराजनं शिखाप्लोतमुष्णीषं प्लोतवाससा।

अङ्गाभिमर्शनं वस्त्रमुपवीत मनन्तरम्।

उत्तरीयं त्रिंशदेते कथिताः कमलासन॥ - पाद्मे

<u>सांस्पर्शिख उपचाराणि</u>

तैलञ्च दन्तकाष्ठञ्च बिल्वाऽमलक चूर्णकम्।

हरिद्रामलकं वस्त्रं गन्धमाल्यानु लेपनम्।

यज्ञोपवीतं भूषां च आयुधानि तथैव च।

पादुकाऽवाहनं चैव सांस्पर्शिक मथोच्यते॥ - जयाख्ये

स्नपनस्य फलम्

यथाव्याधिगतं देहं औषधेन विनश्यति।

तथा बिम्बगतं दोषं स्नपनेन विनश्यति॥ - विष्वक्सेने

स्नपनकाले कूर्च लक्षणम् सङ्ख्या च

द्वात्रिंशदुत्तमं प्रोक्तं मध्यमं षोडशंभवेत्।

अधमञ्चाष्टमं प्रोक्तं कनिष्ठं पञ्चमं स्मृतम्।

कलशानां त्रिभिः कूर्चं कारयेद्द्वादशाङ्गुलं॥ - वासिष्ठे

स्नपनकाले कूर्च सङ्ख्या निक्षेपन क्रमञ्च

सप्तभिः पञ्चभिर्वा यद्वा दर्भैस्त्रिभिः कृतम्।

कूर्चान् कुम्भेषु अवागग्रान् निक्षिपेल्लक्षणान्वितम्।

महाकुम्भे कुशैः कूर्चं चतुर्विंशतिभिः कृतम्॥ - पाद्मे

कलशानां लक्षणम्

सौवर्णा राजता ताम्रा मृण्मया वा यथावसु।

कलशा लक्षणोपेताः पक्वबिम्बफलोपमाः।

अच्छिद्रा स्वनवन्तस्य कालमण्डल विर्जिताः।

अभिन्ना मृण्मयाः कुम्भाः पाषाणस्फोटवर्जिताः।

द्रव्यकुम्भाः द्रोणपूर्णाः तदर्धार्धेन वाथवा।

पादेन कलशाश्शिष्टाः पूर्या वार्धाढकेन तु॥ - पाद्मे

देवस्य दन्तकाष्ठ लक्षणम्

दन्तकाष्टं ततो दद्यात् कदिरोदुम्बरं तथा।

चूतदण्डेन देवस्य दन्तधावनमाचरेत्॥ - पारमेश्वरे

दन्तधावन क्रमः

काष्ठेन देववदने सव्यादारभ्य पश्चिमम्।

शोधरार्थन्तुदन्तानां दर्शयित्वा ततः परं॥ - पारमेश्वरे

घृतारोपन क्रमः

देवस्यपुरतः स्थाप्य पात्रं लोहविनिर्मितम्।

घृतेनापूर्य तत्पात्रंप्रग्वत् संस्कृत्य देशिकः।

उभाभ्याञ्चैव हस्ताभ्यां दूर्वामादाय मूलतः।

घृतेनिमज्यचाग्राणि देवदेवेषु सेचयेत्।

ततस्तु कण्ठपार्श्वेतु ततोदेवस्य मूर्धनि।

पाणिप्रक्षालनं कुर्यादन्तरान्तरयोगतः।

दूर्वाभेदस्तथा प्रोक्ताः घृतारोपण कर्मणि।

हस्तव्यत्यास मार्गेन घृतारोपनमाचरेत्॥ - पाद्मे

स्नानासन उपचाराणां मन्त्राः

दद्याच्च पादुके स्नातुमुत्थानसमये हरेः।

इदं विष्णुरिति द्वाभ्यां पादुकारोहणं स्मरेत्।

उद्धरेच्च हरिं स्नातुमुत्तिष्ठ ब्रह्मणस्पते।

इति मन्त्रेण देवेशं प्रापयेत् स्नान पीठिकाम्।

मन्त्रैस्तु भद्रंकर्णेभिरिति स्नानासनासने।

सावित्र्या वितरेदर्घ्यं पाद्यं त्रीणिपदेति च।

आपःपुनन्त्वित्येतेन मन्त्रेणाचमनक्रिया।

दन्तधावनकाष्ठञ्च तद्विष्णोरिति निर्वपेत्।

जिह्वानिर्लेपनं तत्र तद्विप्रास इति प्रभोः।

मुखप्रक्षालनं दद्याद्विष्णुगात्र्या पुनः।
अभ्यङ्गं वामदेव्येन कुर्यादुद्वर्तनं पुनः।
कार्यं विष्णोर्नुकमिति मन्त्रेणामलकादिना।
नतेविष्णोरिति द्वाभ्यामभिषेकविधिस्ततः।
आपोहिष्ठेति तिसृभिरतो देवा अवन्त्विति।
कङ्कतेन मृजेत्केशान् कलशैः स्नपनं तथा।
हिरण्यवर्णां हरिनीमित्यालोपो हरिद्रया।
हिरण्यवर्णाः शुचयःपावकेति चतसृभिः।
क्षाल्यो गन्धाम्बुना देहः पुनस्तं कुङ्कुमेन तु।
आलिप्य विष्णुगायत्र्या क्षालयेत् पावमानिभिः।
ब्रह्मजज्ञानमिति च कयानश्चित्र आभुवत्।
इत्येवमर्घ्यपाद्याद्यैः यजेताद्यं महेश्वरम्।
परिषिच्यतु सावित्र्या सूक्तेन पुरुषात्मना।
सहस्रधारया स्नानं यद्वा कुम्भेन तद्भवेत्।
अग्निर्मूर्धेति मन्त्रेण प्लोतेनाङ्गाम्बुनिःसृतिः।
विष्णुगायत्र्या दद्याद्वस्त्रे द्वे धौतनिर्मले।
प्रणवेण ब्रह्मसूत्रमुत्तरीयञ्च कल्पयेत्॥ - पाद्मे

<u>कलश स्नपने मन्त्राणि</u>

पाद्याभिशेचनं कुर्यादिदं विष्णुरितीरयन्।
आपोहिष्ठेति मन्त्रेण तथाऽर्घेनाभिशेचनम्।
इमम्मेवरुणमित्येव तथाऽचमन वारिना।

पवित्रन्तेति मन्त्रेण पञ्चगव्याभिषेचनम्।

दधिक्राव्णोति मन्त्रेण दधिस्नपन माचरेत्।

पयोव्रतेन साम्ना च पयसा स्नपनं भवेत्।

मधुवातेति मन्त्रेण मधुना स्नपयेद्गुरुः।

फलिनीत्यनुवाकेन स्नापयेत्तु फलाम्भसा।

घृतस्नातेति साम्ना च घृतेनैवाभिषेचयेत्॥ - पाद्मे

<u>स्नपन मन्त्रे भेदाः</u>

यद्द्रव्यस्यच योमन्त्रः तन्मन्त्रेणाभिषेचयेत्।

अथवा पौरुषैः सूक्तैः द्वादशाक्षर विद्यया।

अथवा विष्णुगायत्र्या षडर्णेनथवा रमे।

स्वमूर्तिविद्ययावाऽपि स्नापयेत् श्रीपतिं गुरुः॥ - श्रीप्रश्ने

<u>तन्तुवेष्टन मन्त्रः क्रमश्च</u>

प्रक्षाल्य विष्णुगायत्र्या द्रव्यकुम्भांस्तथेतरान्।

स्थापयित्वा करतले सव्येऽसव्येन पाणिना।

इन्द्रन्नत्वेति मन्त्रेण तन्तुना परिवेष्टयेत्।

तन्तुना वेष्टितानां स्यादन्तरालं यवान्तरम्।

अर्धाङ्गुलान्तरालं स्याद्यद्वैकाङ्गुलमनन्तरम्॥ - पाद्मे

त्रिगुण्यं सूत्रमावृत्य कलशी वार्धकी घटे।

इन्द्रन्नत्वेति मन्त्रेण तन्तुना परिवेष्टयेत्॥ - विहगेन्द्रे

कलश भेदेन तन्तुवेष्टन भेदाः

तन्तुभिः क्रमयोगेन वेष्टयेन्मूलविद्यया।

महाकुम्भं त्रिसूत्रेण वर्धनींच द्विसूत्रकम्।

कलशांस्त्वेक सूत्रेण अन्तरं यवमात्रकम्॥ - मार्कण्डेये

कलशे वस्त्र वेष्टन क्रमः मन्त्रश्च

वासोभिर्द्रव्य कलशान् युवासुवास इत्यृचा।

कण्ठेवष्टयेदन्यान् वासोभिश्छादयेन्नवैः॥ - पाद्मे

कलशादीनां देवताः

कलशानान्तु गरुडः शेषः सूत्रस्यदैवतम्।

कूर्चानान्तु परंब्रह्माचक्रिकाणांतु चक्रराट्।

वाससां वासुदेवोस्तु सर्वेषां स एव वा॥ - ईश्वरे

कलशस्य शारीरक साम्यत्वम्

अस्थि रत्नं सिरा तन्तुर्मासं मृत्स्ना प्रकीर्तिताः।

शोणितं रक्तमृद्भिस्तु जलं मेदस्तथैव च।

कूर्चन्तु शुक्लमित्युक्तं चर्माम्बरवेष्टनम्।

तत्तत्प्रतिकृतिर्जीवं क्रमादेवं स्मरेद्बुधः॥ - पाद्मे

कलशानां अभावे

कलशानामभावेतु शङ्खं वा शुक्तिकंतु वा।

ईशाने निक्षिपेत्पात्रं स्नानार्थं कल्पितोदके।

पृथक् पृथक् द्रव्याणि क्षिप्त्वाऽभिषेचयेत्॥ - तत्वसंहिता

स्नानकाले देवदर्शन फलम्

स्नानासनस्थं देवेशं यो नरो दर्शयिष्यति।

गङ्गास्नान फलं प्राप्य विष्णुसायुज्यमाप्नुयात्॥ - अनिरुद्धे

पञ्चगव्य पूजने स्थानानि

नवकृतमध्ये दुग्धं ऐन्द्रंतु दधिनिक्षिपेत्।

याम्यान्तु घृतकुम्भञ्च गोमयं वारुणेतथा।

गोमूत्रं सौम्यदिग्भागे स्थापयेत् पञ्चगव्यकम्॥ - विष्वक्सेने

स्नपनबिम्ब अभावे

अभावेस्नपनार्चादेः हेतुना सन्निधावपि।

कूर्चे वा पादुकायां वा देवमावाह्य मूलतः।

तत्तद्बिम्बोक्त कर्माणि कृत्वा मूले विसर्जयेत्॥ - नलकूबरे

कालभेदेन स्नपन विधिः

प्रातःकाले सपर्यायां स्नपनं कर्मकौतुके।

मध्याह्नेपिच सायाह्ने स्नपनं प्रोक्षणं भवेत्॥ - सनत्कुमारे

कलशेषु बध्नीय सूत्रानां नियोजन विधिः

घटेन येन देवेशः स्नाप्यते गुरुणा रमे।

तद्घटावेष्टितं सूत्रं छित्वा प्रादेशसम्मितम्।

बद्ध्वा हरेःकरे देवि स्नापयेत्तद्घटाम्बुना॥ - श्रीप्रश्ने

हरिद्राचूर्ण स्नपन फलम्

श्रियः कुम्भात् समुद्धृत्य श्रीसूक्तेनाऽभिषेचयेत्।

पूर्णाहुतिं यथाहोमे चूर्णस्नानं तथा भवेत्॥ – पाद्मे

स्नपन हरिद्रायां धारण मण्त्रं तत्फलञ्च

हरिद्रा कुङ्कुमं वापि चूर्णं विष्ण्वभिषेचितम्।

ऊर्ध्वपुण्ड्रस्य मध्येतु धारयेद्दीपवत् द्विज।

विष्णुगायत्र्या यच्चूर्णं ललाटे यदिधारयेत्।

अपोह्य पातकान्याशु मोदन्ते दिविदेववत्॥ - सनक संहिता

अभिषेकेतु यच्चूर्णं विष्णुबिम्बेतु यो नराः।

हरिद्रां धारयेन्नित्यं सोऽश्वमेध फलं लभेत्॥ - पारमेश्वरे

स्नपन मध्ये उपचारनियमाः

प्रतिद्रव्यं तु मन्त्रेण ह्यर्घ्यालभन माल्यकैः।

धूपादिभिः समभ्यर्च्य ततस्तेनाभिषेचयेत्॥ - श्रीप्रश्ने

स्नपने जलद्रोण सङ्ख्या निर्णयः

पूर्वाह्णे विंशतिद्रोणं मध्याह्णे द्विगुणं भवेत्।

सायाह्णे विंशति द्रोणं अष्टद्रोणाऽर्ध रात्रिके।

इत्येते जलसङ्ख्यास्यात् अभिषेकं विधीयते॥ - सनत्कुमारे

वस्त्रहीन स्नाने दोषः

वस्त्रपुष्पाणि हीनेन स्नानं कुर्यात् जनार्दनः।

तत्स्नानं राक्षसं ज्ञेयं तद्ग्रामं राक्षसं भवेत्॥ - सार समुच्चये

बिम्ब स्नपनानन्तरम् सालग्राम स्नपनं पूजाच

स्नानान्ते देवदेवस्य सालग्रामस्य शार्ङ्गिणः।

कृत्वाऽभिषेचनं मात्रं नच पूजाविशेषतः।

पुरुषसूक्तेन मन्त्रेण यःस्नापयति नित्यशः।

सालग्राम शिलाभूप सगच्छेत् वैष्णवं पदम्॥ - सनत्कुमारे

इतर पूजाकाले स्नपन अनावश्यः

प्राह्णे स्नपनबेरस्य स्नपनं शास्त्रचिदितम्।
अन्यकाले सपर्यादि होमान्ते वोत्सवान्तिमे।
पूजने प्रोक्षयेत् स्नानबिम्बं स्नानीय वारिभिः।
सालग्रामशोलानान्तु स्नपनं सार्वकालिकम्॥ - श्रीप्रश्ने

अलङ्कारासन विषयाः

अलङ्कारासन क्रिया क्रमः मन्त्रश्च

आचान्तमन्वधिष्ठाय पादुके मण्डनासने।
सुखासीनाय देवाय प्रग्वदर्घ्यादि निर्वपेत्।
धूपेनागरुजेनार्द्रान् मूर्धानं दिव इत्यृचा।
केशान् संशोष्य शुचिना चन्दनेन सुगन्धिना।
इदं विष्णुरिति श्रुत्या लेपनं वपुषस्मृतम्।
जितन्त इति च मन्त्रेण मण्डनैरपि मण्डयेत्।
पुष्पाणि दद्यात्तद्विष्णोरिति मन्त्रेण मन्त्रवित्।
इरावतीति मन्त्रेण पादयोरक्षतान् क्षिपेत्।
अञ्जनं विष्णुगायत्र्या व्याहृत्या दर्पनेक्षणम्।
जितन्त इति धूपैश्च धूपयेदगरूत्थितैः।
उद्दिप्यस्वेति मन्त्रेण दीपारोपणमिष्यते॥ - पाद्मे

अलङ्कारासन उपचाराः

अलङ्कारासनस्थस्य हरेः तत्कालगोचराः
उपानहौ शिरस्त्राणं पीतकौशेय धारणम्।
कर्पूर रजसालेपम् आपादतलमस्तकम्।
कस्तूरिका मृगपदश्चन्दनेनानुलेपनम्।
व्यजनं चामरव्युहः कुङ्कुमेनानुलेपनम्।
गन्धं च कृत्रिमा भूषा ब्रह्मसूत्र प्रकल्पनं।

उत्तरीयं मौलिमाला बाहुमाला विलम्बनम्।
मृत्स्नया तिलकं कुर्यात् अञ्जनञ्च शलाकया।
पुष्पाविकिरन् ब्रह्मन् महादर्शप्रदर्शनम्।
ताम्बूलिका धूपदीपौ शालितण्डुलपात्रिका।
स्वाध्यायाध्ययनं दानं नाट्यं वेणु निनादनम्।
वीणादिवादनं पाठे मङ्गलानामनन्तरम्।
नीराजनञ्च पिण्डाणां पञ्चानां क्षेपनं दिशि॥ - पाद्मे

<u>अलङ्कारासन प्रार्थना</u>

सपद्मपीठं परमं इदं भूषासनं महत्।
आकल्पधारणार्थाय आतिष्ठ जगतां प्रभो॥ - श्रीप्रश्ने

<u>औपचारिक उपचाराणि</u>

दर्पणं व्यजनं छत्रं पूकशं (कलशं)पूर्ण पात्रकम्।
धूपं दीपं महाकुम्भं नृत्यं वाद्यं च गीतकम्।
योषितेश्चतुरङ्गैश्च मात्रा मुद्रा विराजितैः।
सर्पाकृति दर्शितानि औपचारिकमिष्यते॥ - जयाख्ये

<u>वस्त्र समर्पणे कालभेदेन वर्णभेदाः</u>

उषत्कालेतु नीलंस्यात् पूर्वाह्ने शुद्धवस्त्रकम्।
मध्याह्नेरक्त वस्त्रंस्यात् सायाह्ने क्षौम वस्त्रकम्।
निशायां श्यामवर्णंस्यात् रात्रौपीतांबरं धरेत्॥ - अनिरुद्धे

<u>अञ्जनस्य लक्षणमाह</u>

उक्तचन्दन कस्तूरि करटी रोचना जटा।
अञ्जनानामभावे च चन्दनं च प्रशस्यते।
हैम कर्पूर संयुक्तं अशीत गुण रञ्जनम्।
अञ्जनं हस्त संग्राह्यं उक्त मार्गेण मर्धयेत्।
दर्पणाकारवदने घोनाग्रे मत्स्य रूपिणम्।

अञ्जनं च शलाकं च देव नेत्रे च रञ्जयेत्।
सूर्याय चन्द्र देवाय नयने मध्य देवताः।
तत्प्रमाणंच नयनं सर्व काम फलप्रदम्॥ - बृहद्ब्रह्मे

<u>अलङ्कारासन उपचाराणां मन्त्राः</u>

आचान्तमन्वधिष्ठाय पादुके मण्डनासने।
सुखासीनाय देवाय प्राग्वदर्घ्यादि निर्वपेत्।
धूपेनागरुजेनार्द्रान् मूर्धानंदिव इत्यृचा।
केशान् संशोष्य शुचिना चन्दनेन सुगन्धिना।
इदंविष्णुरिति श्रुत्या लेपनं वपुषस्मृतम्।
जितन्त इति मन्त्रेण मण्डनैरपि मण्डयेत्।
पुष्पाणि दद्यात्तद्विष्णोरिति मन्त्रेण मन्त्रवित्।
इरावतीति मन्त्रेण पादयोरक्षतान् क्षिपेत्।
अञ्जनं विष्णुगायत्र्या व्याहृत्या दर्पणेक्षणम्।
जितन्त इति धूपैश्च धूपयेदगरूस्थितैः।
उद्दिप्यस्वेति मन्त्रेण दीपारोपणमिष्यते॥ - पाद्मे

<u>प्रातःकाल पूजने उपयोज्यपुष्पाणि</u>

पाटलं शतपत्रञ्च तुळसी घटमल्लिका।
नन्द्यावर्तञ्च मंदार माधवी चंपकं तथा।
पुन्नाग केतकीचैव प्रातःकालार्चने दश॥ - पाद्मे

<u>मध्याह्नकाल पूजने उपयोज्यपुष्पाणि</u>

श्वेताब्जं करवीरञ्च पालाशं तुळसी तथा।
उत्पलं बिल्व दूर्वाच रक्तोत्पलमथापिवा।
कोविदारक पत्रञ्च श्वेतपाटलमेवच।
प्रोक्तान्येतानि पुष्पाणि दश मध्याह्न पूजने॥ - पाद्मे

सायाह्नकाल पूजने उपयोज्यपुष्पाणि

रक्ताब्जं कुमुदञ्चैव मल्लिका जाति मालति।
माधवी करवीरञ्च ह्रीबेरपुष्पदंशकम्।
तथादमनकञ्चैव सायङ्कालाऽर्चने हरेः॥ - पाद्मे

सर्वकालार्चनीय उपयोज्य पुष्पाणि

ह्रीबेरंच तमालंच तथा दमनक त्रयम्।
तुलस्यौ सित कृष्णेच केवला क्षपकस्तथा।
एतैःसंपूजयेत् सर्वकालेषुच तथाऽर्चयेत्॥ - पाद्मे

पर्यूषित रहित पुष्पाणि

तुलसीवर्षमेकञ्च बिल्वं षाण्मासिकं तथा।
पद्मं सप्त दिनं प्रोक्तं करवीरं तथाऽष्टमम्।
सौवर्णं राजतं पुष्पं तुलसी बिल्वमेवच।
अर्चयेद्देव देवेशं प्रक्षाल्यच पुनःपुनः॥ - शाण्डिल्ये

नक्षत्रदीप दर्शन विधिः

दीपजालेषु ताराणि मध्यदीपेषु वै विभुम्।
आवाह्य दर्श्येद्दीपम् उद्दीप्यस्वेत्यृचा हरेः।
ततो यवनिकां त्यक्त्वा दीपमादाय देशिकः।
त्रिवारं गुणमन्त्रेण पादादिशिरसोऽवधिः।
कर्मबिम्बादि बिम्बानां एवं कृत्वा ततो गुरुः॥ - श्रीप्रश्ने

चामर व्यजन समर्पणे

संवीज्य व्यजेनैव मायूरेण ततेन च।
ततोऽप्यचटनं हैमं राजतं दारुजं तु वा॥ - पारमेश्वरे

आदर्शादि उपचार देवताः मन्त्राणिच

आदर्शे कमलां देवीं व्यजने पवनाधिपम्।
आतपत्रे पन्नगेन्द्रमर्चयेत् स्वस्वविद्यया॥ - श्रीप्रश्ने

धूप पात्रस्य अधिदेवताः

मुखे पावक दैवत्यं द्विपादौ चन्द्रसूर्ययोः।
धूप पात्राधि दैवताय ओं नमःपावकाय च ॥ - पाद्मे

धूप द्रव्याः

गुग्गुल्यादगरुंचैव सकोष्ट चन्दनं तथा।
उशीरञ्च गुग्गुलंचैव धूपं कर्पूरकैर्युतम्।
एवमष्टविधं ग्राह्यं धूपद्रव्यमितिस्मृतम्॥ - सनत्कुमारे

धूप समर्पण लक्षणम्

न धूपैः स्फुरदङ्गारैः नज्वालैश्च निरञ्जनैः।
धूपं दत्वाऽथ देवेशं पादं वामेन ताडयेत्।
देवदारु कृतं धूपं चन्दनागरु मिश्रितम्।
दद्याद्देवाय पूजायां सधूमाङ्गार सम्भवम्।
शाली सर्जर संदग्ध कृत्रिमागरु मिश्रितम्।
धूपं सौगन्धमादाय देवाय विनिवेदयेत्॥ - परम संहिता

धूप समर्पण कालानि

पुण्याहं पात्रपीठं च स्नानं गन्धादि धूपकम्।
कलशं शान्ति होमं च अभिषेके केशशोधनम्।
रक्षामुहूर्तं दीपान्तं धूपं दत्वा प्रदर्शयेत्॥ - सनत्कुमारे

दीप समर्पण लक्षणम्

मुखे वक्षसि नासाग्रे कण्ठे वक्षसि पादयोः।
प्रत्येकं प्रणवाकारं दीपारोपण लक्षणम्॥ - परम संहिता

दक्षिणंपादमारभ्य वामपादंतु पश्चिमम्।
वाद्यमङ्गलसंयुक्तं गीतमङ्गुष्ट संयुतम्।
दीपम् आरोपयेन्मन्त्रि उद्दीप्यस्वेति मन्त्रतः॥ - अनिरुद्धे

दीपस्य वर्त्ति लक्षणम्

कार्पासं पाटलं वापि पद्मतन्तु समुद्भवम्।
कौसंबं रजितं कृत्वा देवस्याग्रे समर्पयेत्॥ - विहगेन्द्रम्

दीपारोपण फलम्

तत्सन्निधौ महादीपानारोपयति यो नरः।
दीपं दीपद्वयं वापि आज्येन तैलेनवापुनः।
इहे सांराज्यतां प्राप्य देहान्तेयांतितत्पदम्॥ - विहगेन्द्रे

दीपादीनां अधिदेवताः

पञ्चदीपं निवृत्यादि एक दीपे सरस्वति।
अष्टदीपे अष्टशक्तिस्यात् द्वादशे केशवार्चनम्।
वासुदेवाद्यनिरुद्धान्तं षोडशं दीप देवताः।
सप्तविंशतिनक्षत्रं कोकणं च विनिर्दिशेत्॥ - विष्णु संहिता

दीपे निवेशित आज्यादीनां भेदाः

उत्तमं गोघृतंचैव मध्यमं तिलतैलकम्।
अधमं वृक्षतैलंच दीपतैलमिहोच्यते॥ - चित्र शिखण्डि संहिता

आज्यसङ्ग्रह गावः लक्षणम्

दीपस्य कापिलं सर्पिः उत्तमं परिचक्षते।
मध्यमं श्वेतवर्णानां गवां पद्मसमुद्भव।
कृष्णगोभ्यां समुद्भूतं अधमंचाज्यसम्मितम्।
अथवा तिलतैलेन अन्य तैलं न कारयेत्॥ - चित्र शिखण्डि संहिता

धूपात्पूर्वं दीप समर्पणम्

दर्शनं दर्पणस्यापि धूपस्याघ्रापणन्ततः।
दीपस्य दर्शनं पश्चात् धूपे वह्निं समर्चयेत्।
दर्शये द्धूपमुद्राञ्च दीपपात्रेऽर्कमर्चयेत्।
दीपमुद्रां प्रदर्श्याथ दर्शयेत् देवनेत्रयोः॥ -विष्णु तिलके

धूपात्पूर्वं दीप समर्पणे फलम्

दीपञ्च प्रथमं दध्यात् पश्चात् धूपं समर्पयेत्।
वामनासापुटे धूपं दीपं अक्षिणि दक्षिणे।
नित्य दीपं क्रिया दीपं बलि दीपं तथैव च।
प्रमादाद्दीप शून्येन तत्र दीपं शतं भवेत्।
मोक्षार्थी दीप माद्यञ्च वर्धन्ते ब्राह्मणानृपाः।
स्वर्गे फलंचेत् धूपादीन् वर्धन्ते वैष्णवास्सदा।
तस्मात्सर्व प्रयत्नेन दीपाद्धूपं समर्चयेत्॥ - पारमेश्वरे

पिष्टदीपस्य लक्षणम्

गोधूम तण्डुलं पिष्टंशर्करेण समन्वितम्।
एलाचूर्णसमायुक्तं घृतेनच समन्वितम्।
दीप पात्राकृतिं कृत्वा मध्ये दीप समन्वितम्।
पिष्ठ दीपमिति प्रोक्तं देवदेवाय दापयेत्॥ - अनिरुद्धे

पिष्टदीपस्य कालाः मन्त्राः तत्क्रमञ्च

नीराजयेत् प्रदोषेषु एवं तदपि कथ्यते।
स्वर्णपात्राणि युग्माणि विपुलाणि यथावसु।
तन्मध्ये शालिपृष्ठेषु वर्तिदीपान् प्रदीपयेत्।
तथा विधानि पात्राणि करैरुद्धृत्य योषितः।
कल्याणवस्त्राभरणा निर्गताश्च महानसात्।
श्रेणीबद्धाः पुरोगीतनृत्तवाद्य समन्विताः।
अन्तिके देवदेवस्य विन्यसेयुर्महीतले।
आधारेषु ततः पत्राण्यर्चयेद्विश्वविद्यया।
आचार्यो धृवबेरादौ षडङ्गन्यासमाचरेत्।
इष्ट्वा च देवमर्घ्याद्यैर्दीपपात्राणि पूजकः।
उद्धृत्य भ्रामयेद्देवम् आपादतल मस्तकम्।

गुणमन्त्रैस्त्रिभिः पात्राण्यनु योषित्सु निक्षिपेत्।
अर्चनामेवमन्यत्र पात्राण्येकैकशः क्रमात्।
भ्रामयेद्ध्रुवबेरस्य यद्वा सर्वाणि पद्मज।
एवं नीराजनं दद्यात् श्रीभूम्योरिष्यते पृथक्।
नीराजने तन्यमाने तूर्यघोषमुदीरयेत्।
नृत्तगीतप्रकारांश्च कुर्युर्वारपुरन्ध्रयः।
दीपपात्राणि सर्वाणि बलिपीठे समुत्सृजेत्॥ - पाद्मे

<u>नित्यपूजासु दीप समर्पण कालाः</u>

शयनान्तेचाऽर्चनान्ते होमान्ते बलिदानके।
स्नानान्ते भोजनान्तेच भ्रमणान्ते विशेषतः।
तत्तत्संपूरणार्थाय नीराजन मथाचरेत्।
नीराजनं विनाकुर्यात् तत्कर्म निष्फलं भवेत्॥ - सनके

<u>नीराजनस्य त्रै विध्यं</u>

स्नानान्ते भोग यज्ञान्ते द्वितयं सात्विकं भवेत्।
सायंकाले प्रतिदिनं कुर्याद्राजस सम्मितम्।
पूजायां दीपदानाग्रे नैवेद्यान्तेपि तामसम्।
अलंकारासनोक्तानां भोगानां अन्ततोपिवा।
उभयत्रापिवा कुर्यात् विभवेच्छानुसारतः।
कुर्याद् प्रासाद एकस्मिन् तेषामेकं नतु त्रयम्॥ - पारमेश्वरे

<u>भगवत् सन्निधौ घटदीप समर्वण विधिः</u>

तिरस्कृतिं व्यपोह्याथ घटदीपार्चनं चरेत्।
अर्चना विश्वमन्त्रेण घटदीपस्य पद्मज।
त्रिः परिभ्रामयेद्देवं गुणमन्त्रै स्त्रिधा स्वयम्॥ - विष्णुतिलके

घटदीपस्य आवाहन देवताः

घटाग्रे चन्द्र दैवत्यं कण्ठेस्याद्विष्णुदैवतम्।
उदरे बृह्म दैवत्यं आसने रुद्रदैवतम्।
मुखे पावकमावाह्य घट दीपं प्रदर्शयेत्।
आपादे चक्र दैवत्यं वृत्तश्चक्राधि दैवतम्।
एवमेव प्रकारेण पादादारभ्य दैवतम्॥ - पारमेश्वरे

घटदीप दर्शनेन फलम्

घटदीपंतु यःपश्येत् देवस्य पुरतस्थितः।
सप्तजन्मार्जितं पापं तत्क्षणादेव नश्यति॥ - विष्णुतिलके

मात्रादानस्य लक्षणं

मात्रादानं ततो दध्यात् तत्प्रकारमिहोच्यते।
सौवर्णादिषु पात्रेषु यद्वा वेत्रलता कृते।
तण्डुलंच ततो वस्त्रं विन्यसेच्चत्तिलानपि।
तिलेषुविलिखेत् पद्मं विश्व मन्त्रेण पद्मज।
कर्णिका केसरयुतं चतुर्दळ समन्वितम्।
हेमं फलंच मध्वाज्यं प्रतिपर्णान् पृथक् पृथक्।
सचूर्णं पूर्य ताम्बूली विन्यसेत् कर्णिका तले।
पात्रमुत्थाप्य हस्ताभ्यां उद्दीप्यस्वेति दर्शयेत्।
देशिकाय स्वयंदद्यात् गोविन्दप्रियतामिति॥ - विष्णुतिलके

तिलान् वस्त्रं तथा हेम ताम्बूलं तण्डुलानपि।
फलानि गव्यमघारं गाश्च धान्यं यथावसु।
गोग्रासं देशिकायैव दद्याद्देवस्य सन्निधौ।
अधिपस्य तथा राज्ञो राष्ट्रस्य सकलस्यच।
प्रजानां ब्राह्मणादीनां दानमभ्युदयावहम्॥ - पाद्मे

तण्डुलं तण्डलं मुद्गमाज्यं हेमं फलानि च।
गोग्रासं गाश्च वसनं मात्राद्रव्यमितीरितम्।
ततो देवस्य पुरतः तद्द्रव्यं स्थापयेत् भुवि।
दर्शयित्वातु देवस्य गृह्णियात् तदनन्तरम्॥ - श्रीप्रश्ने

<u>मन्त्रपुष्प पठन विधिः</u>

अपनीते यावनिके पटे भक्तानुकम्पया।
घोषयेत्तूर्यघोषेण नृत्तं गेयं तथाचरेत्।
स्तोत्राणिच कथाश्चित्राः वेदानङ्गानि षट् तथा।
पठेयुरग्रे देवस्य सर्वमन्यच्च मङ्गलम्॥ - पाद्मे

ऋगाद्यध्ययनारम्भं प्रारभेयुश्च वैदिकाः।
स्वरेणोच्चतरेणैव स्तुवीयुः स्तोत्रपाठकाः।
नृत्तार्धमण्डपे रम्ये नृत्येयुर्गणिका जनाः।
मङ्गलानिच गीतानि तत्र गायन्तु गायकाः।
तुलसीपल्लवैर्देवमर्चयेच्च तदा गुरुः।
व्यूहादिनामभिश्चापि विभवाद्यैश्च नामभिः॥ - श्रीप्रश्ने

<u>तुलस्यर्चने विषेशाः</u>

सहस्रनाम्ना यः कुर्यात् कारयेदर्चनं हरेः।
भूलोके सर्वकामान् स आयुषः पूर्णमेवच।
संपदः पुत्रपौत्रादीननुभूय ततो रमे।
प्राप्य विष्णोः परंधाम मोदते नित्यसूरिवत्।
पुष्पैर्लक्षार्चन सममर्चनं तुलसीदलैः।
अष्टोत्तरशतैः कुर्यात् तस्य स्थानं तु पद्मजे।
वैकुण्ठं पदमासाद्य मोदते सानुगैःसह॥ - श्रीप्रश्ने

तुलस्याः अर्चने फलम्

कुञ्जराणां सहस्राणि कपिला कोटिविंशतिः।
कोटि कन्यकादान समंस्यात् तुलस्येकदलाऽर्चनात्॥ - सनक संहिता

भोज्यासन विषयाः

भोज्यासन प्रार्थना

मृष्टपूत स्थिरान्नानि भोज्यभक्ष्याण्यनेकशः।
सम्पन्नानि जगन्नथ भिज्यासन मुपाश्रय॥ - श्रीप्रश्ने

भोज्यासन क्रिया क्रमः

आसनात्पादुके दत्वा गमयेत्भिजनासनम्।
दत्वार्घ्यं पाद्यमाचामं मधुपर्कं निवेदयेत्।
प्रणवेण ततो दद्यात्ताम्बूलीमास्यशोधनीम्।
हविर्निवेदयेत्सिद्धिं भोज्यभक्ष्यादिकं तथा।
मधुरादिरसोपेतं विध्युक्तं सुसमाहितम्।
सुसंस्कृतैश्च निष्पन्नैः युक्तमन्नैः फलादिभिः।
अपक्वैरतिपक्वैश्च यथायोगं प्रकल्पयेत्॥ - पाद्मे

भोज्यासन उपचाराणि

भोज्यासनमारूढे हरौ तत्कालगोचराः।
मधुपर्कञ्च ताम्बूल वीटिका मुखशाटिका।
अर्हणाम्भः पायसान्नं मुद्गान्नञ्च गुडोदकम्।
दध्योदनं पानकञ्च पानीयं हस्तशाटिकम्।
शुद्धिश्च करयोरेला चन्दनाक्षोदवारिणा।
सुखासीने च दाशार्हे चन्दनोदकचर्चया।
अङ्गेष्वालेपनं माल्यमपूपपृथुकास्तथा।
सक्तवस्तिलपिण्डाश्च फलाणि क्वथितं जलम्।

नालिकेराम्बुदानञ्च ताम्बूलिदलवीटिका।
प्रदक्षिण नमस्कारस्तुतिरात्मनिवेदनम्॥ - पाद्मे

<u>आभ्यवहारिक उपचाराणि</u>

सूपोदनं घृतान्नंच तिलान्नं कृसरं तथा।
गुडोदनं घृतान्नंच क्षीरोदन मथापिवा।
पायसान्नमपूपादि लाज सक्तु फलादिकम्।
फलं मूलादिकंचैव तांबूलंच तथैवच।
आहारादि च सर्वत्राऽऽभ्यवहारिक मुच्यते॥ - जयाख्ये

<u>अर्हण पानीय लक्षणम् समर्पण क्रमञ्च</u>

शीतलोदकसंयुक्तम् एलाकर्पूरमिश्रितम्।
मन्दोष्णं वासनायुक्तं अर्हणाम्बु इति स्मृतम्।
भोज्यासनादौ भोज्यान्ते दद्यादर्हणमम्बु च॥ - श्रीप्रश्ने

<u>प्रसाद पद निरुक्तिः</u>

प्रकारं प्राणमित्युक्तं सकारं सर्व साधनम्।
दकारं देवता रूपं प्रसादं नाम उच्यते॥ - अनिरुद्धे

<u>उत्तमादि भेदेन निवेदनस्य मान भेदाः</u>

उत्तमं त्रिशतं भारं मध्यमं द्विशतं भवेत्।
अधमं शत भारंच त्रिविधा संप्रकीर्तिताः।
तदर्धं वा तदर्धं वा यथा विभव विस्तरम्।
एवं प्रकारं नैवेद्यं दध्यात् रसवच्युतम्।
तदन्नं मेरुनातुल्यं अनंत फलदं भवेत्।
भक्ति पूर्वं प्रदध्यात् महाहविर्निवेदयेत्॥ - अनन्त सम्हिता

<u>अपूप लक्षणम्</u>

अपूप रहितं भोज्यं अभोज्यमितिहि स्मृतम्।
तण्डुल क्षारकं कृत्वा पिष्टीकृत्य द्विज स्त्रिया।

तण्डुलात्तदर्धं घृतेनैव योजयित्वाच पिष्टकम्।
त्वदिते लोघृतेसंयक् पलाशच्छतवद्भवेत्॥ - पारमेश्वरे

<u>नारङ्गपत्र चूर्णस्य लक्षणम्</u>

निंबपत्रैश्च संयुक्तं नारङ्गदळसंयुतम्।
जंबीरपत्रसंयुक्तं काळपत्रैः समन्वितम्।
आखण्ड समवायुक्तं हिंगुजीरक संयुतम्।
सैंदवेण समायुक्तं ऊर्वेणच समन्वितम्।
उलूखले विनिक्षिप्य मुसलेनैव मर्दयेत्।
निंबपिण्डमिति प्रोक्तं दध्यन्नं विनिवेदयेत्।
प्रातः काले निवेद्यात देव देवस्य शार्ङ्गिणः॥ - विष्वक्सेने

<u>रोग भेदेन प्रसाद निवेदने भेदाः</u>

नेत्ररोगं गुळान्नं स्यात् तिन्त्रिण्यान्नं महोदरम्।
जलरोगं नाळिकेरान्नं लिकुचान्नं च गुल्मयोः।
कुष्टरोगं तिलान्नं स्यात् मरीचि पित्त नाशिनी।
दध्यन्नं शीतवातं स्यात् पित्त काशं कपित्तयोः।
द्राक्षाफलं मेहरोगं कर्ण रोगादिजंबीरम्।
शीत ज्वरं गुळापूपं हरिद्रान्नं अजीर्णयोः।
जङ्घिवातंच मुद्गान्नं स्त्रीजातिश्च मखण्डयोः।
शिशुजन्निश्च मुद्गापूपं कदळी गर्भरोगयोः।
पनसं शंखरोगं स्यात् मन्त्र रोगादि पायसं।
आयुरारोग्यं ऐश्वर्यं क्षीरं ताम्बूल मेवच।
एतानि निवेदितान्नानि देयं भुक्ति यथा क्रमम्।
दद्याद्यदि ब्राह्मणं च सर्व पापैः प्रमुच्यते॥ - गरुड सम्हिता

## विसर्जनीय नैवेद्यानि

माक्षिकं क्रिमिशान्नंच पाषाणं धान्य दूषकम्।
देहजं नासिका वासं अन्य जाति विलोखनम्।
कुम्भीपाकं द्रव्य हीनं पूर्व भागंच मिश्रकम्।
अत्युष्णमति मंदंच एवमादि विसर्जयेत्।
सावधानेन पक्वान्नं मन्दोष्णंच निवेदयेत्॥ - श्रीप्रश्ने

अपक्वञ्च विपक्वञ्च क्रिमिकीडादिभिर्युतम्।
अत्युष्णमतिशीतञ्च अवैष्णवकृतन्तुवा।
शूद्रचण्डालदृष्टञ्च काकाद्यैश्शुनकादिभिः।
स्पृष्टञ्च रसहीनञ्च अन्यदेवार्पितन्तुवा।
शिलाकेशादिभिर्युक्तं सुरामांसादिदूषितम्।
आघ्रातं लङ्घितञ्चैव धरणीपतितन्तुवा।
देवदेवस्य शौरेस्तु न कदापिनिवेदयेत्॥ - परमपुरुषे

## हविः विभाग विधिः नैवेद्य मन्त्रश्च

अन्नादीन् क्रमशो न्यूनं दशभागं स्मरेद्रमे।
मूलादि सप्त बिम्बानां सप्त भागं निवेदयेत्।
सालिग्रावस्यैक भागं विमानस्य तथा परम्।
होमायचापरं भागं पात्रेऽन्यस्मिन्निवेशयेत्।
द्वात्रिंशत् कबळान् विष्णोः देवस्यत्वेतिमन्त्रतः॥ - श्रीप्रश्ने

## निवेदन सङ्ख्या क्रमः

उत्तमा पञ्चविंशत्या मध्यमं पक्षमेवच।
अधमं नवमं प्रोक्तं नैवेद्यं च समर्पयेत्॥ - विहगेन्द्रे

तर्पन पानीय लक्षणम्

शीतलं तर्पण जलं नारिकेलजलान्वितम्।
श्रमशान्ति निमित्तानि अन्यान्यपिनिवेदयेत्॥ - पारमेश्वरे

निवेदन क्रमः

राजोपचारवत्सर्वम् उपचारे प्रकल्पिते।
प्रोक्षणञ्चास्त्र मन्त्रेण परिषिच्य च वर्मणा।
प्रणवेनार्हणे दत्ते दहनाप्लावनादिके।
कृते च सुरभीमुद्रां दर्शयित्वा च देशिकः।
न्यस्तेऽर्घ्यपुष्पे संस्पृष्टे विष्णुहस्ते समाधिना।
अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु।
प्रगृहिताघ्यर्पुष्पेण दर्शित ग्रासमुद्रया।
देवस्यत्वेति मन्त्रेण नैवेद्यं तद्यथोदितम्।
देवस्य दक्षिणे हस्ते निर्वपेत् साधकस्वयम्।
दत्ते च पानके हस्ते पानीये च सुसंस्कृते।
कृते चाचमने दद्यात्ताम्बूलीमास्यशोधनीम्॥ - पाद्मे

वामेन पाणिना स्पृश्य प्रकोष्टं दक्षिणेनतु।
तेन दक्षिण हस्तेन दध्यात् भोज्यादिकं सदा।
उद्धृत्य देवं पानीयं मधुपर्केन सादरम्।
पत्रं पुष्पं गृहीत्वाच दक्षिणेनतु पाणिना।
अधोमुखाङ्गुलेनैव दध्यात् देवाय भक्तितः॥ - नारदीये

तत्तत्काल नैवेद्यानि

उषः काले च दध्यन्नं चित्रान्नं सङ्गवे तथा।
मध्याह्ने सस्यभिज्यंस्यात् सायाह्नेगुलमिश्रितम्।
रात्रौ च पायसं दद्यात् निशि क्षीरान्नमाचरेत्॥ - अनन्त संहिता

निवेदन भक्ष्यादीनि

अपूपादि फलादीनि दर्शयेन् मुद्रया विना।
भक्ष्यं फलं इक्षुसारञ्च ताम्बूलं लाज पिष्टकम्।
शर्करा दधि पानीयं गुलं मुद्गादि खण्डनम्।
इक्षुखण्डं नालिकेरं मूलमन्त्रेण निवेदयेत्॥ - शाण्डिल्ये

परिवार पूजन विषये

आलयाश्रित बिम्बानां नैवेद्यान्तं प्रपूजयेत्।
मन्त्रन्यासं बलिं होमं बेराणाञ्च न कारयेत्।
मूलेसिक्तस्तथा वृक्षः शाखा भवतु तेजसा।
मूलेन पूजनं कुर्यात् सर्वं भवतु पूजनम्॥ - विहगेन्द्रे

गरुड निवेदित अन्न विषये

तन्निवेदितमन्नाद्यं नराणां रोगिणां सदा।
वन्ध्यानां वनितानां च जयेच्छूनां च भूभुजाम्।
विषोपहतवेषाणां प्रदद्यात् संविभज्य च॥ - पारमेश्वरे

सेनेश निवेदन - परिवारेभ्यः निवेदन विषये

निवेदने चतुर्भागं सेनेशाय निवेदयेत्।
गुरुभिः शेष शेषाशनेनापि सादरम्।
अन्येभ्यः परिवारेभ्यः सर्वं शेषं निवेदयेत्।
सेनेश भुक्त शेषञ्च तत्भूतेभ्यः प्रदापयेत्॥ - पौष्करे

तच्चापि क्ष्मातले कूपे तटाकादौ तु चोत्किरेत्।
नोपभोगं यथा याति काकादिष्वब्जसम्भवे!॥ - पारमेश्वरे

तम्बूल समर्पण कालानि

मुहूर्त शुद्धिः स्नानकाले नैवेद्यमर्चनेतथा।
दन्त दावन दानंच वीथि रथ्यादि यानयोः।
कुम्भादि शान्ति होमेच ताम्बूलंच निवेदयेत्॥ - विष्णुतिलके

ताम्बूल लक्षणम्

जाति पत्रं जातिफलं क्रमुकद्वय मिश्रितम्।
एला लवङ्ग नाळिकेरं नागवल्लि दळैर्युतम्।
मुक्तादि चूर्ण सम्युक्तं ताम्बूलंच निवेदयेत्॥ - विष्णु तिलके

एलालवंग तक्कोल जातिभिश्चान्वितं शुभम्।
मुखवासं शुभंविद्यात् तांबूलमितिच द्विज॥ - नारदीये

मुखवासस्य लक्षणं

नाळिकेरैश्च शकलं एलाजाति लवङ्गकम्।
जाति पत्रञ्च तक्कोलं चूर्ण पुञ्च मरीचकम्।
मुखवास मिति प्रोक्तं देवदेवाय दापयेत्॥ - सनक संहिता

क्रमुकस्यफलं भिन्नं अपक्वं पक्कमेववा।
कर्पूर तैलसंसिक्तमसिक्तंवा मुनीश्वर।
तांबूलवल्लिपत्रैश्च तप्तहेमप्रबोधनैः।
एला तक्कोलजातीभिः कर्पूरं विहितं क्रमात्।
मातुलङ्गफलैर्युक्तं नाळिकेरफलान्वितम्।
शिलाचूर्णेन संयुक्तं कर्पूर सहितं तथा।
संस्कृतं प्रणवेनैव मुखवासं निवेदयेत्॥ - विष्वक्सेने

अग्निकार्य प्रमाणानि

होमस्य अवश्यकत्वम्

होमेन सर्वं लभते होमेलोकानि शान्तये।
होमेन देवता तृप्तिः होमे सर्वं प्रतिष्टितम्।
सर्वं यज्ञमयो विष्णुः विष्णुव्याप्तञ्चराचरम्॥ - विहगेन्द्रे

अग्निकार्य कर्तव्य कालानि

अग्निकार्यं विधिं वक्ष्ये देवदेवस्य शार्ङ्गिणः।
दीक्षायां प्रोक्षणेचैव प्रतिष्ठायां विशेषतः॥

मूलात् पात्रे आवहन क्रमः

नारायणं चतुर्बाहुं मूलाज्जलजसन्निभम्।
शङ्खचक्रगदापद्मैःशोभितं वनमालया।
किरीटहारकेयूर कटकेन विराजितम्।
श्रीवत्सकौस्तुभोरस्कं पीताम्बरधरं विभुम्।
आवाह्यावाहने पात्रे वस्त्रेणाच्छाद्य भाजनम्।
हस्ताभ्यां समादाय होमान्तं प्रेष्यमूर्धनि॥ - श्रीप्रश्ने

अग्न्यागार प्रवेशादि विधिः

द्वारस्थानग्न्यागारस्य चण्डादीनर्चयेत्क्रमात्।
अन्तः प्रविश्य शकृदालिप्ते कुण्डेऽक्षतार्चिते।
उपविश्यात्मनः पार्श्वे दक्षिणे पुष्पभाजनम्।
अन्यानि होमद्रव्यानि वामपार्श्वे तु निक्षिपेत्॥ - पाद्मे

निधाय घण्टावाद्यैश्च शन्नोमित्रमनुं गुरुः।
उच्चरन् पाकशालां वै सदीपस्तु शनैर्व्रजेत्।
यगद्वारं समासाद्य चण्डादीन् मनसार्चयेत्।
गत्वान्तर्होमकुण्डस्य दक्षिणे दर्भसम्स्तरे।

निधाय पात्रं कुण्डस्य पश्चिमे कूर्मविष्टरे।
उपविश्य प्राङ्मुखः सन् सङ्कल्प्य हवनं ततः॥ - श्रीप्रश्ने

पात्र साधन विधिः

आज्यपात्रं चरुस्थालीं प्रोक्षणीं समिधः कुशान्।
प्रणीतां तण्डुलांस्तोयं परिधीन् स्रुक्स्रुवौ तथा।
दर्वीमग्नेर्विहरणं व्यजनानि च मोक्षणम्।
शुष्कञ्च काष्ठं घण्टाश्च गन्धद्रव्यं च साक्षतम्।
द्वन्द्वानि च प्रयोज्यानि न्यञ्चि सत्येव सम्भव॥ - पाद्मे

क्षिपेत् कुण्डोत्तरे देशे षद्कुशान् प्रङ्मुखान् रमे।
तेष्वाज्यपात्रं हव्यं च स्रुक् स्रुवं समिधः कुशान्।
प्रणीतां प्रोक्षणीं दर्वीं व्यजनं मेक्षणं तथा।
अक्षतां शुष्ककाष्ठांश्च तिलांश्च द्वन्द्वशो रमे।
अधोमुखानि पात्राणि निधाय गुरुसत्तमः।
आत्मनो दक्षिणे पार्श्वे करकं पुष्पभाजनम्॥ - श्रीप्रश्ने

उल्लेखन क्रमः

कुण्डमध्ये ततस्तिस्रो रेखाः प्रगायताः पृथक्।
तथोदगायतास्तिस्रो लिखित्वा मूलविद्यया।
दर्भस्तम्बद्वयेनाद्भिरभ्युक्ष्यादाय पावकम्॥ - पाद्मे

अग्नि विभेदाः

मथितं लौकिकं यद्वा निधायच विहृत्य च।
अद्भिः परिसमूह्याग्निं परिस्तीर्य त्रिभिस्त्रिभिः॥ - पाद्मे

अग्नि ज्वलन क्रमः

याज्ञीयैरिन्धनैर्वह्निं प्रज्वाल्यास्त्राभिमन्त्रितैः। - श्रीप्रश्ने

परिस्तृण क्रमः सङ्ख्याच

प्रागग्रैरुदगग्रैश्च दर्भैः पञ्चभिरेव वा।
सप्तभिर्नवभिर्वापि यद्वैकादशसम्मितैः।
ग्रन्थीकृताग्रैरद्वन्द्वैः पञ्चविंशति निष्ठितैः॥ - पाद्मे

परिस्तृण क्रमः प्रणीता स्थानं देवताश्च

कुण्डस्य परितः पञ्च सप्त वा नव वा कुशान्।
परिस्तृणीत द्रव्याग्नि मध्ये दर्भेषु साम्बुमत्।
निधाय तत्प्रणीतायां चक्रराजं समर्चयेत॥ - श्रीप्रश्ने

प्रणीता पात्रात् प्रोक्षणी संस्कारः

तत्राग्निमध्येऽपां पूर्णां प्रणीतामक्षतार्चिताम्।
निधाय दर्भयुग्मेन कूर्चं प्रादेशसम्मितम्।
निर्मायाच्छादनं तस्य त्रिभिर्दर्भैः पवित्रितैः।
कूर्चेन तेन प्रोक्षण्यां प्रणीताजलमावपेत्॥ - पाद्मे

प्रादेशसम्मितं कूर्चं दर्भयुग्मविनिर्मितम्।
उत्तराग्रं तु विन्यस्य त्रिभिर्दर्भैः पिधाय ताम्।
प्रोक्षणीमात्मनश्चाग्रे निधाय गुरुसत्तमः।
प्रोक्षण्यां तत्प्रणीताम्बु कूर्चेन सह योजयेत्॥ - श्रीप्रश्ने

प्रोक्षणी संस्कारः

प्रोक्षणीम् आत्मनश्चाग्रे सकूर्चं न्यस्य मन्त्रवित्।
अङ्गुष्ठानामिकाभ्यां तत्कूर्चं तत्करयोर्द्वयोः।
पुनराघारम् उत्पूय त्रिः प्रोक्ष्य प्रोक्षणीं पुनः।
होमद्रव्याणि सर्वाणि प्रोक्षयेत्तेन वारिणा।
स्पृशेच्च तानि द्रव्याणि नामादेशं यथायथम्।
स्त्रावयेत्प्रोक्षणीवारि प्रदक्षिण्येन तां पुनः॥ - पाद्मे

प्रोक्षणीं प्रोक्षण मन्त्रः तत्क्रमञ्च

अङ्गुष्ठानामिकाभ्यां तु तत्कूर्चं हस्तयोर्द्वयोः।
गृहीत्वा तन्निरुत्पूय होमद्रव्याणि शास्त्रवित्।
कृत्वोत्तानानि पात्राणि सपवित्रेण चाम्बुना।
चक्रगायत्र्या प्रोक्ष्य तत्तन्नाम समुच्चरन्।
द्रव्याण्यपि च पात्राणि संस्पृशेत् क्रमशो रमे।
अवशिष्टेन तोयेन प्रणीतां परिषेचयेत्॥ - श्रीप्रश्ने

प्रणीता संस्कारः

कृत्वाम्भः पूरितां देवं प्रणीतायां सभाजयेत्।
अग्नेर्दक्षिणतो दर्भकूर्चे तन्मयविष्टरे॥ - पाद्मे

भूयः प्रणीतामापूर्य तस्यां देवं चतुर्भुजम्।
शङ्खचक्रगदाशार्ङ्गनन्दकादिविभूषितम्।
वासुदेवं समभ्यर्च्य कुण्डस्येशानविष्टरे॥ - श्रीप्रश्ने

ब्रह्मावाहनम्

आवाह्य बुध्यया ब्रह्माणमिष्ट्वा प्रक्षाल्य वारिणा॥ - पाद्मे

निधाय दक्षिणे स्थाने कूर्चं द्वादशभिः कुशैः।
तावसङ्गुलमायामं कृतं विन्यस्य सम्स्तरे।
चतुर्मुखं चतुर्बाहुं साक्षमाला कमण्डलुम्।
गिरासमेतं हैमाभं ब्रह्माणं तत्र चिन्तयेत्॥ - श्रीप्रश्ने

चरुश्रपनम्

--------------------- प्रक्षाल्य वारिणा।
विष्णुगायत्र्या स्थालीमाढकं तत्र तण्डुलम्।
प्रक्षिप्य हृदयाद्यङ्गैः प्रक्षाल्याग्नावधिश्रपेत्॥ - पाद्मे

### चतुर्विधमन्नम्

केवलान्नं तथा मौद्गं पायसान्नं गुलोदनम्।
चतुर्विधश्चरुर्ज्ञेयः पाकश्चुल्यामपीष्यते।
यादृङ्निवेद्यते बिम्बे होतव्यश्चापि तादृशः॥ - पाद्मे

### आज्य संस्कारः

आज्यस्थाल्यां निरूप्याज्यं द्रावितं गालितं तथा।
तत्रप्रत्यस्य दर्भाग्रद्वयं मन्त्रेण मन्त्रवित्।
अङ्गारेषु निधायाग्नौ तां दीप्तेनाथ बर्हिषा।
पर्यग्निकुर्यादुत्तार्य यथास्थानं विवेशयेत्।
उत्पूयोत्प्लवनं कूर्चमद्भिः स्पृष्ट्वा ह्युषर्बुधे।
प्रहृत्य चामृतीकृत्य घृतं सुरभिमुद्रया॥ - पाद्मे

आत्मनः पुरतो देवि पात्रमाज्यस्य देशिकः।
दर्भेषु साधयेत् तस्मिन्नाप्यायस्वेति मन्त्रतः।
गालितं द्रावितं गव्यमाज्यमापूरयेद्रमे।
प्रणीतेः कूर्चमादाय चाज्यस्थाल्यां नियोजयेत्।
अग्नेरुत्तरतोऽङ्गारान् गृहीत्वा परिधेस्ततः।
उत्तरान् पश्चिमे भागे तां निधायासनस्थितिम्।
तस्मिन्नग्नावाज्यपात्रं दर्भान् प्रज्वाल्य दर्शयेत्।
द्वयमन्त्रेण तद्दर्भान् विसृजेदुत्तरे स्थले।
प्रच्छिद्य दर्भयोरग्रं शोधयेत् सलिलेन तत्।
प्रक्षिप्याज्ये कुशस्तम्बद्वयमादीप्य देशिकः।
दर्शयेत् पुनराज्यं त्रिः पर्यग्नि च ततश्चरेत्।
दर्भयुग्मं विसृज्याथ कुण्डेऽङ्गारान् नियोजयेत्।
सव्यदक्षिणहस्ताभ्यां तत्पात्रं चात्मनः पुनः।

पुरो निधाय कूर्चेन त्रिभिरुत्पूययेद्गुरुः।
कूर्चग्रन्थिं विसृज्याप उपस्पृश्यानले क्षिपेत्।
प्रदर्श्य सुरभीमुद्रामष्टदर्भैः पिधाय च।
चक्रमुद्रामपि तथा---------------॥ - श्रीप्रश्ने

दिक्षु इन्द्रादीन् पूजनम्

अवकुण्ट्या च दिक्पालानिन्द्रादीन् पूजयेत् क्रमात्॥ - पाद्मे

स्रुक्स्रुव संस्कारः

उष्णोदकेन प्रक्षाल्य स्रुक्स्रुवौ कुशपञ्चकम्।
कूर्च मादाय तौ तेन मूले मध्ये च मूर्धनि।
सम्मृज्य कूर्च मूलेन मध्येनाग्रेणच क्रमात्।
निष्टप्याग्नौ निधातव्यौ तावुदीच्यामथात्मनः॥ - पाद्मे

मार्जन कूर्च विसर्जनम्

अद्भिः प्रोक्ष्य ततौदीच्यां न्यस्य कूर्चस्य वै रमे।
ग्रन्थिं विसृज्य तत्कूर्चमग्नौ प्रक्षिप्य देशिकः॥ - श्रीप्रश्ने

होमद्रव्ये आज्य सेचनम्

स्रुवेणाज्यं समादाय होम वस्तुषु सेचयेत्।
चरुं चाज्येन संसिच्य पार्श्वे तमवरोपयेत्॥ - पाद्मे

परिधि – आघार - इध्म समिधः विषये

उदक्संस्थाः परिधयः प्रत्यगारम्भणास्तथा।
निधातव्याः शिखीशान कोणयोस्समिधौ तथा।
ऊर्ध्वे निधाय मनसा ध्यायन्निध्मान् प्रजापतिम्।
एकतोऽग्रान् सकृत्पञ्च दशोक्तान् मुष्टिमुद्रया।
आदद्यात्---------------------॥ - पाद्मे

परिधीनां देवताः परिषेचन क्रमः मन्त्रश्च

श्रीधरादित्रिमन्त्रेण परिधीन् स्पर्शयेद्रमे।

न्यसेदघारसमिधौ प्रोक्षणीं करकाञ्जलैः।

आपूर्य कुण्डं परितः अदितेत्यादिभिस्त्रिभिः।

प्रागग्रमुदगग्रं तैस्तोयैः संस्तीर्य देशिकः।

देवादि प्रसुवान्तेन मन्त्रेण परिषेचयेत्॥ - श्रीप्रश्ने

इध्महोमे विशेषः

ध्यात्वा ब्रह्माधिपं देवमिध्माग्रान् घृतसेचितान्।

गृहीत्वा पञ्चदश तु जुहुयात् मुष्टिमुद्रया।

आघाराहुति विषयः

आदद्यादाज्यपात्रञ्च कुशकूर्चेन वेष्टिते।

वामे करे निधायाग्नावाघाराहुतिमाचरेत्।

प्राजापत्यन्तथाचैन्द्रमाज्यभागं तथाचरेत्।

आग्नेयं दक्षिणे भागे सौम्यं भागे तथोत्तरे।

मध्ये व्याहृतिभिर्हुत्वा स्मरेदग्निमनन्तरम्॥ - पाद्मे

नित्याग्नि ध्यानम्

एकवक्त्रं प्रवालाभं जटामकुटमण्डितम्।

त्रिनेत्रं सप्तजिह्वञ्च मेषारूढं चतुर्भुजम्।

शङ्ख चक्र धरं देवं बद्धाञ्जलिपुटं विभुम्।

एवं सञ्चिन्त्य मनसा स्थविरानलमभ्जजे॥ - श्रीप्रश्ने

अग्नेः जातदोष शान्तिः

तिलानाघारसंमिश्रान् जुहुयाज्जातशान्तये।

अष्टोत्तरशतं वारान् द्वादशाक्षरविद्यया॥ - पाद्मे

अग्नेः उग्रशान्तिः

गुरुः प्रद्युम्नमन्त्रेण वह्नेरुग्रप्रशान्तये।
तिलैरष्टाहुतीर्हुत्वा घृतेन निगमादिना।
समिधो मूलमन्त्रेण जुहुयात् पूर्वसङ्ख्यया।
वह्निं गन्धादिदीपान्तं स्वाहान्तेन घृतैर्यजेत्॥ - श्रीप्रश्ने

परिषेचन - आवाहन विधिः

गन्धाद्यैरात्मनो दद्यादक्षतानि च वर्मणा।
परिषिच्य जलेनाग्निं तन्मध्ये योगपीठिकाम्।
कल्पयित्वाच तन्मन्त्रैर्जुहुयात् सर्पिषासकृत्।
तत्रावतार्य हृदयाच्चिद्रूपं परमेश्वरम्।
सकलीकृत्य मन्त्रस्य न्यासं कुर्याद्यथाविधि।
अर्घ्यपूर्वं निवेद्यान्तं जुहुयात्सर्पिषा सकृत्।
जपार्थञ्च सकृन्मन्त्रैर्जुहुयात् सर्पिषा ततः॥ - पाद्मे

अदितेऽन्वमग्गुं स्थादि प्रासावीरन्ततो रमे।
जलेन परिषिच्याथ वह्नौ पीठं प्रकल्पयेत्।
पात्रस्थं परमात्मानं योगपीठे विचिन्तयेत्॥ - श्रीप्रश्ने

अग्नेः प्रार्थना

अयुतायुतार्कतेजस्त्वं नारायण जगत्पते।
यवद्धोमावसानं त्वं कुण्डेस्मिन् सन्निधिं कुरु॥
एवं सम्प्रार्थ्य देवाय मन्त्रन्यासं समाचरेत्॥ - श्रीप्रश्ने

परिवार होमः

समिद्भिर्वा तिलैः पुष्पैर्बीजैर्वाप्यथवा फलैः।
परिवारार्थमप्येवं सर्पिषा जुहुयात्सकृत्॥ - पाद्मे

समिदन्नाज्य होमः

शतं तदर्धं पादो वा समिधोऽष्टौ यथोदिताः।
तदर्धं वा घृताक्तास्ता जुहुयान्मूलविद्यया।
आज्यावसिक्ताश्चरवः प्रत्यृचं ग्रासमुद्रया।
नृसूक्तेन च होतव्यं मूलमन्त्रेण सर्पिषा।
शतादि सङ्ख्या होमो ध्यात्वा परमपूरुषम्॥ पाद्मे

समिदन्नाज्य होमकर्तव्य क्रमः

स्रुवेण जुहुयादाज्यं हस्तेन समिधः पुनः।
चरुं पलाशपत्रेण यद्वा हस्तादिना भवेत्॥ - पाद्मे

स्विष्टकृद्धोम विधिः

कुक्कुटाण्डप्रमाणन्तु चरोः पिण्डं घृताप्लुतम्।
निक्षिप्य च स्रुचोगर्तेऽभिघार्य स्रुवण च।
ससमिद्दर्भकुसुमं जुहुयान्मूलविद्यया॥ - पाद्मे

बीजापूरोपमं पिण्डं घृताप्लुतमथो गुरुः।
स्रुचो गर्ते विनिक्षिप्य ससमित्कुसुमं चरोः।
सघृतेन स्रुवेणास्य पिदध्याद्बिलमब्जजे।
मस्तकावधि तत्पात्रं दोर्भ्यामादाय देशिकः।
मूलमन्त्रं समुच्चार्य जुहुयात् परिषेचयेत्॥ - श्रीप्रश्ने

प्रायश्चित्त होमः

प्रायश्चित्तार्थमाज्येन पञ्चोपनिषदा पुनः॥ - पाद्मे

पूर्णाहुति विधिः

स्रुचमाज्येन संपूर्य सदर्भं समिधान्वितम्।
उद्धृत्य नासिकाग्रान्तमभिघार्य स्रुवेण च।
जुहुयान्मूलमन्त्रेण पूर्णाहुत्या तु साधकः॥ - पाद्मे

### उत्तर परिषेचनम् – भस्मना तिलकञ्च

स्रुचं जलेन संपूर्य बहिः कुण्डात्प्रदक्षिणम्।
सेचयेद्वारिशेषं तु निनयेच्छिरसि स्वयम्।
भस्मना तिलकं कृत्वा हरिमग्नेस्समुत्सृजेत्॥ - पाद्मे

### अन्येभ्यः होम भस्म धारणे फलम्

हरेर्गेहेस्थितोहोम बस्मस्यान्मङ्गलप्रदः।
तस्माद्धारयेद्विप्राः सर्वेपिच नराभुवि॥ - परमपुरुषे

### पात्रात् आवाहितं देवं पुनर्नियोजनम्

### प्रणीता नियोजने विशेषाः

कुण्डावाहने पात्रे स्मरेन्नारायण विभुम्।
प्रणीतायां स्थितं देवं हृत्कजे चिन्तयेद्गुरुः॥ - श्रीप्रश्ने

### नित्यहोमे परिधि विषयः

### ब्रह्मोद्वासनं परिस्तृण विसर्जनञ्च

उद्वासयेद्विधातारम् आत्मनोऽग्रे स्रुचं न्यसेत्।
तद्दक्षिणेत्वाज्यपात्रं स्रुचोवामे न्यसेत् स्रुवम्।
नित्यहोमेषु परिधीन् बहिर्दिक्षु न दापयेत्।
उपयुक्तकुशान् सर्वानादाय गुरुसत्तमः।
कुशानां मूलमध्याग्रानाज्यपात्रे स्रुवे स्रुचि।
त्रिवारं स्पर्शयित्वैवं दर्भानग्नौ नियोजयेत्॥ - श्रीप्रश्ने

### होम फल समर्पनम्

गृहीत्वार्घ्यं प्रदद्याच्च धाम्नि देवाय पूजकः।
भक्त्यायदग्नौ विहितं यथाशक्ति यथाविधि।
आराधनं तदेवेति गृहाण परमेश्वर॥ - पाद्मे

तर्पितोऽसि विभो! भक्त्या होमेनानलमध्यगः।
होमद्रव्येषु यद्वीर्यं तदिदं चात्मसात्कुरु।
विनिवेद्य विभोर्होमं पूजां कृत्वा यथाविधि॥ - पारमेश्वरे

<u>अग्निकार्येन फल प्राप्तिः</u>

अग्निकार्यविधिर्ह्येषस्संक्षेपात् कथितो मया।
विधिनानेन यः कुर्यादग्निकार्यं दिने दिने।
स याति ब्राह्मणस्थानम् भुक्त्वा भोगान्यथेप्सितान्॥ - पाद्मे

<u>समिधः भेदेन फल भेदाः</u>

आयामसमिधां तालः कनिष्ठानहनं क्रमात्।
चर्महीने विनाशस्याद्भेदे क्षीणं कुलं भवेत्।
आर्द्रासु बन्धुनाशस्यात्पुत्रनाशः पुरातने।
क्षतासु भार्यामरणं कलहाय च शाखिनी।
उद्वेगाय भवेत् स्थूला ह्रस्वाऽवग्रहकारिणी।
दीर्घातिवृष्टिकरिणी त्याज्या दोष्युता समित्॥ - पाद्मे

<u>होमद्रव्य भेदेन फल भदाः</u>

यज्ञवृक्षोद्भवैश्शान्तिः सौभाग्यं कुसुमैश्शुभैः।
धूपद्रव्यैः सदारोग्यं पुष्टिं दध्ना पयश्शुचिः।
अन्नेन विविधान् कामानाज्येनायुष्मतीः प्रजाः।
श्वेतपद्मैस्तु जुहुयादिच्छन् ब्रह्मश्रियं नरः।
लक्ष्मीपुष्पैस्तु जुहुयाल्लक्ष्मीकामोऽथ वारुणैः।
पद्मैर्बिल्वसमिद्भिर्वा ज्ञानकामस्तु सर्पिषा।
कन्याःकामः कालपुष्पैः गोकामो गोमयः पुनः।
आसुष्कामस्तु दूर्वाभिर्भूमिकामस्तु मृत्स्नया।
यवैर्वैन्द्रियकामस्तु ब्रह्मवृक्षसमुद्भवैः।
वेणुभिश्च यवैश्चैव नीवारैश्शालिजैस्तथा।

सर्वे कामाः प्रसिद्ध्यन्ति होमबीजैर्यथोदितैः।
लाजहोमेन सिद्ध्यन्ति सर्वे कामा न संशयः।
अन्नैरन्नादिकामस्तु पुत्रकामस्तु पायसैः।
निम्बपुष्पैर्हिरण्यार्थी सर्वं सिद्ध्यति सर्पिषा॥ - पाद्मे

<u>द्रव्य होमे परिमाणाः</u>

होमे सर्पिर्मधुक्षीर धारा स्याच्चतुरङ्गुला।
शुक्तिर्दध्याहुतिर्ग्रासं पायसाद्याहुतिर्भवेत्।
भक्ष्याहुतिस्तदर्धं स्यात्फलैः पुष्पैरखण्डितैः।
निष्पावबीजमाना तु धूपद्रव्याहुतिर्भवेत्।
तिलव्रीहियवाद्यैस्तु मुष्ट्यर्धार्धाहुतिः क्रमात्।
अष्टाङ्गुला तदर्धावा समिद्दूर्वा षडङ्गुला।
मृद्वीकाक्ष प्रमाणा तु होमयाहुतिरिष्यते।
पूर्णाहुतिर्घृतस्य स्यात्कुडुपेन चतुर्मुख।
न्यूनाधिकप्रमाणन्तु हव्यकव्याहुतिं कृताम्।
भुञ्जन्ति दानवा दैत्याः न फलाय व कल्प्यते॥ - पाद्मे

<u>होमद्रव्याणाम् अलाभे</u>

समिद्भिश्च घृतञ्चैव चरुणाजुहुयात्ततः।
लाजेनच तिलैनैव दुग्धैश्च जुहुयात्ततः।
पूर्वे पूर्वसमालाभे समं ग्राह्य परैः परैः।
होमद्रव्यस्त्वलाभेतु घृतेन जुहुयात्ततः॥ - पाद्मे

<u>सप्तजिह्वाणां नामानि</u>

काली कराली सुमना लोहिता धूम्र एवहि।
स्फुलिङ्गिनी विश्वरूपा सप्त जिह्वाः प्रकीर्तिताः॥ - पाद्मे

होमे मुद्रा भेदाः

मृगी सूकरी हम्सी तिस्रो मुद्राः प्रकीर्तिताः।

सूकरी मुद्रया धूप चरुक्षीर घृतं मधु।

समिदाज्य तिलादीनि हंसिका मुद्रयातथा।

अन्यानि सकल द्रव्याणि मृगमुद्रयाहुनेत्ततः॥ - पराशरे

अग्नेः अङ्ग विशेषाः

यत्र काष्ठं तु तच्छ्रोत्रं यत्र धूमस्तु नासिका।

यत्राल्पज्वलनं नेत्रं यत्र भस्मस्तुतच्छिरः।

यत्र संयक् स्थिता दर्भाः तत्र केशाः प्रकीर्तिताः।

यत्र प्रज्वलितो वह्निः सा जिह्वा तस्यवै रमे॥ - श्रीप्रश्ने

तत्तत् अङ्गेषु होमे फलम्

अग्ने शिरसि होमश्चेत् पापं केशे दरिद्रता।

चक्षुषोर्निधनं भद्रे कर्णयोः रोग सम्भवः।

नासिकायां मनोव्याधिर्जिह्वायां सर्व सिद्धितः॥ - श्रीप्रश्ने

अग्नेः भेदाः

अरण्यामथितो वह्निः बाल संज्ञश्चतुर्मुख।

शिलया मणिनाजन्मा यौवनाग्निरुदाहृदा।

वृद्धाग्निरुच्यते ब्रह्मन् श्रोत्रियागारैश्च संभृताः॥ - विष्णुतिलके

तेषाम् उपयोगानि

नित्याग्निवृद्ध इत्युक्तो उत्सवाग्निर्युवा भवेत्।

दीक्षाशान्तिः प्रतिष्ठाग्निः बाल इत्यभिधीयते॥ - पाद्मे

परिधि लक्षणम्

चतुर्यव परीणाहानागारे हस्त सम्मिते।

अन्येषां द्व्यङ्गुलं वृद्धिः परिधीनां द्विजोत्तम॥ - जयाख्ये

तालमानेन विज्ञेयः समित्काष्ठमयं शुभाः।
इध्माऽयामोद्वितालेन परिधी बाहुमात्रकम्॥ - नारदीये

समितादि होम भेदेन देवस्य रूप भेदाः

समिद्धोमे स्थितं ध्यायेत् आसीनं चरुणा हुनेत्।
आज्यहोमे शयानं स्यात् शेषानान्तु गतागतम्॥ - विष्णुतिलके

प्रोक्षण अवोक्षण अभ्युक्षणादीनां लक्षणम्

कमण्डलं समादाय पूर्वतः प्रोक्षणं तथा।
जलमादाय हस्तेन दक्षिणिनाच देशिकः।
अवाक्करतले कृत्वा सेचनं तदवोक्षणम्।
करेण जलमादाय ऊर्ध्वाङ्गुष्ठेन मुष्टिना।
आथितस्सेचये त्तत्र ह्यभ्युक्षणमुदाहृदम्॥ - विष्णुतिलके

समिधां भेदेन मन्त्र भेदाः

द्वादशार्णेन पालाशं बृहत्सामेति खादिरम्।
अश्वत्थं मूलमन्त्रेण प्लक्षश्चैव बृहस्पते।
वटं वै विष्णु गायत्र्या लक्ष्मीगायत्रि बिल्वकम्।
औदुम्बरेतु तद्विष्णोः शमीभिः प्रणवेनतु॥ - नारदीये

होमधूम आघ्राते फलम्

आघ्रते होमधूमश्च एन भक्त्याहरेर्गृहे।
तस्याभूयात्सदारोग्यं आयुः श्रीर्वर्धनं धनम्॥ - परमपुरुषे

बलिप्रदानम्

नित्योत्सव कर्तव्ये फलम्

अथ नित्योत्सवविधिं कथयामि चतुर्मिख।
सर्वदुःख हरं पुंसां सर्वभूतप्रहर्षणम्।
राज्ञो साष्ट्रस्य ग्रामस्य यजमानस्य सद्मनः।
सुखावहं शान्तिकरं पुण्यमायुर्विवर्धनम्॥ - पाद्मे

बलिद्रव्याः

आवाह्य तण्डुले शुद्धे पात्रस्थे परमेश्वरम्।
शक्तिभिर्दशभिर्द्वाभ्यां सह प्रातर्दिने दिने।
परिक्रमेदायतनं मध्याह्ने त्वन्नकल्पिते।
सायं कुसुमसङ्घाते त्रिसन्ध्यं त्रिषु कल्पयेत्॥ - पाद्मे

सर्व काले अन्नेन बलिप्रदानम्

सायं कुसुमसङ्घाते त्रिसन्ध्यं त्रिषु कल्पयेत्।
बिम्बेवाथ परिघौ त्रिसन्ध्यमनुवासरम्।
अथवान्नेन मध्याह्ने कालेऽन्यत्र द्वयेऽर्चना।
त्रिसन्ध्यमथवान्नेन कुर्यान्नित्योत्सवं हरेः॥ - पाद्मे

बलिप्रदाने उत्तमादि भेदाः

उत्सवं प्राहुरुत्कृष्टं तदूनं मध्यमं विदुः।
हीनेऽधमं जघन्यं तन्न्यूने क्षुद्रमथेतरे।
बलिप्रदानेन विना नोत्सवोऽभ्युदयावहः॥ - पाद्मे

बलिनित्योत्सव कालाः

प्रातर्मध्यन्दिनं रात्रिर्मुख्यं च कमलासन।
अवश्यम्भाविनौ तेषु बलिनित्योत्सवावुभौ।
होमपर्यन्तमन्यत्र कालभेदेषु शस्यते॥ - पाद्मे

बलिप्रदानात्पूर्वं देवस्य पूजनम्

विज्ञाप्यैवं जगन्नाथं बलिदानं प्रकल्पयेत्।
तदर्थं मूलबेरादि बलिबिम्बान्तमर्चयेत्।
अन्नदीन् विनिवेद्याथ तार्क्ष्यसेनेशयोः क्रमात्।
निवेद्य बलिबेरस्थं प्रार्थयेद्धरिमव्ययम्॥ - श्रीप्रश्ने

बलिप्रदानार्थं देवस्य शिबिकारोहण प्रार्थना

स्वामिन् तव पदाम्भोज कैङ्कर्यादिषु लालसाः।
चण्डप्रचण्डप्रमुखाः पार्षदा द्वारवासिनः।
त्वत्सेवार्थं स्थितास्सर्वे महापीठावसानकम्।
सेवादानाय तेषां त्वं शिबिकारोहणं कुरु।
इति विज्ञाप्य देवेशं शिबिकां निनयेद्गुरुः॥ - श्रीप्रश्ने

बलिदान क्रमः

बल्यन्नादीनि वस्तूनि निदध्यात् प्रेष्यमूर्धनि।
घण्टारवैर्वाद्यघोषैर्वेदपारायणैः सह।
गत्वा च बलिबिम्बेन चण्डादिद्वारवासिनाम्।
बल्यर्चाग्रे ददामीति निक्षिपेत् सोदकं बलिम्॥ - श्रीप्रश्ने

महापीठे बलिप्रदानम्

क्षालिते पीठिकामूर्ध्नि पूजयेद्विष्णुपार्षदान्।
बलिं निरवशेषेण दत्वा पीठस्य मूर्धनि॥ - पाद्मे

ध्यात्वा पीठस्य परितः पार्षदान् विष्णुसेवकान्।
शेषं सर्वं बलिद्रव्यं महापीठोपरि क्षिपेत्।
महापीठं परिक्रम्य मन्दिरान्तः प्रवेशयेत्।
बलिबिम्बगतां शक्तिं मूलबिम्बे नियोजयेत्॥ - श्रीप्रश्ने

यात्रासन प्रार्थना

नित्योत्सवाय देवेशं ततः सम्प्रार्थयेद्गुरुः।
यात्रासनमिदं तुभ्यं मया दत्तं गृहाण भो।
त्वत्सेवार्थं ब्रह्मरुद्रमघवाद्या दिवौकसः।
प्रतीक्षन्ते द्वारदेशे बद्धाञ्जलिपुटा हरे।

तस्मात् त्वं भक्तवात्सल्यजलधे यानमाश्रय।
इति विज्ञाप्य दैत्यारिं शिबिकादिषु वै नयेत्॥ - श्रीप्रश्ने

यात्रासने उपचाराणि

पुष्पादिभिरलङ्कृत्य ताम्बूलादीन्निवेदयेत्।
सितातपत्रैर्मायूरैश्छत्रैर्हैमैश्च राजतैः।
पताकाभिश्चामरैश्च घृतदीपैरनेकशः।
नर्तकीभिर्वाद्यसङ्घैर्गायकैर्वैणिकादिभिः।
प्रदक्षिणं देवधाम कारयित्वा ततो गुरुः।
बलिपीठपुरोभागे देवमर्घ्यादिभिर्यजेत्।
घटदीपं प्रदर्श्याथ पृथुकादीन्निवेदयेत्।
ततो नीराजनं कृत्वा गर्भगेहं नयेद्विभुम्॥ - श्रीप्रश्ने

दिक्षु सर्वासु सर्वेषु मन्दिरावरणेषु च।
नृत्तं गेयं च वाद्यं च साकल्येन समीरितम्।
खगध्वजं दर्शयित्वा मङ्गलाष्टकमेव च।
सन्निधाने च देवस्य सर्वत्र बलिरिष्यते।
निवेद्य तत्र ताम्बूलं भक्ष्यं च पृथुकादिकम्।
सर्वावरणेष्वेवं स्थानं प्रति समाचरेत्॥ - पाद्मे

क्षुद्रपक्ष बलिप्रदानम्

महावातादि संक्षोभे न नित्योत्सवमाचरेत्।
बलिप्रदानमात्रञ्च कुर्याच्च सति सम्भवे।
बलिं चण्डप्रचण्डे तु केवलावा विनिक्षिपेत्।
तयोर्मध्ये तु पुरतो मूलमन्त्रेण साधकः।
भूतेभ्यो नम इत्येवं विक्षिपेत्सोदकं बलिम्॥ - पाद्मे

यद्वा सङ्कर्षणं ध्यात्वा हृत्पद्माह्वयविष्टरे।
गर्भद्वारं समारभ्य महापीठावसानकम्।
चण्डादिद्वारपालानां द्वारपार्श्वस्थपीठयोः।
भक्तानां विष्णुभूतानां महापीठोपरि क्षिपेत्।
सर्वत्र क्षालिते पीठे बलिदानं पुरोदितम्॥ - श्रीप्रश्ने

<u>बलिदाने भेदाः</u>

देवानां बलिर्हस्ते भूतानां बलि जिह्वके।
पिशाचानां बलिर्भूमौ बलिपीठे शिरोपरि।
तत्राश्रय देवानां तृप्त्यर्थं सजलं हविः॥ - सात्वत संहिता

<u>बलिदान अन्नस्य प्रमाणम्</u>

उत्तमं कबलं प्रोक्तं मध्यमं मुष्टिमात्रकम्।
अधमञ्चाऽहुतिमात्रम् इत्येवं बलि लक्षणम्॥ । पारमेश्वरे

<u>बलिपीठ – वाद्य अभावे विधिः</u>

पीठाभावे बलिंदद्यात् देशिकः स्थण्डिलोपरि।
वाद्याभावे केवलेन मड्डुकेन बलिं क्षिपेत्॥ - श्रीप्रश्ने
वाद्य गेये तथा नृत्ते बहिरङ्गणभूमिषु।
न्यूनीभावं समाधातुं शुद्धताण्डवमाचरेत्॥ - पाद्मे

<u>यात्रासने परिचारक लक्षणम्</u>

शुक्लांबरधरं सौम्यं शुक्लयज्ञोपवीतिनम्।
सोत्तरीयं च सोष्णीषं चन्दनाद्यैरलङ्कृतम्।
ध्यात्वा तं विनतानन्दं परिचारवरं शुभम्॥ - श्रीप्रश्ने

<u>मन्त्र जपः</u>

अष्टोत्तरशतं वारान् अष्टाविंशतिमेव वा।
अष्टौवापि जपेन्मन्त्री नलिनाक्षादिमालया।
यत्सङ्ख्या जपः पूर्वं मानसाराधने कृतः।

तत्सङ्ख्यैव बाह्येऽपि जपेद्यागे गुरूत्तमः।

जपन्तु सर्वपूजान्ते कुर्यात् क्षुद्रे तु नाचरेत्॥ - श्रीप्रश्ने

<u>पूजान्ते अर्चकः प्रथमं तीर्थ स्वीकारः</u>

विष्णोस्तीर्थं प्रसादञ्च पूजान्ते देशिकोत्तमः।

अपीत्वा यदि वान्येभ्यो दद्यात् पूजा हि निष्फला॥ - श्रीप्रश्ने

<u>अर्चकस्य करतीर्थ विशेषः</u>

अर्चकस्य करे तीर्थं भागीरथ्यां समं शुचिः।

अन्यविप्र करं तीर्थं सुरापान समं भवेत्।

हरेः प्रसादं तीर्थञ्च भक्त्याच तुलसी दलम्।

अर्चकस्यतु हस्तेन दातव्यं सर्वदैवहि।

कोतिजन्म कृतं पुण्यं विष्णोराराधनं परम्॥ - अगस्त्ये

<u>अर्चकः तीर्थ स्वीकार विधिः</u>

पूजान्ते देवदेवस्य तीर्थं देवाभिषेचितम्।

पादाम्बु वा पिबेत्पूर्वं पूजको मन्त्रवित्तमः।

अन्येष्वपिच कालेषु क्षुद्राराधन कर्मणि।

पीत्वा स्वयं चोद्धरिण्या पात्रेणान्येन वा गुरुः॥ - श्रीप्रश्ने

<u>अन्य भक्तेभ्यः तीर्थ प्रदानम्</u>

सिद्धानां च महर्षीणां यतीनां ब्रह्मवादिनाम्।

वैष्णवानां ब्राह्मणानां वेदवेदार्थसेविनाम्।

क्षत्रियाणाञ्च वैश्यानां भक्तानां पादजन्मनाम्।

क्रमशो देवदेवस्य पादतीर्थं प्रदापयेत्॥ - श्रीप्रश्ने

<u>भगवत्तीर्थ स्वीकारेण फलम्</u>

पिबन्ति ये पादतीर्थं जिघ्रन्ति तुलसीदलम्।

ते यान्ति पापनिर्मुक्ताः शाश्वतं परमं पदम्॥ - श्रीप्रश्ने

भगवतः पादुका - मालादि स्वीकारे फलम्

मालापादुकागन्धादि विष्णोरग्रे धरन्ति यः।
पुत्रपौत्रसुखंभुक्त्वा अन्ते सायुज्यमाप्नुयात्॥ - अनन्त संहिता

भगवत्पाद तुलसी दल – पुष्प – गण्धादि स्वीकारे फलम्

भगवत्पाद तुलसीम् आघ्राय सकलानरः।
निरामया भवेद्भूमौ विष्णुलोकमवाप्नुयात्।
हरेर्निर्माल्य पुष्पञ्च चन्दनञ्च बुधोत्तमाः।
शिरसागृह्णितं भूयात् श्रेयस्कामैस्सततं भुवि॥ - परमपुरुषे

पादुका धारणम्

तस्यभूयान् महापापं रौरवं नरकं भुवि।
भगवत्पादुकौयस्तु शिरसा नच धारयेत्॥ - परमपुरुषे

पादुका निरूपणम्

शठकोपयतिरव्यातः श्रीहरेः पादुकाद्वयम्।
साक्षाच्छ्रीपतिर्भावेन शिरोधार्यं सदाभवेत्॥ - परमपुरुषे

पादुकायां स्पर्श दोष रहितः

पादुका मोक्षरक्षार्थं नाना वर्णाशिरोपरि।
स्पर्शदोषेण सङ्गच्छेत् रौरवं नरकं व्रजेत्॥ - अनन्त संहिता

त्रिमुद्रा लक्षणम्

शठकोपप्रादानेतु त्रिवारं यदिदीयते।
प्रथमं शिरसाधृत्या तदनु दक्षिणेभुजे।
पुनश्चशिरसावैव त्रिवारंधारयेद्विजाः॥ - परमपुरुषे

पञ्चमुद्रा लक्षणम्

शठकोपप्रदानेतु पञ्चवारं यदाभवेत्।
तदाचाग्रेतु शिरसा तदनुर्दक्षिणे भुजे।

वामेचाञ्जलिनाचैव ततस्तु शिरसापुनः।
एवं क्रमेणैव पञ्चवारं तद्धारयेद्धुवि॥ - परमपुरुषे

उत्तमाङ्गे च हृदये सव्यादि भुजमूलयोः।
पादुकाधारणं कुर्यात् पुनः शिरसि धारयेत्॥ - अनन्त संहिता

<u>पादुकां गर्भगृहात् बहिः आनीत विधिः</u>

भगवत्पादुकौ यस्मिन् काले गर्भगृहाद्बहिः।
समानीतौ भवेत्तस्मिन् कालेतु मुनिसत्तमाः।
सर्वमङ्गलवाद्यादीन् अन्यान् शीहरिलाञ्छनान्।
करदीपादि सकलान् वेदघोषादिकान् तथा॥ - परमपुरुषे

<u>भगवत् प्रसादस्वीकरणे दृष्टि - स्पृष्ट दोषरहिताः</u>

नैवेद्यं पुरतोन्यस्तं चक्षुषा परिगृह्यते।
रसान् भक्तस्यजिह्वाग्रे अश्नामि कमलोद्भव।
आचार्य भोजनेहीने देवपूजाच निष्फला।
यथाचाऽग्निमुखे भुङ्क्ते तथा कारिमुखो हरिः॥ - पाद्मे

दृष्टिदोषं स्पृष्टिदोषं नविचार्य हरेर्गृहे।
सर्वैरपि परिग्राह्यो प्रसादो मुनिसत्तमाः।
यः करोति विभेदोस्मिन् तस्यवंशक्षयं भवेत्।
प्रसादनिन्दतोयस्तु सगच्छेन्नरकं धृवम्॥ - परमपुरुषे

<u>भगवत् प्रसादेन श्राद्ध कर्तव्यम्</u>

पितृमातृ श्राद्धकालेष्वपि विष्ण्वर्पितैश्शुभैः।
अन्नाद्यैरर्चयेत्पितॄन् कर्ताभक्तिविशेषतः।
तत्पितॄणान्तु सद्गतिः सत्वरंलभतेद्विजाः॥

भगवत् प्रसादेन स्वगृहे भोजनम्

पूजान्ते देशिकेन्द्रस्तु मन्निवेदितवस्तुभिः।
अतिथीन् पूजयेत् पूर्वं ततः पुत्रादिबन्धुभिः।
सर्वान्तर्यामिणं देवं तर्पयेच्छास्त्रवर्त्मना। - श्रीप्रश्ने

उपवास दिने भगवत्प्रसाद स्वीकार विधिः

प्रसादं कृपयादत्तं विष्णुभक्तोज्झितं यदि।
उपवासच्छलान्नास्ति तमाहु ब्रह्मघातकम्।
अर्धाऽमलक मात्रन्तु नैवेद्यं पुरतो हरेः।
नाचामानाग्नि संस्कारः प्राशयेदविचारतः॥ - अनन्ताख्ये – पाद्मे

एकादश्यामपिबुदाः प्रसादं न परित्यजेत्।
उपौषितस्तु भुञ्जीत कणमेकं शिरोधृतम्।
हरिप्रीत्यैतु सर्वेपि एकादश्यादिकाव्रताः।
तस्मातेष्यदिवेषस्यात् प्रसादस्वीकृतिश्शुभः॥ - परमपुरुषे

भगवत् प्रसाद विक्रिये दोषः

मत्तीर्थं मत्प्रसादं च दत्वायो याचयेद्धनम्।
सजीवेनैव चण्डालः सवैसन्मातृ विक्रयी।
स्वभार्या विक्रयीचैव सयाति नरकं धृवम्॥ - कपिञ्जले

प्रदक्षिण विषयाः

प्रदक्षिण शब्दार्थः

प्रकारं पापनाशंस्यात् दकारं सर्व सिद्धिदम्।
क्षिकारं क्षीयते कर्महरणे बध्नाति न स्वयम्॥ - परम संहिता

प्रदक्षिण लक्षणम्

संपूर्णप्रसवा नारि पयःपूर्णघटे नरः।
उद्वहन्ति शनैर्याति तद्वत् कुर्यात् प्रदक्षिणम्॥ - पारमेश्वरे

ततः प्रदक्षिणं कुर्याच्चत्वारि द्विजसत्तम!।
कुसुमक्षेपसंयुक्तं चतुर्दिक्षु समं तु वै॥ - पारमेश्वरे

प्रदक्षिण सङ्ख्या

द्वितीयादि दिवंयान्ति तृतीये नेत्र सम्पदम्।
चतुर्भिर्मनुलोकन्तु पञ्चभिः सर्वलोकभाक्।
षष्टञ्च महदैश्वर्यं सप्तमं मम किङ्कराः।
अष्टमं मम सालोख्यं सारूप्यं नवमे तथा।
दशमं सर्व साम्राज्यं सामीप्यमेकादशे तथा।
सायुज्य द्वादशञ्चैव सर्वसिद्धिमवाप्नुयात्॥ - चित्रशिखण्डि संहिता

नित्योत्सव काले प्रदक्षिण फलम्

उत्सवे बलिदानेच तथा कुर्वन् प्रदक्षिणम्।
पदेपदेऽश्वमेधस्य फलं दशगुणं भवेत्॥ - शाण्डिल्ये

अर्धरात्रि पूजाक्रमः निवेदन द्रव्यञ्च

अर्धरात्रे तु संप्राप्ते कृत्वा स्नानादिकं हरेः।
शुद्धपायसमुद्गान्नमपूपादिहविः क्रमात्।
गोक्षीरं सितखण्डादि मधुरं च निवेदयेत्॥ - पाद्मे

शयनासने निवेदन द्रव्याणि शय्या पूजनञ्च

ध्रुवकर्मस्वापबेराण्यर्घ्यदानादिभिर्जयेत्।
गोक्षीरघृतसम्मिश्रगुडान्नं च फलानि च।
निवेद्य भक्ष्यजातानि शय्यायां पन्नगाधिपम्।
गन्धादिभिः समभ्यर्च्य स्वापार्चां प्रार्थयेत्ततः॥ - श्रीप्रश्ने

कर्मार्चादि बिम्बगत शक्ति मूले नियोजन विषयः

कर्मार्चादिषु बिम्बेषु षड्सु नित्यादिसिद्धये।
प्रतिष्ठितेषु विधिवन्नित्यं प्राभातिकेऽर्चनम्।

तच्छक्त्या योजितां शक्तिं मूलबिम्बाद्यथापुरा।
समभ्यर्चयार्घ्यपुष्पाद्यैस्ताम्बूलान्तैः पुरोदितैः।
पुनरारोपयेन्मूले तत्र तत्र नियोजिताम्।
पूजार्थं कर्मबिम्बादौ नित्यनैमित्तिकादिषु।
प्राप्तेषु तत्तत्कर्मादौ मूलादावाह्य मन्त्रवित्।
समाप्य तेषु कर्माण्यारब्धानि यथार्थतः।
समर्प्य मूलबिम्बे तु तेभ्यस्तत्र विसर्जयेत्॥ - पारमेश्वरे

<u>शयन प्रार्थनम्</u>

भगवन्भोगनिद्रायाः कालोऽयं समुपागतः।
शयनं भोगिपर्यङ्कमलङ्कुरु जगत्पते॥
इति सम्प्रार्थ्य तत्बिम्बं शय्ययां विनिवेशयेत्॥ - श्रीप्रश्ने

<u>शयने निवेदन द्रव्याणि</u>

गोक्षीरं शर्करायुक्तं सितखण्डादिसंयुतम्।
नवनीतञ्च ताम्बूलं निवेद्यच यथाक्रमम्॥ - श्रीप्रश्ने

<u>शयनमूलबिम्ब विषये</u>

अनन्तभोगिशयने शयितं चेत् स्वभावतः।
तबिम्बशयने शेषं पर्यङ्कं नार्चयेत् पृथक्॥ - श्रीप्रश्ने

<u>कवाटबन्धन क्रमः मन्त्रश्च</u>

कवाटबन्धनं कुर्यात् मन्त्रं कवचमुच्चरन्।
सुदर्शनं द्वारदेशे द्वारस्थानपिच देशिकः।
सम्बोध्य स्वगृहं गच्छेत् प्रादक्षिण्येन वै रमे॥ - श्रीप्रश्ने

<u>नित्य – अनित्य – नैमित्तिक – काम्य – प्रायश्चित्त – कर्माणां सङ्गमे</u>

नित्य नैमित्तिके प्राप्ते ह्येकस्मिन् समये सदा।
पूर्वं नैमित्तिकं कृत्वा पश्चान्नित्यं समाचरेत्।
नैमित्तिके ह्यनित्ये च नित्ये च युगपद्गते।

प्रागनित्यं ततः पश्चान्नित्यनैमित्तिकं चरेत्।
नैमित्तिके च काम्ये च प्राप्ते काम्यन्तु पूर्वतः।
समाप्य पश्चाद्वै कुर्यात् तानि कर्माणी सर्वदा।
यदा नैमित्तिकाद्यन्तु विभवाद्यैस्तु विस्तृतम्।
तदा तात्कालिकं नित्यं तत्कालात् प्राक्समाचरेत्।
कालातिक्रम दोषस्तु तत्र न स्यात् कदाचन॥ - पारमेश्वरे

भगवत् पूजने फलम्

पाताले दिविवा भूमौ ये भोगा भुविदुर्लभाः।
तानवाप्नोति पुरुषः पुरुषोत्तमपूजया॥ - पाद्मे

श्रियाः पृथक् पूजने विशेष योगासनार्चनम्

योगासनाब्ज पत्रेषु प्राच्यादिष्वष्ट दिक्ष्वपि।
वीरलक्ष्मीं पाटलाभां खड्गखेटधरां स्मरेत्।
धनलक्ष्मीं चित्रवर्णां शङ्खाब्जनिधि सेविताम्।
सन्तानलक्ष्मीं हरितां शङ्खक्षीरघटान्विताम्।
जयलक्ष्मीं पीतवर्णां चापबाणधरां शुभाम्।
धान्यलक्ष्मीं पलाशाभां धान्यगुच्छभुजाङ्किताम्।
धैर्यलक्ष्मीं पाण्डराभां शङ्खचक्रसमुज्ज्वलाम्।
राजलक्ष्मीं शोणवर्णां तर्जनीवेत्रधारिणीम्।
एताः सर्वाश्चतुर्हस्ताः दिव्याभरणभूषिताः।
दिव्यगन्धानुलिप्ताङ्गीर्दिव्यवस्त्रैरलङ्कृताः।
मुख्यहस्ताञ्जलिपुटाः पश्यन्तीश्चिन्तयेद्गुरुः॥ - श्रीप्रश्ने

भगवद्दर्शन क्रमः

कदापि पादमारभ्य मुखपर्यन्तं तमीक्षणम्।
वैष्णवानान्तुविहितं गोप्यमेतन्मुनीष्वराः॥ - परमपुरुषे

भगवद्दर्शनात्पूर्वं श्रियाः दर्शनम्

भगवद्दर्शनेचादौ श्रियादीनाञ्च दर्शनम्।
पुरुषाकार भूतंस्यात् देवस्यानुग्रहप्रदम्।
तस्माच्छ्रीदर्शनन्त्वादौ कृत्वादेवस्य दर्शनम्॥ - परमपुरुषे

गोपुर दर्शन विशेषः

गोपुरं दृश्यतेयस्तु महाभक्त्याजगत्पतेः।
तस्यवंशाभिवृद्धिस्यात् आचन्द्रार्कं धरातले।
गोपुरस्याग्र चक्रस्य दर्शनं पापनाशनम्॥ - परमपुरुषे

गृहार्चन विशेषः

गृहेसंस्थाप्य देवेशं श्रीयादिसहित द्विजाः।
प्रत्यहं पूजितेयस्तु यथा विभवविस्तरैः।
तस्यसर्वाणि पापानि मुच्यन्ते नात्र संशयः।
तस्याऽभिष्टप्रदं भूयत् इहलोके च भूसुराः॥ - परमपुरुषे

गृहार्चा रहित गृहः स्मशान समानः

यस्मिन्गेहे गृहार्चातु नभवेद्वैष्णवस्य च।
तद्गृहं स्मशानंस्यात् संशयोनास्तिभूतले॥ - परमपुरुषे

गृहाराधन विधिः

नरैराध्यबिम्बेषु प्रत्यहं स्वहृदयब्जतः।
प्राग्वदावाहनं कुर्यादथ तद्विग्रहस्थितान्।
मन्त्रन्यासादिनाभ्यर्च्य तांस्तद्देहस्फुलिङ्गवत्।
ध्यात्वावतार्य स्थानेषु स्वेषु भोगावनौ क्रमात्।
सकलीकृत्य चार्घ्याद्यैरर्चयेदत्र तु क्रमः॥ - पारमेश्वरे

गृहार्चायां पूजन कालाः - बलियात्र निषेधश्च

न तत्र बलियात्रोक्ता योऽर्चयेत् स्वगृहे हरिम्।
त्रिसन्ध्यं स तु कुर्वीत पूजनं वह्नितर्पणम्।
द्विसन्ध्यमेकसन्ध्यं वा यथाशक्ति द्विजोत्तमः॥ - नारदीये

गृहाराधन फलम्

यो नित्यं पूजयेद्विष्णुं गृहस्थो वेश्मनि स्वयम्।
स नयेत् स्वकुलोद्भूतान् पुरुषानेकविंशतिम्।
विष्णोः पदं वा सालोख्यं यद्वाऽन्यदपि वाञ्छितम्॥ - पाद्मे

भगवदाराधन समये सन्ध्यादि रहिते न दोषाः

यस्मिन् काले विशालाक्षि यस्य यत्कर्मचोदितम्।
तत्काले कत्म तं त्यक्त्वा मामुपास्ते विशो यदि।
न दोषस्तत्र देवेशी कृतार्थाच न संशयः॥ - ह्रीप्रश्ने

अर्चकस्य नरक प्राप्तिः

यस्मात् पूजकदोषाणां विमर्शनमनुच्यते।
तस्मादेवसदालिके अर्चको नरकं व्रजेत्॥ - परमपुरुषे

सर्वं भगवत् कैङ्कर्यम्

लोके समस्त धर्माणां सर्वे कार्याश्च भूसुराः।
हरिकैङ्कर्य रूपेण भगवच्चासनादिति॥ - परमपुरुषे

पूजायां क्रियाकलापे क्रमः

क्रियाकलापं पूजादौ कर्मार्चायां यदीरितम्।
तत्सर्वं ध्रुवबेरादौ यथासम्भवमाचरेत्॥

उपचाराणां असन्निधेये कर्तव्यः

असन्निधेश्च यो भोगो ह्यङ्ग भाव मनुव्रजेत्।
तत्तत् ध्यात्वा तु मनसाभक्त्याविष्णोर्निवेदयेत्॥ - ईश्वरे

हरेः वासस्थानानि

तुलसी काननं यत्र तत्र पद्मासनानि च।
वसन्ति वैष्णवाः यत्र तत्र सन्निहितो हरिः॥ - लक्ष्मीतन्त्रे

तुलसी काष्ठमाला पद्माक्षमाला धारणे फलम्

तुलसी काष्ठमालायाः पद्माक्षमणिमालिकाः।
कण्ठादि नाभिपर्यन्तं धारयेद्वैष्णवोत्तमैः।
पद्माक्षतुलसीमालां श्रीपवित्रं यथाक्रमम्।
बन्धाय नित्य कर्माणि विष्णोः प्रीतिकरं शुभं॥ - पुरुषोत्तमे

दर्भलक्षणम् फलञ्च

शुचौदेशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरान्मुखम्।
हुंकारेणैव मन्त्रेण कुशान्ग्राह्य द्विजोत्तमाः।
नदी तटाकयोर्देशे दर्भान् गृह्णीय बुद्धिमान्।
भूतप्रेत पिशाचाश्च येचान्ये ब्रह्मराक्षसाः।
विप्राङ्गुलीःकुशान् दृष्ट्वा दूरं गच्छत्यधो मुखाः।
कुशपाणिस्सदा तिष्ठेत् ब्राह्मणाऽडम्बर वर्जिताः।
सन्नित्यं हन्ति पापानि स्थूलराशिरिवाऽनलः॥ - वासिष्टे

दशविध दर्भाः

कुशकाशयवादूर्वा गोधूमाश्चोदकुन्दराः।
उशीर व्रीहयो मौञ्जा दशदर्भाः प्रकीर्तिताः॥ - श्रीमन्नारायणे

दर्भ कुशादि भेद निरूपणम्

प्रादेशमात्र दर्भाणां द्विःप्रादेशे कूशस्मृतः।
त्रिः प्रादेशस्तु बर्हिस्स्यात् अत ऊर्ध्वं तृणं भवेत्॥ - श्रीमन्नारायणे

तेषां उपयोग क्रमः

कुशैस्तु सन्ध्याकरणं दर्भैस्तु पितृकर्म च।
वर्हिषा यज्ञकर्माणि शेषैतु गृहगोपनम्॥ - श्रीमन्नारायणे

दर्भेषु स्त्री पुमादि निरूपणम्

अग्रमूलसमं वापि पुन्दर्भस्य च लक्षणम्।
अग्रस्थूला स्त्रियो दर्भाः मूलस्थूलाः नपुंसकाः।
न च मुण्डान् न न्यूनाग्रान् न दर्भान्स्थूलतायुतान्॥ - श्रीमन्नारायणे

स्त्रीदर्भादिषु उपयोग क्रमाणि

स्त्रियः सर्वेषु कार्येषु पुमांसर्व सुखावहः।
मौक्षार्थन्तु पुमान् दर्भःअभिचारे नपुंसखाः।
विवाहे पुंसि सीमन्ते स्त्रिदर्भास्तु विशेषतः।
चौलोपनयनं कार्यं पुन्दर्भैर्दैविकं तथा॥ - श्रीमन्नारायणे

स्त्रीदर्भः फलदो ब्रह्मन् प्रतिष्ठोत्सव कर्मसु।
नित्यनैमित्तिके चापि पुमान्दर्भः फलप्रदम्॥ - विष्णुतिलके

दर्भ सङ्ग्रः कालः

कुशोदर्भश्च काशश्च त्रयस्ते कमलासन।
अहन्यहनि गृह्णीयात् दर्भान् मूलमनुं स्मरन्।
अलाभो यदि दर्भाणां अमायां वा समाहरेत्।
त्राप्यलाभे श्रावण्या ममायां वत्सरावधि।
माघे षाण्मासिको दर्भाः यथालाभं समार्जयेत्।
साग्रं मनोहरं ग्राह्य मग्रहीनं विवर्जयेत्॥ - विष्णुतिलके

दर्भपवित्रे सङ्ख्या विषयः

नित्यकर्माणि दर्भाभ्यां पवित्रं धारयेत्कृतम्।
त्रिभिस्तु पितृकार्येषु चतुर्भिश्चाभिचारके।

पञ्चभिः पौष्टिके षड्भिः शान्तिकार्येषु भोजने।
पवित्रवलयं द्वाभ्यां सप्तभिः सर्वकर्मसु॥ - श्रीप्रश्ने

दर्भपवित्र लक्षणम्

द्व्यङ्गुल वलयं प्रोक्तं ग्रन्थिरेकाङ्गुली भवेत्।
चतुरङ्गुलमायामः पञ्चमुष्टिमिताः कुशाः।
पवित्र वलयं प्रोक्तं हेमरत्न विनिर्मितम्।
करशुद्धिं ततः कृत्वा पवित्रं धारयेत् करे॥ - श्रीप्रश्ने

पवित्र धारण क्रमः

प्रक्षाल्य पाणिपादौच कृत्वाचाचमनद्वयम्।
पवित्रं करयोर्धार्यम् अनामिख्यां कुशाच्छदैः॥ - विष्णुतिलके

पवित्र धारण कालाः

दैव मानुषयज्ञेषु पवित्रे करयोर्मिते।
पञ्चकालविधौ धार्यं दक्षिणेऽनामिकातले।
विण्मूत्रोत्सर्जने धार्यं मुत्तर्यान्ते चतुर्मुख।
क्षालने पादकरयोः गंडूषे दन्तधावने।
सव्येतरे कर्णमूले पवित्रं धारयेन्नरः।
अभ्यङ्गे मैथुने क्षौरे पवित्रन्तु विसर्जयेत॥ - विष्णुतिलके

पवित्र मान भेदेन देवतानां भेदाश्च

चतुरङ्गुलमग्रन्तु सदाविष्ण्वधिदैवतम्।
महाविष्ण्वधिदैवन्तु ग्रन्थिरेकाङ्गुली भवेत्।
विष्ण्वधिदैवन्तु वलयं द्व्यमङ्गुलमुच्यते।
पवित्रं हस्तयुग्मेचाऽनामिकायां नियोजयेत्॥ - पारमेश्वरे

नित्याराधन प्रमाणानि सम्पूर्णम्

----------*****----------

श्रीः

## नित्याराधने प्रायश्चित्त विधिः

- ❖ स्नान उपवीत पुण्ड्र रहिताः देवस्य पूजने – सः मूलमन्त्रं शतवारं जप्त्वा। अन्ते तत्तत् सहितेन पूजयेत्॥
- ❖ स्त्री संयोगान्तं स्नान रहितेन – रजस्वलावस्त्र स्पर्शदोषेन पूजने – देवं पञ्चगव्येन संस्नाप्य। पञ्चोपनिषन् मन्त्रान् जपेत्॥
- ❖ विण् मूत्र रेतः बालशिशोः स्पर्शनेन पूजने – देवं कुशवारिभिः संस्नाप्य। अनन्तरं मूलमन्त्रं जपेत्॥
- ❖ श्वान – रजस्वला – चण्डाल – वेद(देव)विक्रयिक – स्मशानचित – नीचचैत्यस्थ वृक्ष स्पृष्टवः स पूजने - उच्छार्य पञ्चवारुणमन्त्रैः देवं स्नापयेत्कुशवारिभिः॥
- ❖ केश सहित पुष्पेण पूजने – देवं क्षीरेण संस्नाप्य। ततः शान्तिहोमं कारयेत्॥
- ❖ स्त्रीः – अनुपनीतः देवबिम्ब स्पर्शने – परमेष्टिमन्त्रेण कुशतीर्थेन प्रोक्षयेत्॥
- ❖ आत्मशुद्धि – मन्त्रन्यास रहितेन पूजने – मूलमन्त्रं जपेत्॥
- ❖ चण्डालादिभिः स्पर्शन अन्न निवेदने – देवं गोघृतेन संस्नाप्य। शान्तिहोमं कारयेत्॥
- ❖ आचाररहितैः अन्यैः स्पृष्टान्न – अयाज्ञीयै कोद्रवाद्यैः उक्त अन्नञ्च निवेदने – मूलमन्त्रम् अयुतवारं जप्त्वा। संस्नाप्य देवं। शान्तिहोमं कृत्वा। ततः मूलमन्त्रं जपेत्॥
- ❖ अत्युष्ण अन्न निवेदने – निवृत्तिमन्त्रं जपेत्॥
- ❖ अतिशीतल अन्न निवेदने – विश्वमन्त्रं जपेत्॥
- ❖ पर्युषित अन्न निवेदने – मूलमन्त्रम् अयुतवारं जपेत्॥

❖ निवेदितान्नं पुनर्निवेदने – संस्नापयेद्देवं मूलमन्त्रं जपेत्॥

❖ पर्युषित तीर्थ स्नपने – पुनः शुद्धजलेन अब्लिङ्गमन्त्रेण संस्नापयेत्॥

❖ तिर्यग्योनिजैः मानुषैः स्पृष्टतीर्थ – अतिलङ्घित तीर्थेन देवस्य स्नपने – देवं वारुण स्नान विधिना संस्नापयेत्॥

❖ समुद्रतीर्थस्य दशदिनान्तं न पर्युषितदोषः। पुण्यतीर्थस्य न पर्युषित दूषणम्॥

❖ विण्मूत्र रुधिरोपयुक्तैः तोयादि वस्तुभिः स्नपने – अर्चने – अधमाधमैः(८१) कलशैः संस्नापयेत्॥

❖ शवेनदूषित – पश्वादिमरण – चण्डालादिस्नानपान – रजस्वलाद्यैः – प्रतिलोमाद्यैः उपयुक्त दूषित कूपजल विषये – कूपस्थं जलं नोवशिष्टेन सर्वम् उद्धृत्य। ततः पुण्याहं वाचयित्वा प्रोक्षयेत्॥

❖ पूजाकाले अन्यकालेपि नित्यदीप निर्वाणे – क्षीरेण संस्नापयेद्देवम् अष्टोत्तरशतवारं मूलमन्त्रं जपेत्॥

❖ मन्त्रहीन – क्रियाहीन – मुद्राहीन – जपहीन – ध्यानहीनाद्यैः पूजाविषये – प्रतिक्रियान्ते यथाशक्ति मूलमन्त्रं जपेत्॥

❖ वाद्य हीने – क्षीरेण संस्नापयेद्देवं अष्टोत्तरशतवारं मूलमन्त्रेण हुनेत्॥

❖ उक्तपूजाकाल – सन्ध्याकाल अतिक्रान्ते – द्विगुणैः भोगद्रव्यैः पूजयेद्देवं क्षम्यतामिति प्रार्थयेत्॥

❖ एकदिन पूजलोप विषये – उक्तकाल पूजायाम् उद्दिश्य द्विगुण त्रिगुणेति एकोत्तरवृद्धि क्रमेण वस्तुभिः जप होमेन च देवं सम्पूज्य ( प्रथमकालस्य द्विगुणद्रव्यं द्वितीय कालस्य त्रिगुणद्रव्यम् इति )। बहुकलशैः संस्नाप्य। पञ्चोपनिषण्मन्त्रैः शान्तिहोमं कारयेत्॥

❖ द्विदिनात् पक्षान्त पूजालोपे – अधमोत्तम(८१) स्नपनं कारयेत्॥

- ❖ एकमास पूजाहीने – मध्यमोत्तम(२७७) स्नपनं कृत्वा। तिलघृतचरुभिः मूलमन्त्रेण हुनेत्॥
- ❖ एकमासात् वत्सरान्तं पूजालोपे – देवं अष्टोत्तरशत कलशैः संस्नाप्य। तिलघृत चरुभिः प्रत्येकं सहस्रसङ्ख्या द्वादशाक्षरेण होमं कारयेत्॥
- ❖ एकसंवत्सरात् पूजाहीने – मध्यमोत्तम(२७७) विधिना स्नापयित्वा। कुण्डे अग्निं संस्थाप्य तिलव्रीहि यवैः लाजैश्च कालपुष्पैः समित् चरु घृतैरपि प्रत्येकम् अष्टोत्तरसहस्रेण जुहुयान्मूलमन्त्रेण ततः विप्रेभ्यः दानं कृत्वा भोजयेत्॥
- ❖ एकमासात् त्रिवत्सरान्त पूजाहीने – सम्प्रोक्षणमाचरेत्॥
- ❖ त्रिवत्सरात् पूजालोपे – पुनः प्रतिष्ठां कारयेत्॥
- ❖ भूगुप्त विग्रह विषये – पुनः सम्प्रोक्षणं चरेत्॥
- ❖ देवैः प्रतिष्ठित आलये पूजालोपः न दोषाः॥
- ❖ मानुष प्रतिष्ठित आलये पूजालोपे प्रायश्चित्तमाचरेत्॥
- ❖ गृहार्चा आराधने लोप प्राप्ते – गृहार्चां पञ्चगव्येन संस्नाप्य। पुरुषसूक्तेन होमं कृत्वा। ब्राह्मणान् भोजयेत्॥
- ❖ गृहार्चायां एकमासात् षाण्मासान्त पूजाहीने – षोडशभिः कलशैः पुरुषसूक्तेन संस्नाप्य। पुरुषसूक्तेन होमं कृत्वा। ब्राह्मणान् भोजयेत्॥
- ❖ एकसंवत्सरान्तं गृहार्चायां पूजाहीने – सम्प्रोक्षणं कारयेत्॥
- ❖ नित्य होमेषु परिधि अभावेऽपि न दोषाः॥
- ❖ समित् अलाभे – घृतेन चरुणा वा हुनेत्॥
- ❖ घृत चर्वोः अलाभे – समिदेन लाजेन वा हुनेत्॥
- ❖ महानसे मलमूत्रादि सम्बन्धे – श्वान – चण्डालादीनाञ्च प्रवेशने स्पर्शने च – महानसं गोमयेन आलिप्य। अन्याग्निं संस्थाप्य। ब्राह्मणेभ्यः पुण्याहं वाचयित्वा प्रोक्षयेत्॥

❖ अन्य – दोषयुक्त चुल्यां पाचित अन्न निवेदने – नवकलशैः वा त्रिकलशैः वा स्नापयेत्॥

❖ दोषयुक्त अन्नेन बलिप्रदाने – शान्तिहोमं कारयेत्॥

❖ बलिबिम्बं यानात् निपतिते – अधमाधम(८१) विधिना स्नाप्य। शान्ति होमं कृत्वा। मूलमन्त्रं जपेत्॥

❖ ब्राह्मणादि वर्ण भेदोक्त चोरादि स्पर्शने – तत्तत् वर्णानुपूर्व्येण अधमाधम मार्गेण कलश सङ्ख्या वृद्ध्या देवं संस्नाप्य। बीजयुक्तैः कलशैः संस्नाप्य। ब्राह्मणान् भोजयित्वा दक्षिणां दद्यात्॥

❖ अज्ञातजाति स्पर्शने – उत्तमोत्तम(४७३) विधानेन स्नापयेद्देवं। ततः शान्तिहोमं कारयेत्। विप्रान् भोजयेत्॥

❖ मृण्मय – लेपन – भित्तिचित्र इति त्रिवस्तुबिम्बं नीचैः – चण्डालैः स्पर्शने – तत् बिम्बं पुनः नवीकृत्य सम्प्रोक्षणमम् आचरेत् अथवा दोषानुसारेण पुनः प्रतिष्ठां कारयेत्॥

❖ देवपटं चण्डालादि स्पर्शने – क्षालयित्वा पुनः सृजेत्॥

❖ अन्यशास्त्र दीक्षितैः – शूद्रादि वैष्णव दीक्षितैः देवबिम्ब स्पर्शने – स्नपनम् आचरेत्॥

❖ महापातक स्पर्शे – उत्तमोत्तम(४७३) स्नपनं आचरेत्॥

❖ उपपातक स्पर्शे – अधमोत्तम(८१) स्नपनं आचरेत्॥

❖ अनुलोमाः स्त्रियः शूद्राः गर्भगेह प्रवेशने – तत् भूतलं पञ्चगव्येन वा गोमयाम्बुना वा प्रोक्ष्य समालेपनं कुर्यात्॥

❖ चण्डालः – पतितादयः – आशौचसहिताश्च गर्भालय प्रवेशने – मृण्मय बिम्बं त्यक्त्वा। पुण्याहं वाचयित्वा प्रोक्ष्य। इतर बिम्बान् संक्षाल्य। कलशैः संस्नाप्य। कवाटादि भूतलान्तं गोमयाम्भोभिः आलिप्य। शान्तिहोमं जपञ्च कृत्वा। द्विजानां दानं भोजनञ्च कारयेत्॥

❖ प्राकार – मण्डप – धाम्निगोपुरे – पाकवेश्मनि अग्निना दग्धे – पुनः सृज्य। शान्तिहोमं कृत्वा। अधमोत्तम(८१) मार्गेण स्नापयित्वा। द्विजानां दानं भोजनञ्च कारयेत्॥

❖ देवबिम्ब दाहने – समाधाय यथापूर्वं सहस्रकलशैः स्नपनं कृत्वा। प्रतिष्ठाप्य यथाविधि॥

❖ देवस्य वस्त्र प्रभादयः दाहने – देवं नवकलशैः संस्नाप्य। शान्तिहोमं कारयेत्॥

❖ सुदर्शनम् अग्निना दग्धे सति – नवकलशैः स्नापयेत्॥

❖ ध्वज वितान छत्र आस्तरणादिके दग्धे – तत्सर्वं पुनरुत्पाद्य शान्तिहोमादिकं चरेत्॥

❖ गर्भालय पूजाकाले – सर्वत्र अन्नदि निवेदने – वाहनादिष्वलङ्कारेषु च यवनिकापट रहिते, बाह्यमण्डप पूजायां यवनिकापट सहिते – मूलमन्त्रम् अयुतवारं जपेत्॥

**श्रीपाद्म संहितोक्त नित्याराधन प्रायश्चित्तं समाप्तम्**

--------------

**समाप्तोयं समाराधनम्**

श्रीः

## मुद्रा चित्राणि



अग्निप्राकार मुद्रा



योग मुद्रा



योगसम्पुट मुद्रा



तत्व मुद्रा



सृष्टि मुद्रा



संहार मुद्रा



शोषण प्लावन मुद्रा



दाहन आप्यायन मुद्रा



आवाहन मुद्रा



स्थापन मुद्रा



सन्निधान मुद्रा



सन्निरोधन मुद्रा



सम्मुखीकरण मुद्रा



स्वागत मुद्रा



प्रतिमा मुद्रा



प्रार्थन मुद्रा



हृदय मुद्रा



शिरो मुद्रा



शिखा मुद्रा



कवच मुद्रा



नेत्र मुद्रा



अस्त्र मुद्रा



किरीट मुद्रा



वनमाल मुद्रा



चक्र मुद्रा



शङ्ख मुद्रा



श्रीवत्स मुद्रा



कौस्तुभ मुद्रा



पद्म मुद्रा



गदा मुद्रा



मुसल मुद्रा



खड्ग मुद्रा



शार्ङ्ग मुद्रा



अनन्त मुद्रा



गरुड मुद्रा



विष्वक्सेन मुद्रा



वराह मुद्रा



नारसिह्म मुद्रा



राम मुद्रा



कृष्ण मुद्रा



धूप मुद्रा



दीप मुद्रा



कुम्भ मुद्रा



सुरभि मुद्रा



ग्रास मुद्रा



आहुति मुद्रा



मुष्टि, बलि मुद्रा

श्रीः

## अर्घ्यादि पात्र स्थापन क्रमः




### स्नपन कलश स्थापन क्रमः

| | | |
|---|---|---|
| क्षीरम् | आचमनम् | मधु |
| अर्घ्यम् | घृतम् | पञ्चगव्यम् |
| दधि | पाद्यम् | फलाम्बु |

### स्नपन कलश उत्तापन क्रमः

| | | |
|---|---|---|
| 6 | 3 | 7 |
| 2 | 9 | 4 |
| 5 | 1 | 8 |

प्राची

---------शुभम्---------